॥ श्री न्यायसिन्धुप्रकरणम् ॥

प्रणेता—
शासनसम्राट्—तपोगच्छाधिराज
सूरिचक्रसार्वभौमभट्टारक
॥ श्री विजयनेमिसूरिः ॥

॥ श्रीः ॥

॥ परमकारुणिकगीतार्थत्वादिगुणोपेतनिजचरणवि-
द्याप्रतिभातिशयादिगुणसंस्मारितातीतयुगप्र-
धानगुरुवर्यश्रीवृद्धिचन्द्रापरनामश्री-
वृद्धिविजयसद्गुरुभ्यो नमः ॥

भव्यसत्त्वानुग्रहविहितानेकग्रन्थसन्दर्भ-सक-
लसूरिसार्वभौमशासनसम्राट्-तपोगच्छाचार्य-
भट्टारकश्रीविजयनेमिसूरीश्वरप्रणीतम् ॥

श्रीन्यायसिन्धुप्रकरणम्

॥ इदञ्च ॥

प्राग्वाटवंशविभूषण-धर्मकर्मकर्मठश्रेष्ठिप्रवरमनसुख-
भाईतनुजनुषा माणेकलालभाईश्रेष्ठिप्रवरेण-
स्वश्रेयसे सम्मुद्य प्राकट्यं प्रापितम् ॥

वीर सं० २४४९ विक्रम सं० १९८०

प्रत, ५००, सन्ने १९२३, प्रथमावृत्तिः,

॥ अमूल्यम् ॥

आ पुस्तक "जैन एडवोकेट प्री. प्रेसमां" शा. चीमनलाल गोकलदासे छाप्युं. घीकांटावाडी—अमदावाद

आ पुस्तक. १८६७ ना २५ मा एक्ट प्रमाणे रजीस्टर करावी प्रकाशके छापवा छपाववा विगेरे सर्व्वहक स्वाधीन राख्या छे—

स्वपरसमयपारावारपारीण–शासनसम्राट्–तीर्थरक्षाप्रवण–परोपकारै–
कार्पितकरण–तपोगच्छाधिराज सूरिचक्रचक्रवर्ति–



आचार्य श्रीविजयनेमिसूरीशः

जन्म सं. १९२९ दीक्षा स १९४५ गणिपद सं. १९६० पन्न्यासपद सं. १९६० सूरिपद सं. १९६४
कार्तिक शु. १ ज्येष्ठ शु. ७ कार्तिक कृष्ण. ७ मागशर शु. ३ ज्येष्ठ शु. ६

फीनीक्ष प्रीन्टींग वर्क्स

॥ श्रीन्यायसिन्धुविषयानुक्रमणिका ॥

विषयः	श्लोकः
मङ्गलाचरणम् आद्यन्ततीर्थङ्करगुरूणां स्मरणलक्षणम्	१-३
ग्रन्थतत्कर्तृनामोट्टङ्कनमभिधेयसूचनञ्च	४
लक्षणमानाभ्यां ज्ञानस्य प्रथमतो निरूपणे बीजमुपदर्शितम्	५
ज्ञानस्य स्वरूपतटस्थलक्षणद्वयोपदर्शनम्	६
तटस्थस्वरूपलक्षणविशेषोपदर्शनम् ८ (मावेदितम्	९
ज्ञानस्वरूपे विषयघटितत्वं परमतेनोपदर्श्य स्वप्रकाशकत्व	
सूर्यदृष्टान्तेन ज्ञाने स्वपरप्रकाशकत्वनिष्टङ्कनम्	१०
परप्रकाशेऽनवस्थापादनं गौरवप्रदर्शनञ्च	११-१२
जनकस्यैव विषयत्वमित्यस्यापाकरणम्	१३-१४-१५
इन्द्रियसन्निकृष्टार्थस्यैव विषयत्वमित्यस्यापाकरणम्	१६-१७
लौकिकविषयत्वस्येन्द्रिययोग्यतावच्छेदकत्वखण्डनम्	१८-१९
इन्द्रियार्थसन्निकर्षस्य प्रत्यक्षजनकत्वमपाकृत्य योग्यत्वस्य तत्त्वमुपपादितम् २०-२४ (परिहारः	२५-२७
जैनस्वप्रकाशवादे प्रभाकरमताद्विशेषोपदर्शनेन तद्दोषपरप्रकाशे ज्ञानज्ञानस्यासम्भवोपपादनम्	२८-२९-३०-३१
स्वप्रकाशेऽर्थे प्रवृत्त्युपपादनं परकीयदोषोन्मूलनञ्च	३२-३३
वेदान्तिमताज्जैनमते स्वप्रकाशे विशेषोपदर्शनम्	३३-३४
साङ्ख्यमताद्विशेषोपवर्णनम्	३५-३५
बौद्धमताद्विशेषप्रदर्शनम्	३७
परप्रकाशवादिभ्यो वैशेषिकादिभ्यो वैलक्षण्योपदर्शनम्	३८
स्वसंवेदनात्मकं स्वमेव स्वस्मिन्प्रमाणमिति निगमितम्	३९
प्रमाणस्य लक्षणम्	४०
स्वमतव्यवस्थापने परमतखण्डनस्यावश्यकत्वमुपदर्शितम्	४१
निर्विकल्पकस्यैव प्रामाण्यं नतु सविकल्पकस्येत्यभ्युपगच्छतो बौद्धस्य प्रक्रियायां सविकल्पकद्वारा निर्विकल्पस्य प्रामाण्योपदर्शनम्	४२
तन्मतेऽनुमानस्य प्रामाण्यप्रदर्शनम्	४३
पारमार्थिकसांव्यवहारिकप्रामाण्ययोर्लक्षणं तन्मतेन	४४-४५
जैनोक्तप्रमाणलक्षणस्य निर्विकल्पकेऽव्याप्त्युपदर्शनम	४६

बौद्धोक्ताव्याप्तेर्लक्षणफलोपदर्शनेन बाधतया दोषे पर्यवसानमावेद्यापाकरणम् ४७-४८-४९
तत्रैव प्रमाणत्वेन स्वपरव्यवसायित्वानुमाने पक्षैकदेशे निर्विकल्पके प्रत्यक्षादिना बाधस्योद्धारः ५०
तत्र स्वसंवेदने निर्विकल्पकसाधकत्वस्यापाकरणम् ५१-५३
अनुमानस्य निर्विकल्पकसाधकत्वापाकरणं तदुक्तव्याप्त्याद्यसिद्ध्युपपादनेन ५५-६९ (धकत्वम् ६०
प्रत्यक्षानुमानव्यतिरिक्तप्रमाणस्यानभ्युपगमादेव न तत्सा-
बौद्धाभ्युपगतपारमार्थिकप्रामाण्यलक्षणखण्डनम् ६१
सविकल्पद्वाराऽर्थोपदर्शकतया निर्विकल्पस्य प्रामाण्यमिति बौद्धसम्मतस्योन्मूलनम् ६२-६६
वस्तुनः कस्यापि प्रत्यक्षबुद्धौ विशेषणतयाभानासम्भवेन न सविकल्पकप्रत्यक्षतासम्भव इति न तथा तस्य प्रामाण्यमिति बौद्धपूर्वपक्षः ६७
तत्र प्रत्यक्षेऽर्थे शब्दस्य विशेषणतया भानापाकरणम् ६८-६९
अर्थे जातेर्विशेषणतया भानखण्डनम् ७०
अवयविनो द्रव्यस्य चातिरिक्तस्यानभ्युपगमेन ताभ्यां वैशिष्ट्यभानस्य व्युदसनम् ७१-७२ (७३-७४
संयोगविभागाभ्यां कर्मणा च वैशिष्ट्यभानस्यापाकरणम्
पूर्वत्वादीनामुपाधीनां विशेषणत्वापाकरणम् ७५
दण्डादेर्विशेषणतया भानस्य विध्वंसनम् ७६-७८(निरासः७९
वस्तुमात्रस्य स्वात्मप्रतिष्ठितत्वेन भूतलाश्रितघटादिबुद्धे-
सन्निकर्षासम्भवेन देशादितो विशिष्टबुद्ध्यसम्भवः असन्निकृष्टे तदभ्युपगमे दोषप्रदर्शनञ्च ८०-८२
विशिष्टबुद्धेःकल्पनामात्रत्वोद्धङ्कनेन बौद्धपूर्वपक्षनिगमनम् ८३
बौद्धमतखण्डनारम्भः ८४
प्रत्यक्षेऽर्थे शब्दवैशिष्ट्यभाने बौद्धोक्तदूषणस्योन्मूलनम् ८५
प्रत्यक्षे जातिविषयकत्वव्यवस्थापनम् ८६
अनुगतबुद्धेरपोहावगाहित्वस्य बौद्धसम्मतस्य खण्डनम् ८७-९०
नायातीत्यादिना बौद्धोक्तस्य दोषनिकरस्य नैयायिकसम्मतायां जातावेव सम्भवो न तु जैनसम्मतायामित्यस्य व्यवस्थापनम् ९१-९५
जात्यादिविशिष्टबुद्धौ कथञ्चित्तादात्म्यस्यैव संसर्गतया भानं न तु समवायादेरित्यस्यव्यवस्थापनम् ९६-९८
तत्र संयोगस्य नैयायिकसम्मतस्यापाकरणम् ९९-१०५

विषयाः श्लोक.

तत्र समवायस्य खण्डनम् १०६-१०९

कथञ्चित्तादात्म्येन जातिविशिष्टबुद्धिनियमनेन जात्या-
न विशिष्टबुद्धिरिति वदतो बौद्धस्य शिक्षणम् ११०

प्रत्यक्षेऽवयविनो वैशिष्ट्यभानस्योपपादनम् १११

बौद्धोक्तदूषणजालो नैयायिकसम्मतमेवावयविनमा-
क्रामतीत्यस्योपदर्शनम् ११२ (११३-१४

स्वमते चलनाचलनाद्यनन्तधर्मकत्वेनावयविनो निष्टङ्कनम्

परमाणुपुञ्जेनैव घटाद्यवयविबुद्धिरिति बौद्धमतस्य
खण्डनम् ११५

गुणव्यतिरिक्तद्रव्यन्नास्तीत्यस्य बौद्धमतस्य खण्डनम् ११६-१७

बौद्धोक्तदोषनिकरस्यातिरिक्तसंयोगे सञ्चारणेन स्वस-
म्मतपर्यायात्मकसंयोगेन विशिष्टबुद्धेरुपपादनम् ११८-२२

विभागेन कर्मणा च वैशिष्ट्यस्य प्रत्यक्षे स्वमतेन
भानमुपपादितम् १२३-१२४

क्षणिकाक्षणिकत्वपक्षेजैनसिद्धान्तेक्रियासम्भवोपदर्शनम् १२५

एकान्तक्षणिकत्वस्यैकान्तस्थैर्यस्य चासम्भवोपदर्शनम् १२६

यत्सत्तत्क्षणिकमिति बौद्धमतमनुपपाद्यन्यायमतेन प्रति-
बन्धा निराकृतम् १२७-१३४

तार्किकस्य प्रतिबन्दिबलाद्बौद्धमतखण्डनं न युक्तं किन्तु
बौद्धोक्तदोषकदम्बकस्य स्वरूपसहकारिशक्त्यादिकर-
म्बिते ऽर्थेऽवकाश एव नास्तीत्युपदर्शितम् १३५-१३६

जैनराद्धान्ते संयोगादिवैशिष्ट्यावगाहिप्रत्यक्षनिगमनम् १३७

केवलवर्तमानस्य प्रत्यक्षे भानमिति बौद्धमतस्योन्मूलनम्
१३८-१४०

पूर्वापरयोःप्रत्यक्षे न भानमित्यस्य खण्डनेन तद्विशिष्ट-
बुद्धेर्निगमनं सान्निध्यस्य न प्रत्यक्षे नियामकत्वं
किन्तु प्रतिनियतयोग्यत्वस्यैवेति दर्शितञ्च १४१-१४४

पूर्वापरयोः प्रत्यक्षेऽभाने सुगतस्य सर्वज्ञत्वानुपपत्तिरु-
पदर्शितदण्डादिविशिष्टतया शबलात्मकवस्तुतः प्रत्य-
क्षस्य प्रतिनियतवचसोल्लेखे बीजमुपदर्शितम् १४७-१५०

बौद्धाभिमतस्य स्वात्मप्रतिष्ठितत्वस्य १५१

जैनमताश्रयणेन युक्तत्वमुपपादितम् १५२

वस्तूनामन्यसमाश्रितत्वे बौद्धोक्तदूषणस्योद्धारः १५३-५४

तत्र शब्दाश्रयतया निरंशमाकाशमभ्युपगच्छतो १५५-१५६

नैयायिकस्य मतमाशङ्क्य शब्दस्य पौद्गलिकत्व
व्यवस्थापनेन निराकृतम् १५७-१५९
श्रोत्रस्याकाशरूपत्वखण्डनम् १६०-१६१
चक्षुषः प्राप्यकारित्वखण्डनम् १६२
चक्षुषस्तैजसत्वापाकरणम् विस्तरतः १६३-१७१
तत्रैव तमसः पौद्गलिकत्वप्रदर्शनम् १७२-१७३(हरणम् १७४
जगतो भिन्नाश्रितत्वनिगमनेन ततः सविकल्पकबुद्ध्युप-
संतदाधारस्य तदाधेयविशिष्टत्वाविशिष्टत्वानेकान्तोप-
पादनेन सन्निकर्षस्य प्रत्यक्षे सर्वत्रानियामकत्वेन चा-
वृतदेशस्यापि विशिष्टप्रत्यक्षे भानमुपपादितम् १७५-७६
योग्यत्वबलात्प्रतिनियतस्यैव पूर्वापरादेः प्रत्यक्षे भान-
मिति न सर्वस्य सर्वज्ञत्वापत्तिरित्युपदर्शितम् १७७-७८
॥ इति सविकल्पकवादपरिसमाप्तिः ॥
ज्ञाने साकारत्ववादिनां बौद्धानां पूर्वपक्षः १७९-१८२
तत्र सौत्रान्तिकयोगाचारयोर्विशेषोपदर्शनम १८३
स्याद्वादिनो बौद्धमतप्रतिविधानम् १८४
तत्र सौत्रान्तिकाभ्युपगतस्य विषयव्यवस्थाहेतोर्ज्ञानग-
तस्य साकारत्वस्य खण्डनम् १८५
वस्तुस्वभावस्य प्रतिकर्मव्यवस्थाहेतुत्वमुपपादितम्
तदनभ्युपगमे दोषश्चोपदर्शितः १८६-१८७ (१८८-१८९
साकारत्वस्य विषयव्यवस्थाहेतुत्वेऽनवस्थादिदोषोपदर्शनम्
सौत्रान्तिकस्य साकारत्वाभ्युपगमे बाह्यासिद्धेरापादनम्
१९०-१९१
बाह्याकारयोर्बिम्बप्रतिबिम्बभावेनानुमेयानुमापकभावस्या
पाकरणम् १९२-१९५ (कर्तुं न शक्त इत्युपदर्शितम् १९६
नैयायिकोऽपि स्वभावविशेषमशरणीकृत्य विषयव्यवस्थां
साकारवृत्त्यभ्युपगन्तुर्वेदान्तिनोऽपि विषयव्यवस्थायां
स्वभावस्यैव शरणीकरणीयत्वमिति तन्मते दोषोप-
दर्शनेन निष्टङ्कितम् १९७-१९८
बौद्धमतखण्डनातिदेशः साङ्ख्यमते १९९
स्वमते साकारानाकारयोरुपयोगयोरुपदर्शनम् २००-२०१
अर्थाभिधानप्रत्ययानां समानशब्दाभिधेयत्वादेवार्थशब्दा-
भिलाप्यत्वं ज्ञानेन तु साकारतयेति निष्टङ्कितम् २०२-३
स्वमते समानशब्दाभिधेयत्वेन ज्ञानार्थयोः कथञ्चिद्-
भेदोपदर्शनम् २०४

विषयः श्लोकः

अनाकारविज्ञानाभ्युपगन्तृवैभाषिकमतखण्डनम् २०५-६

बाह्यापलापिनस्साकारविज्ञानाभ्युपगन्तुर्योगाचारस्य
मतं खण्डितम् २०७-८ (तमाशङ्क्यापाकृतम् २०९-१०

तत्र अभिन्नोपलम्भविषयत्वाज्ज्ञानार्थयोरभेद इति तन्म-
ज्ञानार्थयोरभेदे चित्राकारज्ञानानुपपत्तिः तत्रातिरिक्त-
चित्राकारताया अपाकरणञ्च २११-१२-१३

यथार्थक्रियासाङ्कर्याद्ग्राह्ययोर्भेदस्तथा प्रतिभाससाङ्कर्याज्ज्ञा-
नाकारयोरपि भेदस्तत्रेति दर्शितम् २१४

ज्ञानार्थयोरभेदे ज्ञानं घट इत्याद्यापत्तिर्दर्शिता २१५

ज्ञानस्य तादात्म्यं विषयत्वनियामकमिति विज्ञानवा-
द्यभिमतमपाकृतम् २१६-१७

सादृश्यस्य ज्ञानाद्यतिरिक्तत्वं व्यवस्थापितम् २१८

अर्थापलापे ज्ञानानां मिथोभेदप्रतीतेरनुपपत्तिः गुरुशिष्या-
दिव्यवस्थानुपपत्तिः मुक्तिरिति ज्ञानादेव मुक्त्यापत्तिश्च
दर्शिताः २१९-२१ (करणम् २२२

अर्थं विनाऽपि वासनाबलाज्ज्ञानानां भेद इत्यस्यापा-
ज्ञानमात्रस्य स्वप्नोपमत्वमपाकृतम् २२३

ग्राह्यत्वादर्थस्य मिथ्यात्वे ज्ञानस्य तत्त्वापत्तिरुपदर्शिता २२४

विज्ञानवादिनः कथायामप्रवेश उपपादितः २२५

वाद्यादीनां वैज्ञानिकं सत्त्वमाशङ्क्यापाकृतम् २२६-२२७

ज्ञानार्थयोस्सदसतोस्तन्मतेऽभेदानुपपत्तिर्दर्शिता २२८

बाह्यवादे भेदाभेदादिविकल्पेन अर्थस्याज्ञानेन ग्रहणं
न सम्भवतीत्याशङ्कोद्भाव्य व्युदस्ता २२९-२३२

विज्ञानवादिनस्तादात्म्यस्य ग्राह्यत्वनियामकत्वे ज्ञाने क्ष-
णिकताद्यनुमानवैयर्थ्यतदसम्भवादेरुपदर्शनम् २३३-२३७

तन्मतेऽणवात्मकस्य ज्ञानस्यासिद्धिः प्रतिपादिता २३८

ज्ञानं विनाप्यर्थस्य सत्त्वं प्रतिपाद्यदृष्टिसृष्टिखण्डनम् २३९

ज्ञानाभावस्यार्थाभावासाधकत्वमुपपादितम् २४०-४१

बाह्यमपलपतो योगाचारस्य वेदान्तिमताश्रयणमर्थत
आपादितम् २४२

विरुद्धधर्माध्यासादेकस्य वेदान्त्यभ्युपगतस्यात्मनोऽ-
सम्भवश्चेत्क्षणिकविज्ञानमप्येकं तदा न सम्भवतीत्यु-
पपादितम् २४३-२४६ (पादानत्वानुपपत्तिः २४७

एकस्य धर्मद्वयानभ्युपगमे एकस्यालयप्रवृत्तिविज्ञानद्वयो-

क्षणिकविज्ञानवादे बन्धमोक्षव्यवस्थानुपपत्तिरावेदिता उदयनाचार्यसम्मतिश्च २४८
माध्यमिकस्य शून्यवादिनः प्रश्नः २४९
तत्र आत्मादीनां विचारासहत्वं प्रतिज्ञातम् २५०
वस्तुत आत्मादीनामभावेऽपि संवृतिसत्त्वाद्व्यवहारोपपादनम् २५१
अनवस्थाया संवृतिसत्त्वस्य शून्यत्वे पर्यवसानं सूचितम् २५२
ग्राह्यस्याखण्डरूपत्वाद्यापाकरणम् २५३
कारणं तदन्यो वा ज्ञानस्य विषयो न सम्भवतीति विकल्पनिकरेणावेदितम् २५४-२५६
मानाधीनाया व्यवस्थाया असम्भव आवेदितः २५७
ज्ञाने प्रमाभ्रमरूपविशेषनिराकरणम् २५८
ज्ञाने भ्रमत्वसाधकस्य बाधितगोचरत्वस्योन्मूलनम् २५९-७१
ज्ञानार्थयोरन्योन्यस्मिन् फलकारित्वतदभावयोर्दोषोपदर्शनम् २७२,२७४ (निगमनम् २७५-२७७
ज्ञाने प्रामाण्यस्य भ्रमत्वस्य चासिद्धिरुपपाद्य शून्यत्व शून्यवादि-मतखण्डनम् २७८ (पदर्शनम् २७९-२८०
तत्र जगदलीकत्वसाधकविचारस्य सत्त्वासत्त्वयोर्दोषोशून्यत्वस्य तत्साधकप्रमाभावाभावयोरसिद्ध्युपदर्शनम् २८१
जगतो ज्ञानानधीनं सत्त्वमुपदर्शितम् २८२ (द्वारः २८३
ज्ञानस्य जैनमते स्वसंविदितत्वेन संवृत्तिसत्त्वपक्षदोषोशून्यत्ववादिनो ग्राह्यखण्डनस्य खण्डनम् २८४-२८५
तत्र घटादेः स्थूलत्वाणुत्वाद्युपदर्शनम् २८६
क्षयोपशमविशेषादेर्विषयत्वनियामकत्वमावेदितम् २८७
कारणखण्डनयुक्तेरपाकरणम् २८८-२८९
मानानवस्थायाः परिहारः २९०
जाग्रत्स्वप्नबोधयोर्वैलक्षण्योपदर्शनम् २९१-२९२
स्वप्नेऽप्रथननिराकरणेनान्यथाप्रथनस्य व्यवस्थापनम् २९४
न्यायसांख्यजैमिनीयेष्वन्यथा प्रथनं वेदान्ते त्वनिर्वचनप्रथनं स्वप्ने प्रदर्शितम् २९५
स्वप्ने सत्ख्यातिः सदृष्टान्तमुपवर्णिता २९६
भ्रमानभ्युपगन्तृप्रभाकरमतमुपदर्शितम् २९७
भ्रमाणां वैलक्षण्यमन्यथा प्रथन एवेत्युपदर्शितम् २९८
शशशृङ्गादिवाक्याद्बोधोपपत्तिरन्यथाप्रथन एवेतिदर्शितम् २९९
भ्रमत्वेऽनुभवः प्रमाणतया दर्शितः तेन च प्रभाकरस्यापि

विषयः श्लोकः
प्रतिक्षेपः ३००-१ (व्यवस्थापनेन ३०२-७
भ्रमे बाधितार्थविषयत्वखण्डनस्य खण्डनं बाधकानां
स्वप्नजाग्रद्दशयोर्भेदव्यवस्थापनम् ३०८
अर्थक्रियाज्ञानप्रामाण्यस्य स्वतस्त्वोपपादनेन शून्यवादि-
कृततत्खण्डनस्य खण्डनम् ३०९
शून्यवादिकृतप्रामाण्यासिद्धिखण्डनस्य न्यायमीमांस-
सयोरवकाश आवेदितः ३१०
संवादखण्डनस्य खण्डनं संवादकव्यवस्थापनेन ३११-१३
अर्थज्ञानयोर्ग्राह्यग्राहकभावस्य स्वभावतोव्यवस्थापनम् ३१४-१५
ज्ञानस्य ग्राह्यत्वं ग्राहकत्वञ्च निमित्तभेदेन व्यवस्था-
पितम् ३१६-१७ (नावकाश इत्यावेदितम् ३१८
एकान्तवादमवलम्ब्य प्रदर्शितानां दोषाणां स्याद्वादे-
अर्थसिद्धिं प्रामाण्यसिद्धिश्चावेद्य तन्न्यायेन भ्रमत्व
सिद्धिरावेदिता ३१९
अर्थखण्डनप्रवणस्य शून्यवादिनो नैरात्म्यदर्शनेऽपि
नाभीष्टसिद्धिः स्याद्वादाश्रयणमन्तरेति दर्शितम् ३२०-२१
इति शून्यवादिमतखण्डनम्.
ज्ञानातिरिक्तस्येन्द्रियादेः प्रमाकरणत्वेन प्रामाण्यं नैया-
यिकसम्मतं द्रव्येन्द्रियभावेन्द्रियस्वरूपनिरूपणम् ३२३-२४
नैयायिकसम्मतस्येन्द्रियस्यार्थजतावहेतुत्वमुपपादितम् ३२५
मनसोऽणुत्वमपाकृत्य महत्त्वं व्यवस्थापितम् ३२६
लब्धीन्द्रियक्रमवशान्नेत्रादिज्ञानक्रमस्य मनसोऽनि-
न्द्रियत्वस्य चोपदर्शनम् ३२७
ज्ञानमात्रस्य स्वांशे प्रमात्वमर्थांशे च कस्यचित्प्रमात्वं
कस्यचिच्चाप्रमात्वमित्युपदर्शितम् ३२८
जैनमते प्रामाण्याप्रामाण्ययोरुत्पत्तौ परतस्त्वं ज्ञप्तौ-
स्वतस्त्वं परतस्त्वञ्च मीमांसककापिलयोश्च प्रमात्वमुत्प-
त्तिज्ञप्तिफलेषु स्वत इति दर्शितम् ३२९
वेदान्तिनये प्रमात्वस्य स्वतस्त्वं न्यायनये प्रामाण्याप्रा-
माण्ययोःपरतस्त्वं बौद्धमतेऽपि तथैवार्थांशमवल-
म्ब्येति दर्शितम् ३३०
उपदर्शितेष्वेकान्तत्वमात्रं जैनबाध्यमित्युपदर्शितम् ३३१
मीमांसकमतोन्मूलनाय प्रामाण्ये गुणजन्यमसाधकमनुमा-
नमुपदर्शितम् ३३२(धकत्वापत्तिप्रतिबन्धाऽपाकरणम् ३३३

मीमांसकसम्मतस्य प्रत्यक्षे गुणबाधकत्वस्य दोषबाधकत्वा-
शक्तिरूपप्रमात्वस्य स्वतस्त्वं शक्तिरूपाप्रमात्वस्वत-
स्त्वप्रतिबन्धाऽपाकृतम् ३३४
प्रमात्वस्य कारणागतत्वात्स्वतस्त्वमित्यस्य ज्ञानत्व-
भ्रमत्वयोस्तत्स्वापत्तिप्रतिबन्धाऽपाकरणम् ३३५
शक्तिशक्तिरेककारणकत्वं सदृष्टान्तमुपदर्शितम् ३३६
प्रमायां दोषाभावस्य कारणत्वेऽप्यतिरिक्तभावाजन्य-
त्वेन स्वतस्त्वमित्यस्य खण्डनम् ३३७
दोषस्य गुणाभावरूपत्वेन भ्रमस्यैव स्वतस्त्वमिति
मीमांसकमते दोषप्रदर्शनम् ३३८
गुणदोषयोस्समानमानत्वमुपदर्शितम् ३३९
प्रामात्वस्यौत्सर्गिकत्वमपाकृतम् ३४०
प्रमात्वस्यौत्सर्गिकत्वं प्रतिबन्धाऽपादितम् ३४१-४२
प्रामाण्यस्य जनकज्ञाने ज्ञप्तिःपरत उपदर्शिता ३४३
प्रामाण्यस्यार्थक्रियाज्ञाने ज्ञप्ति जैनमतउपपाद्यान-
वस्था परिहृता ३४४
प्रामाण्यस्य स्वतो ज्ञप्तौ संशयानुपपत्तिरूपदर्शिता ३४५
प्रामाण्यस्य जैनमते कथञ्चिज्ज्ञानस्वरूपत्वेऽपि तदंशे-
क्षयोपशमविशेषाभावान्न स्वसंविदितेन ज्ञानेन पूर्वं
ग्रहणमिति दर्शितम् ३४६
केवलज्ञाने प्रामाण्यस्य स्वत एव ग्रहणमुपदर्शितम् ३४७
प्रामाण्यस्य ज्ञप्तौ संवादित्वाद्यपेक्षामनङ्गीकुर्वतो मी-
मांसकस्य बुद्धागमोऽपि प्रमाणं स्यादिति दर्शितम् ३४८
बाधिकबोधकत्वेन बुद्धागमस्याप्रामाण्ये बाधाभावस्य
प्रामाण्यसाधकमिति दर्शितम् ३४९
बाधाभावस्य तन्मते संवादितादौ पर्यवसानं दर्शितम् ३५०
स्वागमे नित्यत्वतः प्रामाण्यमिति मीमांसकाभ्युपग-
मस्य खण्डनम् ३५१
दोषमुक्तपुरुषापलापतो वेदे प्रामाण्याभ्युपगमेऽप्रामाण्य-
मेव ततः स्यादित्यावेदितम् ३५२-५३
एकान्तेन नित्यत्वस्यानित्यत्वस्य चाभाव उपदर्शितः ३५४
शब्दानां ध्वनिव्यङ्ग्यत्वं मीमांसकसम्मतमपाकृतम् ३५५-६०
शब्दाप्रत्यक्षनिमित्ततया वायूनामावरणत्वकल्पनमपाकृतम्
नित्ये शब्दे क्रमासम्भवप्रदर्शनम् (३६१-६५) ३६६-६७
पौद्गलिकस्यापि शब्दस्य मध्यदेशाविनाशश्रुतिप्राप्त्यो-

विषयः	श्लोकः
ूपपादनं सदृष्टान्तम्	३६८-६९ (३७०-७२
अनित्ये शब्दे परस्य शक्तिग्रहासम्भवाशङ्कोद्भाव्य पराकृता	
जातिशक्तिवादं व्यक्तिशक्तिवादञ्चापाकृत्य स्वसिद्धान्तितसामान्यविशेषोभयात्मकवस्तुशक्तिवादस्योपदर्शनम्	३७३-३७४ (३७५
सामान्यविशेषोभयात्मकस्य शब्दस्य शक्तत्वव्यवस्थापनम्	
नित्यत्वेन वेदे दोषाभावादप्रामाण्याभाव इत्यस्य तथैव गुणाभावात्प्रामाण्याभाव इति प्रतिबन्धाऽपाकरणम्	३७६
स्मर्यमाणकर्तृकत्वाद्बौद्धागमादिवद्वेदे पौरुषेयत्वव्यवस्थापनम् ३७७	(३७९-३८०
सिद्धार्थकस्य वचनस्य न प्रामाण्यमित्याशङ्क्य निराकृतम्	
सिद्धार्थात्कर्तुरस्मरणे बौद्धागमादेरपौरुषेयत्वापादनम्	३८१
सर्वज्ञविचारः	३८२
तत्र वक्तृत्वतः सर्वज्ञत्वाभावसाधनस्य खण्डनम्	३८३-८४
आगमात्मककार्यविशेषेण सर्वज्ञसिद्धिरुपदर्शिता	३८५-८६
सर्वज्ञे रागादेरात्यन्तिकः क्षयः प्रसाधितः	३८७-८८
मीमांसकस्य सर्वज्ञानभ्युपगन्तुः पूर्वपक्षः	३८९
तत्र सर्वज्ञे प्रत्यक्षप्रमाणाभाव उपदर्शितः	३९०
सर्वज्ञेऽनुमानोपमानयोरभाव उपदर्शितः	३९१
सर्वज्ञ आगमप्रमाणस्यापाकरणम्	३९२-९४
सर्वज्ञः समानकालिकैर्भिन्नकालिकैश्च ज्ञातुमशक्योऽर्थापत्तिरपि न तत्र प्रवर्त्तत इत्युपदर्शितम्	३९५-९६
अभावप्रमाणादपि न सर्वज्ञसिद्धिरिति दर्शितम्	३९७
सर्वज्ञानस्योत्पत्त्यसम्भवः तत्रेन्द्रियस्य तदुत्पादकत्वखण्डनम्	३९८
सर्वज्ञानस्य नेत्रादिजन्यत्वेप्रति नियतविषयत्वमेव स्यादित्युपपादितम्	३९९-४०१
सर्वज्ञानस्य मनसाऽप्युत्पत्तिरपाकृता	४०२
सर्वज्ञानस्यालौकिकसन्निकर्षजत्वमपाकृतम्	४०३-४०४
सर्वज्ञानस्य लिङ्गादुत्पत्तिरपाकृता	४०५
लिङ्गजन्यज्ञानवतः सर्वज्ञत्वमपहस्तितम्	४०६-४०७
सर्वज्ञानस्योपमानादुत्पत्तिरपाकृता	४०८
आगमस्य सर्वज्ञानजनकत्वमपाकृतम्	४०९
सर्वज्ञानस्यार्थापत्त्योत्पत्तिः पराकृता	४१०

विषयः	श्लोकः
सर्वज्ञानस्याभ्यासजन्यत्वमपाकृतम्	४११
सर्वज्ञस्य भ्रान्तिज्ञत्वाद्भ्रान्तत्वापादनम्	४१३
सर्वज्ञानुमाने प्रत्यक्षानुमानबाधोपदर्शनम्	४१४
सर्वज्ञत्वाद्यभावसाधकानामनुमानमुपदर्शनम्	४१५-१६
सर्वज्ञानुमाने उपमानबाधोपदर्शनम्	४१७
सर्वज्ञानुमाने आगमबाधोपदर्शनम्	४१८
सर्वज्ञानुमाने अभावप्रमाणबाधोपदर्शनम्	४१९
सर्वज्ञे कीटादिज्ञानस्य वैयर्थ्यमुपदर्शितम्	४२०
परदुःखं साक्षात्कुर्वतः सर्वज्ञस्य दुःखित्वापादनम्	४२१
मीमांसकमतखण्डनम्	४२२
तत्र प्रत्यक्षतत्पूर्वकानुमानयोः सर्वज्ञत्वसाधकत्वखण्डनस्येष्टापत्त्या परिहारः ४२३	४२४-२७
सर्वज्ञानसाधकानि सामान्यतो दृष्टानुमानानि दर्शितानि	
आगमस्य सर्वज्ञसाधकत्वं व्यवस्थापितम्	४२८
सर्वज्ञानस्य प्रत्यक्षत्वं निष्टङ्कितम्	४२९-४३०
अभ्यासाज्ज्ञाने प्रकर्षनिष्ठा सदृष्टान्तमुपवर्णिता	४३१
सर्वज्ञस्य भ्रान्तिज्ञत्वेऽपि न भ्रान्तत्वमिति व्यवस्थापितम्	४३३
सर्वज्ञे प्रत्यक्षानुमानबाधयोरुद्धारः	४३४
सर्वज्ञेऽनुमानबाधस्य जैमिन्यादौ मीमांसकत्वादेरनुमानबाधप्रतिबन्धाऽपाकरणम् ४३५-४३६	(४३७-४३८
सर्वज्ञस्य स्वसमकालिकादिभिर्ज्ञानस्व सदृष्टान्तमुपपादितम्	
उपमानस्य सर्वज्ञबाधकत्वमपहस्तितम्	४३९
परदुःखसाक्षात्करणेऽपि सर्वज्ञस्य न दुःखित्वमित्युपदर्शितम्	४४०
मीमांसकलक्षणलक्षितस्य प्रमाणस्य निराकरणम्	४४१-४४८
भट्टाभ्युपगतज्ञातताया अपाकरणम्	४४९-४५१
भट्टमतेज्ञप्तेर्ज्ञानिरूपव्यापारानुमाणकत्वस्य खण्डनम्	४५४-५५
प्राभाकरस्य भ्रमस्थले विवेकाख्यातिमभ्युपगच्छतो मतं निराकृतम् ४५६-४५८	(४५९
प्रामाण्यस्य ज्ञप्ताविव कार्येऽपि परतस्त्वं व्यवस्थापितम	
वेदान्तिमतखण्डनम्	४६०-४६१
तदभिमतस्याविद्यकत्वस्यापाकरणम्	४६२-४६३
मिथ्यात्वसाधकं न किमपि प्रमाणमित्युपदर्शितम्	४६४

विषयः श्लोकः
मिथ्यात्वसाधकानुमानस्य तत्साधकदृश्यत्वादेरपा-
करणेन खण्डनम् ४६५-४६७
शब्दस्य मिथ्यात्वसाधकत्वं खण्डितम् ४६८
जगतो ब्रह्मात्मकत्वस्य खण्डनम् ४६९।४७०
उत्पादव्ययध्रौव्यरूपायां सत्तायां मायेति नामान्त-
रकरणं परस्येति दर्शितम ४७१-४७२
स्वप्रकाशे ब्रह्मणि अविद्याया असम्भव उपदर्शितः ४७३
निर्युक्तिकवेदान्तिप्रक्रियाश्रयणस्यायुक्तत्वमावेदितम् ४७४
न्यायमतखण्डनम ४७५
तत्र तन्मतसिद्धानां प्रमातृप्रमातत्सम्बन्धानामप्रामाणि-
कत्वमुपदर्शितम ४७६
आत्मनि नित्यत्वपरममहत्त्वयोरपाकरणम ४७७
आत्मनि स्वदेहसमानमानावगाहि प्रत्यक्षस्य परम-
महत्परिमाणबाधकत्वमुपदर्शितम् ४७८
आत्मनोऽपकृष्टपरिमाणत्वेऽपि न जन्यत्वापत्तिरित्युप-
पादितम् ४७९
आत्मनस्तत्परिमाणस्य च कथञ्चिज्जन्यत्वं प्रसाधितम् ४८०
आत्मनः स्वदेहसमानमानत्वे देहावयवखण्डनवृद्धादिना
तद्देशखण्डनवृद्धयादिप्रसञ्जनस्येष्टापत्त्या परिहरणम् ४८१
आत्मप्रदेशस्य खण्डितशरीरावयवप्रवेशे युक्तिरुपदर्शिता ४८२
अपकृष्टपरिमाणत्वेनात्मनः सावयवत्वादिप्रसङ्गस्येष्टाप-
त्त्या परिहरणम् ४८३ (पाकरणम् ४८४
आरम्भकसंयोगनाशाद् द्रव्यनाश इति न्यायमतस्या-
आत्मनि देहसमानमानत्वेऽनुमानं दर्शितम् ४८५
नित्यविभ्वात्मवादे बन्धाद्यनुपपत्तिरुपदर्शिता ४८६
अदृष्टस्य सर्वकार्यकारणत्वानुरोधेनात्मनो विभुत्वाभ्युप-
गमस्यापाकरणम्४८७-८८(विभुत्वमित्युपपादितम्४८९-९२
अदृष्टस्य कारणत्वमपि शक्त्यैवेति न ततोऽप्यात्म-
कारणत्वस्य शक्त्यात्मकत्वमुपवर्णितम् ४९३
विभुवादे गौरवोपदर्शनम् ४९५
अस्वसंविदितज्ञानवादिनो नैयायिकस्य न ज्ञानसिद्धिर्न
वा विभोरात्मनस्तत्तच्छरीरनियमसिद्धिर्न वाऽदृष्टात्मने-
स्स्वस्वामिभाव नियमसिद्धिरिति दर्शितम्-
ईश्वरवादारम्भः तत्र सर्वाधिष्ठायकतयेश्वरमङ्गीकुर्वतो
नैयायिकस्य पूर्वपक्षः ४९८

विषयः श्लोकः

ईश्वरानुमानस्य कार्यं सकर्तृकमित्यस्योपदर्शनम् ४९९

ईश्वरस्य नित्यत्वविभुत्वे तज्ज्ञानस्य नित्यत्वसर्वविष-
यत्वे चोपदर्शिते ५०० (श्रुति दर्शितम् ५०१

तदुक्तागमस्य तत्र प्रामाण्यं तत्प्रतिक्षेपकानुमानाप्रवृत्ति-
ईश्वरकर्तृत्वखण्डनम् ५०२ (नम् ५०३

तत्राचेतनं चेतनसव्यपेक्षमेव कार्यजनकमित्यस्य खण्ड-
कार्यसामान्यस्य कारणसामान्येनैव व्याप्तिर्न तु कर्त्रे-
ति दर्शितम् ५०४

कर्तुः कार्यविशेषेण व्याप्तिर्दर्शिता ५०५

इन्द्रमूर्ध्नो नरकर्तृकत्वापादनप्रतिबन्द्या कार्यमात्रे सक-
र्तृकत्वनियमस्योन्मूलनम् ५०६

शरीररहितस्य कर्तृरूपगमो निराकृतः ५०७

कार्यत्वस्य कारणजन्यत्वादि साधकत्वमेव नेश्वरजन्य-
त्वसाधकत्वमित्यत्र युक्तिरुद्घाटिता ५०८

कार्यत्वहेतावसिद्ध्याद्युपदर्शनम् ५०९

कार्यत्वसाधकस्य सावयवत्वस्य खण्डनम् ५१०

ज्ञानत्वेन साम्येऽप्यस्मदादिज्ञानविलक्षणमीश्वरज्ञानं
नित्यत्वस्वसंविदितत्वादिनाऽभ्युपगच्छतो नैयायिकस्य
क्षित्यादिकमप्यकर्तृकत्वेन घटादिविलक्षणमस्त्विति
दर्शितम् ५११-५१३

ईश्वरज्ञानस्य सर्वगतत्वापादनम् ५१४-५१५

कर्तृत्वस्वरूपपर्यालोचनेन दोषोपदर्शनम् ५१७-५१८

कर्तुः सकलजनकावगतिमत्त्वस्यापकारणेन तादृशेश्वर-
स्यासिद्ध्युपदर्शनम् ५१९-५२०

सामान्यतः कार्येण सहानुविधानाभावाच्छरीरस्येव
कर्तुरकारणत्वमुपदर्शितम् ५२१

व्यतिरेकाभावान्नेश्वरस्य कारणत्वमित्युपदर्शितम् ५२२-२३

सर्वदा सर्वकार्यजननप्रसङ्ग ईश्वरकर्तृवादे दर्शितः ५२४

सहकार्यन्तरापेक्षयेश्वरस्य कर्तृत्वमित्यस्य खण्डनम् ५२५-३०

प्रयोजनाभावादीश्वरस्य प्रपञ्चकरणप्रवृत्त्यनुपपत्त्युपदर्शनम्

कारुण्यक्रीडादित ईश्वरप्रवृत्तेरपाकरणम् (५३१) ५३२-३३

धर्माद्यपेक्षयेश्वरस्य विचित्रसृष्टौ स्वातन्त्र्यहानिः
स्वातन्त्र्येवासुखिमात्रसर्जनमित्युपदर्शितम् ५३४-३५

स्वसन्ततौ पापं मोत्पादयतु ज्ञानमुत्पाद्यैव वा तं विना-

विषयः श्लोकः
शयतु तेनापि कारुण्यमीश्वरे भविष्यतीत्यर्थस्यो-
पदर्शनम् ५३६-३७
दण्डादिकारित्वे ईश्वरस्य नृपसाम्यं पराभिप्रेतं
दृष्टान्तदार्ष्टान्तिकयोर्वैलक्षण्यप्रदर्शनेनापाकृतम् ५३८-४०
ईश्वरस्य धर्माद्यधिष्ठायकत्वापाकरणम् ५४१
क्षेत्रज्ञाधिष्ठायकत्वेनेश्वरसिद्धिराशङ्क्य निराकृता ५४२-४३
धर्म्यसिद्धेरदोषत्वेन विकल्पतो धर्मिसिद्ध्या चेश्वरे
शरीरित्वादिप्रसङ्गस्योपपादनम् ५४५
जैनराद्धान्तेऽपीश्वरस्याभ्युपगतत्वेन तत्खण्डनं कर्तृत्व-
खण्डनपरमित्युपदर्शितम् ५४६
तीर्थङ्करे तीर्थकृत्त्वमुपपादितम् ५४७-४८
कर्मणः पौद्गलिकत्वमुपदर्शितम् ५४९
चार्वाकमतोपवर्णनम् ५५०
तत्र न जीवः स्वर्गादिगामी देहव्यतिरिक्तोऽस्ति न वा
परलोकः न च प्रत्यक्षभिन्नं मानमित्याद्युपदर्शितम् ५५२
भूतस्यैव चैतन्यं सदृष्टान्तमुपवर्णितम् ५५३-५५४
प्रत्यक्षाभावादात्मनोऽसिद्धिरुपदर्शिता ५५५
अहम्प्रतीतेः शरीरविषयकत्वव्यवस्थापनम् ५५६
आत्मनि न लिङ्गन्नापि व्याप्तिग्रहस्तदुपायतर्कादिस-
म्भव इत्यनुमानाभाव आवेदितः ५५७-५६१
गौणत्वतोऽनुमानस्याप्रामाण्यमुपदर्शितम् ५६२-६३ (५६४-६५
सामान्यस्य विशेषस्य तदुभयस्य च साध्यत्वं निराकृतम्
अनुमानस्य सम्भावनात्वस्मृतित्वे दर्शिते ५६६
अनुमितित्वस्यासत्ख्यात्या भानमुपदर्शितम् ५६७
अनुमितित्वस्य मानसत्वव्याप्यत्वं व्यवस्थापितम् ५६८-६९
साङ्कर्यस्याबाधकत्वत आत्मत्वजातेर्देहगतत्वमुप-
पादितम् ५७० (५७१
शरीरस्यात्मत्वे संयोगसन्निकर्षाकल्पनलाघव उपदर्शितः
ज्ञानस्य विभिन्नजातीयकारणप्रभवत्वं वृश्चिकदृष्टान्ते-
नोपपादितम् ५७२-५७३
ज्ञानादेः शरीरधर्मत्वे युक्त्युपदर्शनम् ५७४ (५७५-५७६
बालस्य स्तन्यपाने प्रवृत्तिः स्वभावात्सदृष्टान्तमुपवर्णिता
कार्यकारणभावस्यासत्त्वमुपदर्शितम् ५७७
भूतेषु प्रत्येकं चैतन्यस्यासत्त्वेऽपि तत्समुदायविशेषे

विषयः श्लोकः

सत्त्वमुपपादितम् ५७८-५७९

मृतशरीरे चैतन्याभावे हेतूपदर्शनम् ५८०

आत्मादेः साधकबाधकप्रमाणयोरसत्त्वेऽपि तन्निषेधक-बृहस्पतिसूत्राणामापादनपरतयोपपादनम् ५८१-५८३

चार्वाकमतखण्डनम् ५८४ (५८५-५८६

तत्रानुमानानभ्युपगमे चार्वाकस्य परगताज्ञानादेः परगतस्वर्गाद्यभ्युगमस्य च ज्ञानं दुश्शक्यमिति दर्शितम्

सत्त्वस्य प्रत्यक्षविषयत्वेन व्याप्ताद्यनुमानस्याव्याप्तावात्मनश्च सिद्धिरुपदर्शिता ५८७-५८८

मेयव्यवस्थाया मानेन व्याप्तावनुमानस्याव्याप्तौ शशशृङ्गादेः प्रमेयत्वस्य चापादनम् ५८९ (र्शनम् ५९०-९२

आत्मनः स्वादृष्टेर्निखिलादृष्टेर्वाऽभावोपगमे दोषप्रद-

लोकसिद्धानुमानाभ्युपगमे तद्विशेषात्परलोकाद्यनुमानाऽभ्युपगमोऽपीति दर्शितम्, ५९३

प्रत्यक्षे प्रामाण्याभ्युपगमे तत्साधकतयानुमानाभ्युपगमोऽपीति दर्शितम्, ५९४

आप्तागमस्य प्रामाण्यं व्यवस्थापितम्, ५९५

स्वर्गादिसिद्धिरावेदिता. ५९६

आगमप्रामाण्याभ्युपगमश्चार्वाकस्यावश्यकः ५९७-९८-९९

देहस्य चैतन्यमपाकृतं भूतव्यतिरिक्तत्वादिविकल्पनेन, ६००-६०१

मोदकादेः कथञ्चिद्वद्विगुडाद्यभिन्नत्वं ६०२-६०३

प्रत्येकावृत्तेः समुदायावृत्तित्वं च व्यवस्थाप्य चार्वाकोक्तदृष्टान्तोन्मूलनम् ६०४

प्रत्येकभूतगतायाश्चैतन्यशक्तेरपाकरणम् ६०५-६०६ (६०८)

प्रत्यक्षाभावाच्छशशृङ्गवदात्मा नास्तीत्यस्य खण्डनम् ६०७-

परात्मनि स्वात्मनि च मानमुपदर्शितम् ६०९

अहमिति प्रतीतेर्न शरीरविषयत्वं किन्त्वात्मविषयत्वमित्युपपादितम् ६१०-१३

व्याप्तिग्रहः परेणापि स्वीकरणीयो न चानुमानमन्तराव्यभिचारशङ्कापीति दर्शितम् ६१४-१५

अन्यथानुपपन्नतामात्रस्य सद्धेतुलक्षणस्य सतर्कस्य न चार्वाकशङ्काभीतिरिति दर्शितम् ६१६-६१७

प्रत्योदितो न व्याप्तिग्रहः किन्तूहप्रमाणादिति

विषया: श्लोक.

दर्शितम् ६१८-१९ (निष्टङ्कितम् ६१९-२०

शब्दवृत्तेर्गौणत्वेऽप्यबाधितत्वादनुमानस्य प्रामाण्यं

पक्षधर्मताया अनुमित्यनङ्गत्वेन पक्षप्रयोगस्य गौणत्वा-
द्विकल्पनमनवसरोपहतमेवेति दर्शितम् ६२१

पक्षधर्मताया अनुमित्यनङ्गत्वं व्यवस्थापितम् ६२२-२६

सामान्यविशेषोभयात्मकस्य साध्यत्वेन न चार्वाकदो-
षावकाश इति दर्शितम् ६२७ (दर्शिता ६२८-६३१

अनुमितेः सम्भावनात्वे तत्र संवादाभिमानात्प्रामाण्या-
भिमानस्यासम्भवः प्रदर्शितोऽनुमितेरावश्यकता च(६३२

सम्भावनायां प्रमात्वस्य स्वसंविदितत्वासम्भवः प्रदर्शितः

सामान्यस्य सत्त्वं व्यवस्थाप्य तद्विषयत्वेनानुमानस्य
प्रामाण्यं दर्शितम ६३३

चार्वाकमते संशयात्मिकाया: सम्भावनाया उत्पत्त्यस-
म्भवे उत्पादित: ६३४-६३५

अनुमितेः स्मृतित्वमपाकृतम् ६३६

असत्ख्यातिं निरस्यानुमितित्वस्य तदुपनीतत्वं निरा-
कृतं प्रत्यक्षत्वस्यासत्त्वमापादितञ्च ६३७-६३९

सविकल्पस्याप्रमात्वे प्रत्यक्षत्वस्यासिद्धिरुपदर्शिता ६४०

अनुमितित्वस्य मानसत्वव्याप्यत्वमपाकृतम् ६४१-६४५

आत्मवादे देहगतत्वे चाक्षुषत्वप्रसञ्जनम् ६४६

आत्मत्वस्य देहगतत्वे संयोगसन्निकर्षाकल्पनलाघवस्य
स्वमतेन न्यायमतेन च खण्डनम् ६४७-४९

वृश्चिकदृष्टान्तेन ज्ञानस्य विजातीयहेतुभवत्वेऽप्येकजा-
त्यमित्यस्य खण्डनम् ६५०-६५१ (६५२-६५४

अभ्यासस्यैवैकस्य ज्ञानसामान्ये हेतुत्वं व्यवस्थापितम्

देहवृद्ध्या नियमेन चैतन्यवृद्धेर्देहविकाराच्चैतन्यधिका-
रस्य च खण्डनम् ६५५-६५७

देहस्य चैतन्ये स्मृत्यनुपपत्तिरुपपादिता ६५८-६५९

कार्मणशरीरसिद्धिरुपदर्शिता ६६०-६६१

बालस्य स्तन्यपाने प्रवृत्तिः पूर्वभवसंस्काराधीनैव न तु
स्वभावादित्युपपादितम् ६६२-६६७

कार्यकारणभावव्यवस्थापनम् ६६८-६७०

त्रित्वादिदृष्टान्तेन प्रत्येकावृत्तेरपि चैतन्यस्य भूतसमु-
मुदायवृत्तित्वमित्यस्य खण्डनम् ६७१-६७५

विषयः	श्लोकः
देहे चैतन्यस्य व्यासवृत्त्यतित्यादिविकल्पनेन खण्डनम्	६७६
मृतशरीरे प्राणाभावाच्चैतन्याभाव इत्यस्य खण्डनम्	६७७-७८
मृतशरीरे चार्वाकमते चैतन्यापत्तेर्दृढीकरणम्	६७९-८२
व्याप्तिं विना प्रसङ्गस्यापि न प्रवृत्तिरिति दर्शितम्	६८३
साङ्ख्यमतप्रदर्शनम्	६८४
तत्र प्रकृतिस्वरूपोपवर्णनम्	६८५
बुद्धेर्महत्तत्त्वस्य स्वरूपोपवर्णनम्	६८६-६८७
ज्ञानस्य प्रमायाश्च स्वरूपोपदर्शनम्	६८८
बुद्धिपुरुषयोरन्योन्यस्मिन्प्रतिबिम्बनतश्चैतन्यकर्तृत्वयोरुपदर्शनम् ६८९ (भोक्तृत्वादयश्चोपदर्शिताः	६९०
पङ्ग्वन्धन्यायेन कार्यार्थं बुद्धिपुरुषयोरन्योन्यापेक्षापुरुष	
पुरुषस्य न संसरापवर्गौ किन्तु प्रकृतेरेवेति दर्शितम्	६९१
पञ्चविंशतितत्त्वानि कपिलसम्मतान्युपदर्शितानि	६९२-९५
पञ्चविंशतितत्त्वज्ञानस्य मुक्तिः फलतयोपवर्णिता	६९६
साङ्ख्यमत खण्डनम्	६९७
तत्र सत्कार्यवादस्य खण्डनम्	६९८
साङ्ख्यनामसत्कार्यवादनिराक्रिया न स्याद्वादे किन्तु न्यायमत एवेति दर्शितम्	६९९
घटादीनां सत्त्वगुणादितृतयात्मत्वस्यापाकरणम्	७००-७०१
सुखाद्यात्मकस्य बाह्यस्य बुद्धौ प्रतिविनम्बनतः साताऽदिनियतपरिणामस्यापाकरणम	७०२-३
स्वतुल्यबहिरर्थगुणव्यपेक्षाबुद्धेः सातादिनियतपरिणतिरित्यस्य खण्डनम् ७०४-६ (परिणामोपपादनस्य खण्डनम्	७०७
बाह्यस्य स्वद्रष्टृपुरुषभेदाद् भेदमुपगम्य सातादिनियतबुद्धौ वैचित्र्यतः सातादिनियतपरिणामसम्भवाद्बाह्यस्य सुखाद्यात्मकत्वोपगमो न कार्यं इति दर्शितम्	७०८-१०
आत्मन एव कर्तृत्वादिकं नतु प्रकृत्यादिकल्पनेन कृत्यमिति दर्शितम्	७११
आत्मनि दुःखाद्यसम्भव आशङ्क्य परिहृतः	७१२-१४
सत्या अपि बुद्धेर्यथा न मुक्तौ कार्ययोगस्तथा स्वाभाविकस्यापि दुःखादेर्न मुक्तौ सम्भव इति प्रतिपादितम् ७१५-१६) अत्र ७१७ एतदङ्कस्थाने ७१८ एतदङ्कविन्यासो मुद्रणदोषादेकमग्रेऽपि	
कार्मणस्यैव भङ्ग्यन्तरेण लिङ्गतयाऽभ्युपगमनं लिङ्गकार्म-	

विषयः श्लोकः
उत्पादव्ययध्रौव्यरूपसत्त्वस्यैव प्रकृतिरिति परिभाषेति
दर्शितम् ७२० (दर्शितम् ७२१
वृतिक्रमोऽपि साङ्ख्यस्यावग्रहादिमतिक्रमान्नान्य इत्युप-
बुद्धिपुरुषयोर्बिम्बप्रतिबिम्बभावस्य खण्डनम् ७२५
प्रकृतेरेव मोक्षे पुरुष एक एव कल्प्यो न बहवः पुरुषा
इत्युपपादितम् ७२६-२७
मुक्तावात्मनो जडत्वमापादितम् ७२८ (खण्डनम् ७२९-३३
सङ्घातपरार्थत्वेन साङ्ख्याभिप्रेतस्यात्मसाधनस्य
पङ्ग्वन्धन्यायेन पुरुषप्रकृत्योः कार्ये प्रवृत्तिरित्यस्य ख-
कूटस्थे भोक्तृत्वाद्यसम्भव उपदर्शितः ७३६ (ण्डनम् ७३५
आत्मनि साक्षित्वाद्यनेकधर्माभ्युपगमे स्याद्वाद आयात
इति दर्शितम् ७३७ (ईश्वरखण्डनमसङ्गतमित्युपपादितम् ७३९
पुरुषतः किञ्चित्फलाप्राप्तेः प्रकृतेः प्रवृत्त्यनुपपत्तिरन्यथे-
न्यायप्रक्रियामाश्रित्येश्वरखण्डने प्रकृतेः प्रवृत्त्यभाव
उपदर्शितः ७४० (खण्डनम् ७४१
वत्सवृद्ध्यर्थक्षीरप्रवृत्तिदृष्टान्तेन प्रकृतिप्रवृत्त्युपपादनस्य
प्रकृतिगते बन्धमुक्तीभ्रान्त्या पुरुषः स्वस्मिन्नभिमनुत
इत्यस्यापाकरणम् ७४२-७४३
बुद्धिगतभ्रान्त्या पुरुषस्य बन्धादेरपाकरणम् ७४४-४६
दृष्टा मयेत्युपेक्षक इत्यादेरीश्वरकृष्णप्ररूपणस्यापाकरणम
मुक्तात्मनः प्रति प्रकृतेः सृष्टिप्रसञ्जनम् ७४९ (७४७-४८
मुक्तौ बुद्ध्यभावान्न सृष्टिरित्यस्यापाकरणम् ७५०-५१
बुद्धेर्नाशस्थानाभिषिक्तस्य तिरोभावस्य सदातनत्वेऽसदा-
तनत्वे च दोष उपदर्शितः ७५२-५३
बुद्धितिरोभावस्य तिरोभावाभ्युपगमे दोष उपदर्शितः ७५५
बुद्धितिरोभावस्योत्पादाभ्युपगमे दोषोपदर्शनम् ७५६
बुद्धितिरोभावस्योत्पादस्य प्राकट्य रूपस्य सर्वदा प्रक-
टत्वेऽप्रकटत्वे च दोषोपदर्शनम् ७५७
उक्तप्राकट्यगतप्राकट्यस्य सर्वदाऽऽविर्भावात्मना परिणतौ
कदाचित्तथात्वे च दोष उपदर्शितः ७५९-७६१
बुद्धिविनाशस्य तिरोभावात्मकस्योत्पादानभ्युपगमे दोष
उपदर्शितः ७६२-७६४
तत्त्वे पञ्चविंशतिमितत्वस्य खण्डनम् ७६५ (प्रदर्शनम् ७६६
सत्त्वादिगुणत्रयस्य प्रत्येकं प्रधानत्वे तत्त्वद्वयस्याधिक्स्य

विषयः श्लोकः
सत्त्वादेस्समुदितस्य प्रधानत्वेऽपि समुदायत्वेनैव तत्त्वता
प्रत्येकशस्तद्भावेऽपि कार्याजनकत्वतो न तथा विवक्षेति
विकल्प्य खण्डनम् विस्तरतः ७६७-७७६
सत्त्वादित्रिकस्य निखिलवस्त्वनुगन्तृत्वादियोगत एकतत्त्व-
त्वस्याविचारितरमणीयत्वमुपदर्शितम् ७७७ (७७८-७७९
सत्तास्वरूपं तत्तन्मतेनोपदर्श्य तस्य तत्त्वान्तरत्वमापादितम्
ज्ञानादीनां तत्त्वान्तरत्वमावश्यकमिति दर्शितम् ७८०
ज्ञानादीनां बुद्धितादात्म्याद्बुद्धावन्तर्भावे बुद्ध्यादीनां
प्रकृतावन्तर्भाव आपादितः ७८१
धर्मिमात्रस्य तत्त्वता विकल्प्य दूषिता ७८२-८३
मोक्षोपयोगिमात्रस्य तत्त्वतेत्यस्यापाकरणम् ७८५-८६
प्रमाणस्य पृथक्तत्त्वता प्रसञ्जिता ७८७
सामान्यस्य तत्त्वान्तरत्वप्रसञ्जनम् ७८८-९१
आविर्भाव तिरोभावयोस्तत्वान्तरत्वप्रसञ्जनम् ७९२-९३
आविर्भावतिरोभावयोः कार्यात्मकत्वमपहस्तितम् ७९४ ९८
आविर्भावतिरोभावयोः कारणात्मकत्वे दोषोपदर्शनम्
साङ्ख्यमतखण्डनयुक्त्या पातञ्जलदर्शनस्यापि खण्डनमिति
दर्शितम् ८०८-९ (धाम्न सम्भवतीति प्रश्नः ८१० १२
जैनाभ्युपगतं प्रमात्रा सह ज्ञानस्य कथञ्चित्तादात्म्यं विरो-
जैनस्य विरोधभीत्यभावे वेदान्तियोगाचारमाध्यमिकसौत्रा-
न्तिकमताश्रयणप्रसञ्जनम् ८१३-१५
तार्किकाभ्युपगतमुक्त्यभ्युपगमप्रसञ्जनम् ८१६
जैनस्य चार्वाकमताभ्युपगमापादनम् ८१७
जैनस्य विरोधभीत्यभावे मुक्तौ बन्धत्वस्य केवलज्ञाने भ्रम-
त्वस्य नये प्रमाणत्वस्य तीर्थङ्करे रागस्य सिद्धेऽसिद्धत्वस्य
बद्धे मुक्तत्वस्य दुष्टेऽदुष्टत्वस्य च प्रसञ्जनम् ८१८-२१
माने संशयत्वस्यानवस्थादावदोषत्वस्यचापादनम् ८२२-२३
परमतखण्डकदोषस्य तद्व्यवस्थापकत्वस्य स्वपक्षस्थापक-
गुणस्य स्वपक्षखण्डकत्वस्य च प्रसञ्जनम् ८२४-२५
स्याद्वादे एकान्तवादत्वस्य जये पराजयत्वस्य च प्रसञ्जनम्
जैनमते विरोधापादनादिदोषाणां खण्डनात्मकं जैनस्य
प्रतिविधानम् ८२८ (८२६-२७) (८२९
तत्र दोषा अपि स्याद्वादानभ्युपगमेन सिद्ध्यन्तीति दर्शितम्
केवलस्यासामानाधिकरण्यस्य विरोधलक्षणत्वे दोषोपद-

विषयः श्लोकः
र्शनम् ८३० (इति दर्शितः ८३१
देशकालाद्यवच्छेदकगर्भस्य विरोधत्वे तु नोक्तदोषावकाश
धर्मस्य विरोधलक्षणे प्रवेशो नैयायिकस्यापीष्ट इत्यु-
पपादितम् ८३२-३४ (८३५
अभेदे आधाराधेयभावो वैशेषिकस्यापीष्ट इति दर्शितम्
भेदस्याव्याप्यवृत्तित्वमभ्युपगच्छता शिरोमणिना भेदाभेद-
विरोधलक्षणे व्यवच्छेदकप्रवेश आश्रयणीयइत्युपदर्श्य
ततो भेदविरोधलक्षणे नावच्छेदकप्रवेश इत्यस्य
खण्डनम् ८३६-३९
लक्षणभेदो यथालक्ष्यभेदात्तथानयप्रमाणविभेदतोऽपीति
विरोधलक्षणेऽवच्छेदकप्रवेशो नयान्माऽस्तु प्रमाणात्तु-
स्या देवेति दर्शितम् ८४०-४१
भेदस्वरूपे एकान्तस्याद्वादयोर्विशेष उपदर्शितः ८४२
भिन्नाश्रितत्वलक्षणविरोधशालिधर्मद्वयाध्यासाद्धर्मिभेद-
साधनेऽन्योन्याश्रयदोषप्रदर्शनम् ८४३
आधारभेदमननमन्तरैव विरोधसिद्धौ न ततो धर्मिभेद-
सिद्धिरिति दर्शितम् ८४४ (८४५
बौद्धखण्डनायोक्तप्रकारस्य नैयायिकाश्रयणीयत्वं दर्शितम्
न्यायमते कालभेदेनैकत्र परिमाणद्वयापत्तिर्बौद्धोक्ता
दर्शिता ८४६ (पाकृतम् ८४७-५०
तत्र परिमाणस्याश्रयनाशैकनाश्यत्व न्यायाभिमतम-
आश्रयाविनाशेऽप्यवगाहनाविशेषबलात्पूर्वपरिमाणस्यो-
त्तरपरिमाणरूपतया परिणमनं सदृष्टान्तमुपपादितम्
अनवयवसंयोगतो न परिमाणभेद इति न्याय- (८५१-५३
मतस्यापाकरणम ८५४-५५(सर्वथा विनाश इत्युपपादितम
रक्तादीनामपि पाकेन रक्ततरादिभावेन परिणमनमेव न
कथञ्चिद्भेदाभेदाभ्युपगम एव नैयायिकस्य बौद्धोक्तदो-
षान्मुक्तिरिति दर्शितम् ८५८ (८५६-५७
स्याद्वादप्रभावोपवर्णनम ८५९
स्याद्वादस्य सकलागमवैशिष्ट्याद्युपवर्णनम ८६०
वेदान्त्यादीनामेकान्तत्वाग्रहनिवृत्तौ स्याद्वादिमित्रत्वमुप-
दर्शितम् ८६१ (दर्शितम् ८६२
सङ्ग्रहनयाभ्युपगन्तृत्वेन स्याद्वादिनो वेदान्तिमैत्र्यमुप-
स्याद्वादिनो योगाचारेण माध्यमिकेन सौत्रान्तिकेन च

विषयः श्लोकः

सख्यमुपपादितम् ८६३-६५
नैयायिकस्य स्वमित्रत्वमुपदर्शितम् ८६६
व्यवहारनयाभ्युपगन्तृत्वेन चार्वाकसख्यमुपदर्शितम् ८६७
स्याद्वादिन एकस्मिन्ननन्तधर्मोपगमो नियन्तावच्छेद-
कापेक्षयैवेति दर्शितम् ८६८
मुक्तेः कथञ्चिद्बन्धत्व प्रमाया भ्रमत्वं तीर्थङ्करस्यापि
पूर्वावस्थामाश्रित्य भ्रान्तत्वमिति दर्शितम् ८६९-७१
स्याद्वादतानालिङ्गने देशेन देशदलनं नतु स्याद्वादताया
मिति दर्शितम् ८७२
स्याद्वादे रागादीनां विरुद्धगुणानन्वितत्वमुपदर्शितम् ८८३
स्याद्वादिसम्मतप्रमाणस्य परापादितस्य संशयत्वस्यापा-
करणं विरोधाभानोपपादनेन ८७४ ७६
अव्याप्यवृत्तित्वज्ञानस्य विरोधभावप्रतिबन्धकत्वमुप-
पादितम् ८७७-७८
रत्नकोशकारमताश्रयणेन शब्दादितः संशयस्य सम्भवेऽपि
न स्याद्वादवाक्यात्तत्सम्भव इति दर्शितम् ८७९-८१
प्रमाणे ऽनेकप्रकारता निरूपिताया एकस्याविशेष्यताया
अभावादपि न संशयत्वमिति दर्शितम् ८८२
अनवस्थादिदोषाणां स्याद्वादतत्त्वे दोषत्वाभावेऽपि
एकान्तनत्त्वे दोषत्वमेवेति दर्शितम् ८८३
अनवस्थादिदोषाणा नयेष्वेकान्तताया उन्मूलनतो
व्यवस्थापकत्वमपीति दर्शितम् ८८४ (दर्शितम् ८८५-८६
हेतूनामपि यदा यस्य प्राधान्येन स्थापकत्वं तदैव न
तस्य गुणतस्यदिति खण्डकत्वं स्याद्वादिनोऽनुगुणमेवेति
एकावच्छेदेन विरुद्धधर्मघटनैकत्र न स्याद्वादिनोऽभिमतेति
भिन्नावच्छेदेनैकम्प्रति साधकत्वबाधकत्वेऽभिमते
एवैकस्येति दर्शितम् ८८७-८८
स्याद्वादे नयाश्रयणेन स्याद्वाद उपदर्शितः ८८९ (तम् ८९०
वादे एकान्तवादिनो जयाभावो न स्याद्वादिन इति दर्शि-
विरोधाभावेन प्रमाणस्य प्रमातृस्वरूपत्वं प्रमारूपत्वं च
नयभेदेन निगमितम् ८९१ (८९२-९३
एकस्मिन्ज्ञाने प्रमात्वप्रमाणत्वप्रमातृत्वान्युपपादितानि
नयस्य प्रमाणाद्भेदे युक्तिरुपदर्शिता ८९४

विषयः श्लोकः

नये प्रमाणलक्षणातिव्याप्तेरुद्धरणम् ८९५ (८९६-९७
केवलज्ञानस्यैव मुख्यतः प्रमाणत्वं प्रमातृत्वञ्चेति दर्शितम्
मत्यादीनां गुणतः प्रमात्वं प्रथममुपदर्श्य मुख्यतः
प्रमात्वमुपपादितम् ८९८-९००
प्रमायां भेदांशगोचरत्वेन नयत्वमपीति दर्शितम् ९०१
मानस्य नयसमूहत्वोक्तेराशय उपदर्शिता ९०२-३
मानयदुर्नयवचनानामुपदर्शनम् ९०४
चार्वाकबौद्धवैशेषिकादीनां प्रत्यक्षाद्येकद्वित्र्यादिप्रमाणा-
भ्युपगमप्रकार उपदर्शितः ९०५-६ (दर्शितम् ९०७
जैनमते प्रत्यक्षपरोक्षभेदेन प्रमाणद्वैविध्यं प्रत्यक्षलक्षणञ्च
सांव्यवहारिकपारमार्थिकाभ्यां प्रत्यक्षद्वैविध्यमुपदर्शितम्९०८
पारमार्थिकस्य सकलविकलभेदेन द्वैविध्यं केवलज्ञानं
सकलमिति च दर्शितम् ९०९ (र्शितम् ९१०-११
केवलस्य ज्ञानदर्शनाभ्यां द्वैविध्यं तदुत्पत्त्यादि च द-
ज्ञानदर्शनयोर्यौगपद्यं क्रमोत्पत्त्वं यौगपद्यञ्च मल्लवादिजिन-
भद्रगणिक्षमाश्रमणसिद्धसेनदिवाकरमतभेदेन दर्शितम्
तत्र यौगपद्याभ्युपगन्तुर्मल्लवादिन आशय उपवर्णितः९१४-१८
जिनभद्रगणिक्षमाश्रमणमतं तद्भाष्यादितोऽवसेयमिति
दर्शितम् ९१९
ऐक्याभ्युपगन्तुर्सिद्धसेनदिवाकरस्य मतमुपपादितम्९२०-२३
विकलपारमार्थिकप्रत्यक्षनिरूपणम् ९२४
तत्र अवधिज्ञाननिरूपणम् ९२५
तस्य भवप्रत्ययत्वं गुणप्रत्ययत्वं चोपदर्शितम् ९२६
तत्र छायातमः प्रभृतीनां पौद्गलिकत्वमुपदर्शितम् ९२७-२८
रूपादीनां चतुर्णां पुद्गलमात्रे सत्त्वं व्यवस्थापितम् ९२९
पृथिव्यादिपरमाणुभ्य: पुद्गलैकजातीयेभ्यो शक्तिप्रभावाद्भू-
म्यादिविचित्रकार्यजनिरुपपादिता ९३०-३१
शक्तिविचारः ९३२
तत्र मीमांसकस्य शक्त्यभ्युपगमप्रकार उपदर्शितः ९३३
शक्त्यनभ्युपगन्तुर्नैयायिकस्य मतमुपवर्णितम् ९३४३५-
एकान्तवादिनो मीमांसकस्यातिरिक्तशक्तिपक्षे गौरव-
मुपदर्शितम् ९३६ (र्शितम् ९३७-३८
न्यायमते तृणादिजन्येषु वह्निषु वैजात्यकल्पनमुपदर्श्य
शक्त्यभ्युपगन्तृमीमांसकमते तदकल्पनलाघवमुपद-

विषयः — श्लोकः

शक्तिपक्षे सहकारिनियमानुपपत्तितो वैजात्यकल्पनस्य
ज्यायस्त्वमिति न्यायमतं दर्शितम् १३९

कारणतायास्सावच्छिन्नत्वमुपपाद्य शक्तेस्तदवच्छेदकत्वं
नान्योन्याश्रयादिति न्यायमतमावेदितम् १४०-१४२

मीमांसकाभिमताया शक्तेस्स्वतस्स्वाश्रयकारणकलापा
तदन्यस्माद्वोत्पत्तिरिति विकल्पस्य न्यायनयेन खण्डनम्
तस्य च वेदान्तमतेऽप्यतिदेशः १४३-४७

न्यायोक्तशक्तिखण्डकदोषाणां न जैनाभ्युपगतशक्तौ स्वरूप-
सहकारिरूपायामवकाश इति दर्शितम् १४८

शक्तेः कारणतारूपत्वं स्वरूपशक्तेः स्वरूपं च दर्शितम् १४९

सहकारिशक्तिनिरूपणम् १५०

उक्तशक्त्योर्वचनान्तरेण परस्याप्युपगम इति दर्शितम् १५१

प्रतिबन्धकगतायाः शक्तेः स्वरूपसहकारिभ्यां तद्द्वैवि-
ध्यस्य च प्रदर्शनम् १५२-५३

मण्यादिसमवधानाद्वह्नौ दाहानुकूलशक्तेर्नाशः
तदनुकूलशक्तिबलाच्च पुनस्तदुद्भव इति
दर्शितम् १५४ (हेतुरुपदर्शितः १५५

मण्याद्यभावे दाहानुकूलशक्तेरुद्भवेऽपि न दाह इत्यत्र
उत्तेजकरहितस्य मणेः शक्तिनाशकत्वं दर्शितम १५६

शक्तिरूपाकारणताया नावच्छेदकापेक्षेति दर्शितम् १५७

हेतुत्वस्य शक्त्यतिरिक्तस्य नैयायिकाद्यभिप्रेतस्य खण्डनम्

जैनशक्तिवादे न वह्नौ वैजात्यकल्पनं न वा मीमांसक-
मताविशेष इति दर्शितम् १६३

शक्तिरूपहेतुत्वग्रहोपायप्रदर्शनम् १६४

कारणतावच्छेदकतया पराभिप्रेतानां तद्व्यञ्जकत्वं दर्शितम्

तृणादीनामन्वयमात्रादेव जनकत्वमिति व्यवस्थाप्य तस्य
जैनं प्रत्यनुगुणत्वं मीमांसकम्प्रति दोषत्वं च दर्शितम्

पूर्वप्रदर्शितान्योन्याश्रयादिदोषोऽपि न जैनमते इत्युप-
दिष्टम् १६९ (१३६-६८) (खण्डनम् १७०-७२

नैयायिकाभ्युपगतस्य वह्नेर्वह्नित्वेन दाहं प्रति कारणत्वस्य

नैयायिकसम्मतस्य प्रतिबन्धकाभावकारणत्वस्योन्मूलनम्

तत्रैकप्रतिबन्धककालेऽप्यन्यप्रतिबन्धकाभावाद् दाह
आपादितः १७५-७६ (१७३-७४) (१७७-८२

प्रतिबन्धकाभावानां कूटत्वेन कारणत्वमाशङ्क्य प्रतिक्षिप्तम्

विषयः श्लोकः

प्रतिबन्धकाभावीयप्रतियोगितायां सम्बन्धावच्छिन्नत्वप्रवेशात्प्रवेशयोर्दोषोपदर्शनम् ९८३-८७

प्रतिबन्धकाभावीयप्रतियोगितायां धर्मावच्छिन्नत्वनिवेशस्यावश्यकत्वमुपदर्श्य प्रतिबन्धकध्वंसप्रागभावयोरजनकत्वप्रसञ्जनम् ९८८-९८९ (वतीति दर्शितम् ९९०

प्राचीनमते प्रतिबन्धकात्यन्याभावस्य कारणत्वं न सम्भ-

नव्यमतेऽपि प्रतिबन्धकात्यन्ताभावस्य कारणत्वं दूषितम्

मणिकाले मण्यभावस्य संसर्गाभावान्न हापत्ति- (९९१-९३

रिति न्यायमतमाशङ्क्य खण्डितम् स्वरूपसम्बन्धखण्डनेन ९९४-९८ (न वस्तुत इति दर्शितम् ९९९-१०००

नैयायिकसम्मतस्य प्रतिबन्धकाभावस्यात्यन्ताभावत्वमपि

प्रतिबन्धकविशेषण उत्तेजकाभावे उक्तदोषा अतिदिष्टाः

प्रतिबन्धकाभावानामुत्तेजकानाञ्च पृथगेव कारणत्वमित्याशङ्क्य निराकृतम् १००२-३

सहकारिशक्तिरेव पराभ्युपगताधेयशक्तिः शब्देऽपि चार्थबोधफलिका शक्तिरिति दर्शितम् १००४

नैयायिकस्य शक्तिखण्डनाशक्तत्वस्यावधिज्ञाने रूपिमात्रविषयकत्वस्य च निगमनम् १००५

मनःपर्यवज्ञाननिरूपणम् १००६-८

व्यावहारिकप्रत्यक्षस्येन्द्रियजानिन्द्रियजभेदेन द्वैविध्यं प्ररूपितम् १००९

इन्द्रियजानिन्द्रियजप्रत्यक्षयोरुपवर्णनम् १०१० (दर्शितम् १०११

नयनमनसोरप्राप्यकारित्वं श्रोत्रादीनां प्राप्यकारित्वञ्च

मनसो महत्त्वेऽपि ज्ञानक्रम उपपादितः १०१२

इन्द्रियजानिन्द्रियजप्रत्यक्षयोरेकैकशोऽवग्रहादि चतुर्विधत्वमवग्रहस्वरूपञ्च दर्शितम् १०१३

अवग्रहपूर्ववर्तिनि दर्शने नवीनस्यासम्मतिरुपदर्शिता १०१४

व्यञ्जनावग्रहस्य नयनमनसो स्तदभावस्य च प्रदर्शनम् १०१५

ईहावायधारणानां निरूपणम् १०१६-१७

अवग्रहादीनां स्वावरणक्षयोपशमविशेषक्रमात्क्रमः पूर्वपूर्वस्य कारणत्वाच्चेति दर्शितम् १०१८

अवग्रहादिक्रमस्योट्टङ्कनम् १०१९

तेषां क्वचित्क्रमानुपलक्षणे बीजमुपदर्शितम् १०२०

परोक्षप्रमाणस्य पञ्चविधत्वं तत्राद्यस्य स्मृतिप्रमाणस्य

विषयः श्लोकः

कारणविषयाकारैर्निरूपणम् १०२१

स्मृतेः प्रामाण्यव्यवस्थापनम् १०२२-२४ (वर्णितम् १०२५

मीमांसकोक्ताज्ञातगोचरमतित्वस्य प्रमाणालक्षणत्वमुप-

स्मृतेः प्रामाणान्तरतो विविक्तं फलं दर्शितम् १०२६

प्रत्यभिज्ञाप्रमाणनिरूपणम् १०२७

उपमानस्य प्रत्यभिज्ञायामन्तर्भाव उपवर्णितः १०२८

तस्मादयं विशदृश इत्यादीनां प्रत्यभिज्ञात्वमुपदर्शितम् २९

सुरभिचन्दनमिति ज्ञानस्य परोक्षे प्रत्यभिज्ञानेऽन्तर्भावेन ज्ञानलक्षणप्रत्यासत्ति खण्डनम् १०३०

सुरभिचन्दनमिति बोधस्य प्रत्यक्षपरोक्षभयरूपत्वमभ्युपगच्छतो वेदान्तिनोऽपाकरणम् १०३१ ३३

प्रत्यभिज्ञायाः प्रामाण्यमनभ्युपगच्छतो बौद्धस्य मतं निरा-

तर्कप्रमाणनिरूपणम् तस्य व्याप्तिशब्दार्थ- (कृतम् १०३४-४०

सम्बन्धकार्यकारणभावाद्यवबोधकत्वं दर्शितम् १०४१-४२

अनेन गतार्थत्वात्सामान्यलक्षणसन्निकर्षस्यानुपगमः तर्कप्रमाणानभ्युपगन्तुर्बौद्धस्य खण्डनम् १०४३-४७

अनुमानस्य लक्षणम् तस्य स्वार्थपरार्थभेदेन द्वैविध्यमुपवर्णितम् १०४८

लिङ्गस्यान्यथानुपपत्तिरेकैव लक्षणमिति दर्शितम् १०४९

साध्यपक्षयोर्लक्षणमुपदर्शितम् १ ५०

परामर्शस्यानुमितिहेतुत्वं नैयायिकसम्मतं निराकृतम् १०५१

विकल्पात्प्रमाणात्तदुभयाद्वा धर्मिप्रसिद्धिरिति धर्म्यप्रसिद्धेर्दोषतया पराभिप्रेताया अपाकरणम् १०५२

न्यायावयवानां प्रतिज्ञादीनां क्वचित्सामस्त्येन क्वचिदन्यथाप्युपदर्शनं वादे इति सोपपत्तिकमुपदर्श्य बौद्धादीनामपाकरणम् १०५३ ५५

लिङ्गाद्यवयववाक्यस्य परार्थानुमानत्ववत् वाक्यविशेषादेः परार्थप्रत्यक्षत्वादिकं सदृष्टान्तमुपदर्शितम् १०५६-५८

वस्त्वंशयोः सदसतोर्विधिनिषेधानुमापकस्योपलब्ध्यनुपलब्धिभेदेन लिङ्गस्य द्वैविध्यमुपदर्शितम् १०५९

अभावे वस्तुगतासदंशत्वोक्तिता नैयायिकाभिमतस्य भावातिरिक्तत्वस्य खण्डनमावेदितम् १०६०

अभावस्य चतुर्विधत्वोपदर्शनं प्रागभावनिरूपणं च १०६१

ध्वंसनिरूपणम् १०६२

विषयः	श्लोकः
भेदनिरूपणम्	१०६४
अत्यन्ताभावनिरूपणम्	१०६५
संयोगेन घटादिनिषेधप्रतीतेर्विषयविवेचनम्	१०६६
उपलब्ध्यात्मकहेतोर्द्वैविध्यं तत्र विधिसाधकस्याविरुद्धोपलब्धेः षड्विधत्वञ्च दर्शितम्	१०७१
विधिसाधकस्य हेतोः कार्यस्वभावाभ्यां द्वैविध्यमेवेति बौद्धमतस्य खण्डनम्	१०७२
तत्र कारणस्य कार्यानुमितौ हेतुत्वमुपपादितम्	१०७३
कार्यव्याप्ययोर्हेतुत्वमुपपादितम्	१०७४
पूर्वोत्तरचरयोर्हेतुत्वमुपपादितम्	१०७५
सहचरस्य हेतुत्वं व्यवस्थापितम् १०७६ (दिष्टम्	१०७७
विरुद्धोपलब्धेः सप्तविधत्वं निषेधसाधकत्वं बौद्धाभ्युपगतस्यानुपलब्धिमात्रेऽभावसाधकत्वस्य खण्डनं चोपसाक्षान्निषेध्यविरुद्धस्य निषेधहेतुत्वमुपपादितम्	१०७८
निषेध्यविरुद्धजनकादयो हेतवोऽतिदेशेन प्रतिपादिताः अनुपलब्धिरूपहेतोर्द्वैविध्यं दर्शितञ्च	१०७९
अविरुद्धानुपलब्धेर्निषेधसाधकत्वं विरुद्धानुपलब्धेर्विधिसाधकत्वञ्च दर्शितम्	११८०
अविरुद्धानुपलब्धेस्सप्तप्रकारत्वं विरुद्धानुपलब्धेः पञ्चप्रकारत्वञ्च दर्शितम्	१०८१-८३
आगमप्रमाणनिरूपणम्	१०८४
शब्दे प्रमाणवचनं गौणवृत्त्येति दर्शितम्	१०८५
आप्तस्य लक्षणं तदुक्तस्यैव प्रामाणयमिति दर्शितम्	१०८६
आप्तो लौकिकालौकिकभेदेन द्विविधः प्ररूपितः	१०८७
शब्दस्य पौद्गलिकत्वं नतु नैयायिकाभिमतं गुणत्वमिति प्रतिपादितम्	१०८८
निःस्पर्शत्वनिबिडदेशप्रवेशित्वपूर्वोत्तरावयवानुपलम्भसूक्ष्ममूर्त्ताप्रेरकत्वैः शब्दस्य पौद्गलिकत्वाभावसाधनं नैयायिकस्य खण्डितम् १०८९-९३ (प्रतिक्षिप्तम्	१०९४
आकाशगुणत्वेन शब्दे पौद्गलिकत्वाभावसाधनमपि परस्य बाह्येन्द्रियग्राह्यत्वेन शब्दे पौद्गलिकत्वं साधितम्	१०९५
शब्दस्यार्थे स्वाभाविकशक्तिप्रदर्शनम् सङ्केतमात्रेणाणार्थप्रकाशकत्वं शब्दे पराभिप्रेतमपाकृतम्	१०९६-९८
स्वाभाविकशक्तिपक्षे वाच्यवाचकभावव्यवस्था शक्तिद्वया-	

विषयः श्लोकः

त्मना शब्दार्थहेतुतस्तस्याजननञ्च १०९९

शक्तेस्सर्वार्थगतत्वेऽपि पटादिशब्दानां नियतार्थबोध-
कत्वं नियतसमयापेक्षयेति दर्शितम् ११००-१

सामान्यविशेषोभयात्मकवस्तुनः शक्यत्वमुपदर्शितम् ११०२

शब्दस्य विकल्पमात्रजनकत्वन्नतु वस्त्वभिधायकत्वमि-
त्यभ्युपगन्तुर्बौद्धस्य पूर्वपक्षः ११०३

तत्र दृश्ये स्वलक्षणे न शब्दात्मकविकल्पभास्यत्वं न
वा तत्र समयग्रहसम्भव इति दर्शितम् ११०४

न च सामान्यमेकन्नवा तस्य ज्ञानातिरिक्ताऽर्थक्रियेति
तदपि न वाच्यमिति दर्शितम् ११०५

प्रत्येकपक्षदोषतो नोभयस्यापि वाच्यत्वमिति दर्शितम् ११०६

शब्दार्थयोस्तादात्म्यतदुत्पत्त्योर्निराकरणे न तात्विकः
कश्चित्सम्बन्ध इत्युपपादितम् ११०७-१२(दर्शितम् १११३

शब्दजन्यबोधस्यापोहविषयत्वेनाप्रामाण्यमपोहस्वरूपञ्च
शब्दस्यापोहरूपार्थेन सह कार्यकारणभावसम्बन्धस्ततश्च
वाच्यत्वस्य जन्यत्वे वाचकत्वस्य जनकत्वे पर्यवसा-
वाचकत्वमप्यपोहे दर्शितम् (नमुक्तम् १११४) १११५

एकान्तमतखण्डन एव बौद्धोक्तदूषणानां प्रागल्भ्यं न
स्याद्वाद इति दर्शितम् १११६-१७

शब्देऽर्थप्रकाशजनकत्वं स्वाभाविकं याथार्थ्यायाथार्थ्ये
परापेक्षे इति दर्शितम १११८ (दर्शितम् १११९

एकान्तवादिवचनस्य न यथार्थत्व किन्तु सप्तभङ्ग्या इति
सप्तभङ्गीनिरूपणम् ११२०

तत्र वाक्येऽवधारणस्यावश्यकत्वं दर्शितम् ११२१

कुम्भादावस्तित्वादेः प्रश्ने स्याद्वादस्यैव सम्यक्प्रति-
विधानत्वमिति दर्शितम् ११२२

स्यादस्त्येव कुम्भ इत्यादीनां सप्तानां भङ्गानां क्रमेण
स्वस्वनिमित्तत उपदर्शनम् ११२३-२७

सप्तभङ्गादधिको भङ्गो न सम्भवतीत्युपपादितः ११२८

अनेकान्ततावगमकस्य स्यात्पदस्योक्तेर्भङ्गे आवश्यकत्वं
यत्स्वरूपादिना सत्त्वं तदेव पररूपादिनाऽसत्त्वमिति
बौद्धमतमाशङ्क्य प्रतिक्षिप्तम् (दर्शितम्११२९-३०) ११३१-३६

स्याद्वादासहिष्णोः परस्य पूर्वपक्षः तत्र प्रथमभङ्गप्रतिपा-
द्यस्यास्तित्वस्य न्यायमतसिद्धसत्तारूपत्वे जैनसिद्धो-

विषयः श्लोकः

उत्पादव्ययध्रौव्यात्मकसत्तारूपत्वे दोषोपदर्शनम् ११३७-३९
अस्तित्वस्य कालवृत्तित्वरूपत्वे दोषः प्रदर्शितः ११४०-४१
अस्तित्वस्य देशवृत्तित्वरूपत्वे दोषः प्रदर्शितः ११४२-४३
घटत्वादिनाऽस्तित्वस्य नैयायिको नाऽभ्युपगमात्प्रथमभङ्गे व्यधिकरणधर्मावच्छिन्नाभावस्य वेदान्तिनाऽभ्युपगमाद्द्वितीयभङ्गे नैकान्तवादाद्विशेष इति दर्शितम् ११४४-४५
उक्तप्रश्नप्रतिविधानम् ११४६-४७
उक्तप्रश्नकर्तुः सत्वादिकं न प्रतीयते नाऽव्याप्यवृत्ति न दर्शितार्थभिन्नरूपं किंवाऽवाच्यमिति चत्वारः पक्षा अभीष्टा न सम्भवन्तीति दर्शितम् ११४८-५२
प्रथमभङ्गेन विध्यंशरूपास्तित्वं द्वितीयभङ्गेन निषेधांशरूपनास्तित्वं प्रतीयत इति दर्शितम् ११५३
तृतीयादीनामपि भङ्गानां वस्त्वंशबोधकत्वं गौतममताद्विशेषश्च दर्शितः ११५४
अस्तित्वाद्यंशावच्छेदकत्वस्य धर्मादिगतस्यानन्यसिद्धस्य भानप्रतिपादनेन न्यायादितो विशेष उपपादितः ११५५-५८
वृत्तित्वरूपास्तित्वस्य प्रथमभङ्गप्रतिपाद्यत्वेऽपि न दोष इति दर्शितम् ११५९ (गम उपदर्शितः ११६०
तन्निरूपितवृत्तितायां तस्यावच्छेदकत्वं सार्वभौमाभ्युप-
उत्पादव्ययध्रौव्यरूपसत्त्वस्य प्रथमभङ्गप्रतिपाद्यत्वे दोष-
कालास्तित्वपक्षे दोषपरिहारः (परिहारः ११६१) ११६२
द्वितीयभङ्गे वेदान्तमताद्विशेषस्य परिहारः ११६३
वेदान्तमतमुपदर्श्य ततो जैनमते विशेषस्योपदर्शनमभावादिवैलक्षण्यप्रदर्शनेन ११६४-७४
व्यधिकरणधर्मस्यैव द्वितीयभङ्गेऽवच्छेदकतया भानमित्यपि नास्तीत्युपपादितम् ११७५-७६
वस्त्वंशानामेव धर्माणां स्याद्वादतो विभजनं न तु विवक्षया काल्पनिकत्वमिति दर्शितम् ११७७
द्वितीयभङ्गे वेदान्ताद्विशेषस्य निगमनम् ११७८
तृतीयादिभङ्गानामुपपादनम् ११७९-८०
अवक्तव्यत्वभङ्गे वेदान्तमताद्विशेष आशङ्क्य परिहृतः तस्य प्रथमादितयोगतः पञ्चमादिभङ्गाः प्रतिपादिताः८१-८६
विधिनिषेधावबोधनिपुणायाः सप्तभङ्ग्या द्रव्यपर्यायाभ्यामभेदवृत्त्युपचारत एकधर्मप्रतिपादनमुखेनानन्तधर्मप्रति-

विषयः श्लोकः
पादकत्वं कालादिभिरष्टभिरिति दर्शितम् ११८७-९९
द्रव्यपर्ययनयाभ्यां भेदोपचारभेदमुख्यवृत्तितः कालादिभिरष्टभिः सप्तभङ्ग्याः प्रतिभङ्गमेकैकधर्मप्रतिपादकत्वमित्येवं प्रमाणसप्तभङ्गीत्वं नयसप्तभङ्गीत्वं च निगमितम् १२००-१
सकलादेशविकलादेशविचारः तत्र प्रथमतृतीयतुर्यभङ्गानां सकलादेशत्वमन्येषां विकलादेशत्वमिति मतं तत्प्रतिपक्षमतश्चोपदर्शितम् १२०२-१४ (दर्शितम् १२१५
तत्र सर्वेषां भङ्गानां सकलासकलादेशते इति द्वितीयमतमाश्रितवान्देवसूरिप्रभृतिमतोपजीवी विद्वानिति त्रयाणां भङ्गानां सकलादेशत्वमन्येषां विकलादेशत्वमिति मतमनुसृतवान् तत्त्वार्थभाष्यतद्वृत्तिरहस्यविद्विद्वानिति दर्शितम् १२१६-२२
परोक्षस्य पञ्चप्रकारत्वनिगमकं मानसामान्यस्य कुत्रचिज्जैनग्रन्थे चतुर्विधत्वोक्तिर्नयवादमाश्रित्येति दर्शितम् १२२३
प्रमाणानां संख्यास्वपरविषयप्रयोजनानां जिनागममतानां याथार्थ्यमन्योक्तानाञ्चाभासत्वमिति दर्शितम् १२२४
तत्र प्रमाणसङ्ख्यायाथार्थ्यायाथार्थ्ये दर्शिते १२२५
प्रमाणस्वरूपतदाभासोपदर्शनम् १२२६
सविशेषस्य सामान्यस्य प्रमाणविषयत्वन्तदन्यस्य तदाभासत्वं दर्शितम् १२२७
सामान्यस्योर्द्ध्वतातिर्यग्भेदेन द्वैविध्यं उदूर्ध्वतासामान्यं तिर्यग्सामान्यञ्च निरूपितम् १२२८
द्रव्यस्योर्द्ध्वतासामान्यत्वं प्रतिपादितम् १२२९
द्रव्यस्य षड्विधत्वं ते च भेदाजीवपुद्गलधर्माधर्माकाशकालाः प्ररूपिताः १२३०-३९
ये कालं भिन्नमाहुस्तन्मतेन द्रव्यस्य षड्विधत्वमन्यत्र पञ्चविधत्वमिति विवेकः कृतः १२४०
दिश आकाशदेशव्यतिरिक्ताया न्यायमताया अपाकरणम्
मनसः क्षित्यादीनाञ्च पुद्गलेऽन्तर्भावनम् १२४२
पर्यायात्मकस्य विशेषस्य गुणपर्यायाभ्यां द्वैविध्यं तदुभयञ्च निरूपितम् १२४३ ४४
कर्मणः पर्यायेऽन्तर्भावः न्यायाभिमतयोः सामान्यविशेषयोर्जैनमते ऽसिद्धत्वम् अविष्वग्भावतो गुणादिविशिष्टबुद्ध्यनुपपत्त्या समवायासिद्धिश्चेति दर्शितम् १२४५-४६

विषयः श्लोकः
प्रमाणसामान्यफलस्य साक्षात्परम्परितभेदेन द्वैविध्यं तदुभयं प्रदर्शितम् १२४७
हानोपादानोपेक्षासु गौणफलेषूपेक्षैव फलं केवलस्य मत्यादीनां तु तत्त्रितयस्य फलत्वे भजनेति दर्शितम् १२४८-४९
फलस्य प्रमाणाद्भिन्नाभिन्नत्वमेव न तु गौतममतं भिन्नत्वं सुगतमतं चाभिन्नत्वमिति दर्शितम् १२५०
मत्यादीनां त्रयाणां भ्रम आभासो नतु मनःपर्यवकेवलयोर्भ्रमोऽस्त्विति प्रदर्शितम् १२५१-५२
स्मृत्यभिज्ञातर्काणामाभासा उपदर्शिताः १२५३-५५
अनुमानाभासनिरूपणम् १२५६
धर्म्यप्रसिद्धेरदोषत्वमुपपादितम् १२५७
सिद्ध्यर्थान्तरबाधानां त्रयाणां पक्षाभासत्वमुपदर्शितम् ५८-५९
व्यभिचारविरोधसिद्धीनां त्रयाणां लिङ्गदोषाणां निरूपणम्
स्वरूपासिद्धेर्दोषत्वमपाकृतम् १२६७
बाधस्य न हेतुदोषत्वं सम्प्रतिपक्षस्तु दोष एव नेतीत्युनवविधा दृष्टान्तदोषाः प्ररूपितम् (पदर्शितम् ६८) १२६९-७४
शब्दाभासस्य चतुर्विधत्वं प्ररूपितम् १२७५-७७
नयनिरूपणम् १२७८
नयस्य समासतो द्रव्यपर्ययभेदेन द्वैविध्यं व्यासात्सप्तविधत्वं द्रव्यपर्थययोः सकलमूलत्वं च दर्शितम् १२७९
द्रव्यनयः प्राधान्येन द्रव्यं पर्यवनयः प्राधान्येन पर्यायमभ्युपगच्छतीति दर्शितम् १२८०
जिनभद्रगणिक्षमाश्रमणमते नैगमसंग्रहव्यवहारर्जुसूत्राणां द्रव्यार्थिकत्वं शब्दसमभिरूढैवम्भूतानां पर्यायार्थिकत्वं सिद्धसेनदिवाकरमते तु ऋजुसूत्रस्य पर्यायार्थिकेऽन्तर्भाव इति विशेषोदर्शितः १२८१-८२
शब्दनयत्वेनैकेन सांप्रतसमभिरूढैवम्भूतानामुपादाने नयानां पञ्चविधत्वमिति दर्शितम् १२८३
संग्रहनयनिरूपणम् संग्रहमूलत्वं वेदान्तनये एकान्ततत्त्वावगाहित्वाच्च दुर्नयत्वमिति दर्शितम् १२८४
संग्रहनाम्नोऽन्वर्थत्वं परापरभेदेन द्वैविध्यं दर्शितम् १२८५
परसङ्ग्रहस्य शुद्धत्वमपरसङ्ग्रहस्याशुद्धत्वञ्च दर्शितम् १२८६
अत्र सङ्ग्रहनयमूलकस्य वेदान्तस्य विशेषांशे बुद्धेर्न प्रमात्वं अस्तीति सत्ताभिधायकशब्दस्य सत्यार्थ-

विषयः श्लोकः
त्वं न कुम्भादिशब्दानां सर्वानुगामिनः सत्यस्य सत्त्वस्य ब्रह्मरूपत्वं ज्ञानसुखयोश्च ज्ञानघटयोश्चाध्यासिकसम्बन्धस्तत्र ज्ञानस्य सत्यत्वं घटादीनामारोप्यत्व इष्टस्यानुगामित्वं सच्चिदानन्दस्वरूपत्वं ब्रह्मण इति दर्शितम् १२८७-९५
साङ्ख्यमतस्याशुद्धत्वं सङ्ग्रहमूलत्वमुपपादितम् १२९६
योगाचारनयस्य संङ्ग्रहमूलत्वे ऽपि ऋजुसूत्रमूलत्वमुपदर्शितम् १२९७
चार्वाकनयस्य व्यवहारमूलकत्वं व्यवहारस्य द्रव्यार्थिकत्वं सङ्ग्रहविरोधः एतन्मते सामान्यबुद्धेर्मिथ्यात्वं कुम्भादीनां परमाणुसमूहत्वं भूतभिन्नस्यावस्तुत्वं विशेषस्यैव सत्यत्वं प्रत्यक्षस्यैव प्रामाण्यं परलोकाभा-
नैगमनयनिरूपणम् १३०२ (वश्चेति दर्शितम् १२९८-१३०२)
न्यायवैशेषिकमीमांसकनयानां नैगमनयमूलत्वं दर्शितम् १३०३
संग्रहव्यवहारयोर्नगुणादिविशिष्टबुद्धेः प्रमात्वं नैगमनये तु तदिति विशेष उपदर्शितः १३०४
नैगमस्य द्रव्यार्थिकत्वे ऋजुसूत्रादीनां पर्यायार्थिकत्वे हेतुरुपदर्शितः १३०५ (पादितम् १३०६-१३०९)
ऋजुसूत्रनयनिरूपणम् सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकानां चतुर्णां बौद्धानां तन्नयानुगामित्वमुप
नैगमादीनां चतुर्णामर्थनयत्वं शब्दादीनां त्रयाणां शब्दनयत्वमुपदर्शितम् १३१०
शब्दादीनां त्रयाणामृजुसूत्रनयोद्भावत्वमुपदर्शितम् १३११
शब्दनयनिरूपणम् तन्नये लिङ्गादिभेदादर्थभेद उपदर्शितः १३१२-१३१५
भर्तृहरिमते शब्दनयमूलकत्वं संग्रहमूलकत्वमपि निर्विकल्पकमतेरभावो विशेषणज्ञानस्य विशिष्टबुद्धि प्रत्यकारणत्वं सौत्रान्तिकाभिप्रेतनि वकल्पकमतेरपाकरणञ्चेति दर्शितम् १३१६-१३१९
समभिरूढनयनिरूपणम् शाब्दिकनये एतन्नयप्रकृतिकत्वमुपपादितम् १३२०-२३
एवम्भूतनयनिरूपणम् १३२४-२६ (उपदर्शित १३२७-२८
निःक्षेपनिरूपणम् नयभेदेन निःक्षेपाभ्युपगमप्रकारभेद उपद-
प्रशस्तिः 'इति न्यायसिन्धुविषयानुक्रमणिका' (र्शितः १३२९-४०

॥ ओँ अर्हं नमः ॥

॥ परमकारुणिकगीतार्थत्वादिगुणोपेतनिजचरणविद्याप्रतिभा-
तिशयादिगुणसंस्मारितातीतयुगप्रधानगुरुवर्यश्रीवृद्धिच-
न्द्रापरनामश्रीवृद्धिविजयसद्गुरुभ्यो नमः ॥

भव्यभव्यानुग्रहविहितानेकग्रन्थसन्दर्भसकलसूरिसार्वभौमशासनसम्राट्-
तपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिसंदृब्धः

॥ श्रीन्यायसिन्धुः ॥

(मालिनीवृत्तम्)

जयति ऋषभदेवो बुद्धतत्त्वप्रबन्धः
प्रथित इह जिनानामाद्यतीर्थप्रवक्ता ॥
क्षपितनिखिलकर्मावाप्तशुद्धस्वरूपो
विभुरपि मितमाने सिद्धिदेशे य आस्ते ॥१॥

(स्रग्धरावृत्तम्)

गर्वाकूपारवादिप्रथितनिजमताकूतविध्वंसलीला-
सध्रीचीनस्वपक्षप्रथनपरवचोविस्मिताखण्डलादिः॥
नेताऽस्मान् पातु वीरो मितनयनिलयो विश्वमाङ्ग-
ल्यकर्त्ता
जन्मिव्राताभिपूज्यो जयति जिनवरो योऽन्तिम-
स्तीर्थकर्त्ता ॥२॥

॥ शार्दूलविक्रीडितम् ॥

प्रोद्यत्तत्त्वविबोधबीजविदलन्मिथ्याधरोत्थाङ्कुर-
प्रोत्सर्प्पज्जिनभक्तिसन्ततिलता जातोपदेशाम्बुतः ॥
यस्याशेषनयाम्बुधेर्मुनिवरस्योद्दामधामौकसः
श्रीचन्द्रोत्तरवृद्धिनामविदितस्स्यान्मङ्गलायात्र सः॥३।

॥ स्रग्धरावृत्तम् ॥

सिद्धान्ताम्भोनिवासं प्रबलपरझषोद्वेगकारिप्रवाहं
मानात्यक्तप्रयोगं सुनयतरिमिलत्स्फीतभङ्गीवि-
लसिम् ॥
सद्द्रव्यं बद्धतीर्थं गुणमणिनिलयं प्राप्तपर्यायभावं
सद्वृत्तं न्यायसिन्धुं गुरुचरणरतो नेमिसूरिस्त-
नोति ॥४॥

॥ मालिनीवृत्तम् ॥

घटपटशकटाद्यास्स्वस्वभावानुसारि
व्यवहृतिविषयत्वं यान्ति बुद्धिं विना नो ॥
यत इह तत एव ज्ञानतत्त्वं पुरस्ताद्
भवति मननयोग्यं लक्षणान्मानतश्च ॥५॥
व्यवहृतिरिह लोके त्रिप्रकारा यया सा
विबुधजनमता धीर्ल्लक्षणं तत्तटस्थम् ॥
जिनमतप्रथितैषा त्वात्मरूपा कथञ्चि-
दिति भवति सदिष्टं लक्षणं तत्स्वरूपम् ॥६॥
विसदृशमतिरिष्टा भिन्नतो लक्षणेन
यत इह तत एषा लक्षणादन्यतश्चेत् ॥
भवति ननु विलम्बात् तेन ताटस्थ्यमस्य
स्वयमिह यदि सा स्यात् तत्स्वरूपं तदानीम् ॥७॥

कथयति विबुधोऽन्यस्तत्स्वरूपाऽप्रविष्टं
यदिह तदितरस्माद् भेदकं तत्तटस्थम् ॥
भवति पुनरथान्यत् तत्स्वरूपप्रविष्टं
विसदृशमतिहेतुर्लक्षणं तत्स्वरूपम् ॥ ८ ॥
विषयविमुखमेतन्न प्रवृत्त्यादिकार्ये
प्रभवति यत उक्तं तेन तस्य स्वरूपम् ॥
विषयघटितमन्यैर्बाह्यवत् स्वस्वरूपम्
विशदयति परन्तन्नान्यतोऽस्य प्रकाशः ॥९॥

॥ वसन्ततिलकावृत्तम् ॥

सूर्यो यथायमखिलार्थविभासकोऽपि
मेघाऽऽवृतत्वविगमे स्वत एव भास्यः ॥
कर्मावृतत्वविलये च तथैव बोधोऽ-
र्थग्राहकोऽपि भवति स्वत एव भास्यः ॥१०॥
यद्यन्यबोधत इह व्यवसायभानं
तस्यापि तर्हि परतस्तु भवेत्प्रकाशः ॥
इत्थं व्यवस्थितिलयादनवस्थितिः स्याद्
दोषत्रयाऽऽकलितमूर्त्तिरियं न किं वः ॥११ ॥
यद्यक्षजन्यमतिकारणमिष्टमत्र
बोधे तु मानसभवे प्रतिबन्धकन्ते ॥
किं गौरवान्न हि बिभेषि विनापि तेन
स्वस्मात् प्रकाश उपपद्यत एव यस्मात् ॥१२॥
ग्राह्यो हि बोधजनको यदि सम्मतः स्यान्-

न स्यात्तदा त्वजनकः स्वयमेव भास्यः ॥

व्याप्तिः प्रमाणविषया नहि विद्यतेऽत्र
स्याच्चेत्तदेश्वरमतिश्शशशृङ्गकल्पा ॥१३॥

जन्यत्वतोऽप्यनुगता विशदावभासि-
योगीश्वरप्रमितितो विमुखा न किं सा ॥

किं शुक्लशङ्खगतपीतिमरूपबुद्धे-
र्ग्राह्यं विनाऽपि जननं न मतं तवास्ति ॥१४॥

एतेन लौकिकविशेषणसंविधानाद्
योगीश्वरप्रमितिवारणमप्यपास्तम् ॥

साक्षात्करोम्यनुभवस्य बलाद्बुधैर्य-
द्दोषोद्भवेऽप्यभिमतन्ननु लौकिकत्वम् ॥१५॥

न प्राप्यकार्यभिमतं नयनं ततो नो-
ऽध्यक्षा मतिर्भवति हीन्द्रियसम्प्रयोगात् ॥

स्पष्टत्वमेव विबुधैर्जिनतन्त्रविज्ञैः
स्पष्टीकृतं तदिह लक्षणमस्य युक्तम् ॥१६॥

तेनेन्द्रियार्थघटनाप्रभवत्वमस्य
स्वीकृत्य यैरिह निरूपितमन्यबुद्धेः ॥

ज्ञानस्य भानमिति तेऽपि विचारमार्गा-
द्दूरीकृता विशदयन्तु कथं प्रतिष्ठाम् ॥ १७ ॥

योग्यत्वमिन्द्रियनिरूपितमेकमत्र
यैर्लौकिकत्वकलिताद्विषयत्वतोऽथ ॥

आश्रित्य मानसभवं कथितं नु बोध-
ज्ञानं न तेऽपि सुधियो विबुधाग्रगण्याः ॥१८॥

यस्मान्महेशमतिगोचरवृत्तियोगाद्
दोषोत्थधीविषयवृत्तिसमन्वयाच्च ॥
व्याप्तिर्न्न दर्शितपदे न तथाऽनुकूल-
स्तर्कों विपक्षविमुखीकरणे समर्थः ॥ १९ ॥

किंचेन्द्रियार्थघटनैव यदि त्वदिष्टा
प्रत्यक्षबुद्धिजनिका भविता तदानीम् ॥
गन्धेऽपि चाक्षुषमतिर्न्न कथं रसादौ
घ्राणोद्भवा मतिरियं ह्यखिले समाना ॥२०॥

किं वा न मानसमतिस्तत एव धर्मेऽ-
धर्म्मे च बोध इव ते समुदेति तस्मात् ॥
योग्यत्वमेव प्रतिवस्तु विलक्षणं च
स्वीकर्त्तुमिष्टमिति तर्कविदां सुपन्थाः ॥२१॥

एतेन चाक्षुषमतौ प्रतिबन्धकाः स्यु-
र्गन्धादयो न हि मतिस्तत एव तेषाम् ॥
धर्म्मादि मानसमतौ च ततो न तस्ये-
त्येवं परस्य कथनं न तिरस्कृतं किम् ॥२२॥

एकेन्द्रियस्य विषयावपि कर्म्मरूपे
योग्ये च चन्द्रमसि येन भवेत् प्रकाशः ॥
रूपे न कर्म्मणि तव स्वयमेव किन्नो
जिज्ञासया बुध भविष्यति सत्प्रकाशः ॥२३॥

ज्ञेये मतौ मतिमति प्रविभक्तमेव
योग्यत्वमिष्टमिह जैनमतानुगानाम् ॥
कार्यैकगम्यमिदमत्र ततो न कार्यः
प्रश्नो विकल्परसिकैर्विबुधैरसारः ॥२४॥

नात्र प्रभाकरमतेन समानताऽपि
शङ्क्या यतो हि गुरुणा व्यवसाय एव ॥
प्राधान्यतो घट इति प्रतिपादितोऽत्र
जानाम्यहं घटमिति प्रविभाग एषः ॥२५॥

एतेन चेत् स्वविषयत्वमिह प्रसिद्धं
स्यात् स्वप्रकाश उपदर्शितमानतस्ते ॥
तस्य प्रथा यदि तदा विषयत्वसिद्धि-
रित्थन्निरस्त इतरेतरसंश्रयोऽपि ॥ २६ ॥

किञ्चास्य बोधविषयत्वमपेक्ष्य बोधो
न स्वप्रकाश उदितोऽभिनवे तु तन्त्रे ॥
सत्ता यथाऽपरत एव सती तथैव
बोधोऽवभासत इति प्रथितन्तु तेन ॥२७॥

ज्ञानस्य धीरपि भवेन्न परप्रकाशे
यस्माद् विशेषणमतिर्जनिका मता ते ॥
पूर्वं विशिष्टमतितः प्रकृते तु तस्या
नो सम्भवो भवति दोषवितानयोगात् ॥२८॥

अर्थे यतोऽक्षघटना प्रथमक्षणे स्याज्-
ज्ञानं घटादिविषयं तदनन्तरन्ते ॥

पश्चात् ततो मतिमतिर्ननु निर्विकल्पा
तस्माद् विशेषणमतेस्तु विशिष्टबुद्धिः ॥२९॥
एषा क्षणद्वयगते न विशेषणे स्याज्-
ज्ञाने विशेषणमतेस्समयेऽप्यवृत्तौ ॥
प्रत्यक्षबुद्धिजनको विषयो मतो य-
त्तत्कार्यकालगत एव न चान्यथाऽपि ॥३०॥
तत्ता विशेषणमपि प्रथते विनैव
सत्त्वं तथैव प्रकृते यदि सम्मतं ते ॥
ज्ञानं मयीति वद बोधविशेष्यिका धीः
कस्मात् तदापि भवितेति बुधाग्रगण्य ॥३१॥
आत्मा हि यद्यपि विशेष्यतया प्रधानो
ज्ञानस्य बोधविषयत्वविवक्षणेऽस्ति ॥
अर्थस्तथापि विषयोऽत्र प्रधान एव
यत्नादिकार्यजनने स्वविवक्षया स्यात् ॥३२॥
एतेन यैरनुमितिस्त्विह लिङ्गबुद्धे-
र्मुख्यत्वसंवलितपक्षविशेष्यतातः ॥
उक्ता स्वतः प्रमितिभाननिराक्रियार्थं
ते खण्डिता अपसरन्तु विचारमार्गात् ॥३२॥
अस्वप्रकाशविगमस्तु निजप्रकाशो
ब्रह्मात्मबोधगत इत्यभिमन्यमानाः ॥
वेदान्तिनो विधिमुखस्वप्रकाशकत्व-
स्वीकर्तृजैनविमुखा इति भिन्नमार्गाः ॥३३॥

वृत्तेस्तु यद्यपि मते स्वत एव भानं
तेषां तथापि न जिनागमनीतितस्तत् ॥
यस्माच्च तैर्विषयदेशगतिं प्रकल्प्य
प्रोक्ता हृदः परिणतिर्विषयस्वरूपा ॥३४॥
वेदान्तिनामिव न कापिलनीतिभाजां
ज्ञानप्रकाश इह आर्हतवीथिगानाम् ॥
इष्टो यतो न जड एव भवेत्प्रकाशो
नो वास्ति बिम्बप्रतिबिम्बविकल्पनं सत् ॥३५॥
साङ्ख्यैर्मतं तु विषयप्रतिबिम्बनं हि
नेत्रे तथाऽस्य हृदि तस्य प्रधानबुद्धौ ॥
द्वारं त्वहङ्कृतिरपि प्रथितस्तथात्मा
कूटस्थनित्य इह बिम्बनतस्तु तद्वत् ॥३६॥
बौद्धोऽपि यद्यपि धियं स्वत एव भास्यां
ते तथापि न जिनागमसिक्तचित्तः ॥
संवेदनं न सविकल्पकमिष्टमस्य
स्वस्माद्धि तं प्रकटयन्ति जिनानुगास्तु ॥३७॥
वैशेषिकोऽक्षचरणश्च धियं वदन्तौ
भास्यां परैर्न जिनदर्शितमार्गनिष्ठौ ॥
भट्टो मुरारिरपि नात्र तथा वदन्तौ
ज्ञानं ह्यतीन्द्रियमनुव्यवसायगम्यम् ॥३८॥
इत्थं प्रसिद्धिपदवीं स्वत एव प्राप्तं
ज्ञानं न मानमतिरिक्तमपेक्षते नः ॥

स्याद्वादलाञ्छितपदार्थप्रथासमर्थं
तद्गोचरत्वत इति प्रवदन्ति जैनाः ॥३९॥
स्वार्थावगाहि सविकल्पकमत्र सिद्धं
ज्ञानं प्रमाणमिति तत्र तिरस्क्रियां ये ॥
कुर्वन्ति तेऽत्र सुगतानुचरा न जैनैः
किं खण्डितास्स्वमततत्त्वविचारणायाम् ॥४०॥
सङ्क्षेपतस्तु परकीयमतप्रपञ्चं
प्रोद्भाव्य खण्डनमिहास्य भवेत्तु युक्तम् ॥
न ह्यन्यदीयमतखण्डनमन्तरा य-
च्छ्रद्धास्पदं भवति तच्च परीक्षकाणाम् ॥४१॥
अक्षाद्भवं भवति वस्त्ववगाहि पूर्वं
ज्ञानं विकल्पनधियः पृथगेव तस्मात् ॥
सामान्यगोचरमतिः सविकल्पिका ता-
माश्रित्य तद्भवति मानमिमां विना नो ॥४२॥
लिङ्गोद्भवं तु सविकल्पकमेव तच्च
सामान्यगोचरतयाऽपि भवेत् प्रमाणम् ॥
अर्थोद्भवत्वमिह यत्खलु निर्विकल्प-
द्वारा प्रमात्वगमकं च परम्परातः ॥४३॥
प्रामाण्यमत्र परमार्थत उक्तमेभिः
सद्गोचरत्वमथ सांव्यवहारिकं तु ॥
संवादकत्वमत एव भवेच्च तस्य
ज्ञानान्तरादधिगतिर्न्न मते स्वतोऽस्मिन् ॥४४॥

संवादकत्वमपि तत्र प्रवर्त्तकत्वात्
तत्प्राप्तिकारकतयाऽभिमतं च साऽपि ॥
अर्थोपदर्शकतया तत एव बौद्धै-
र्द्वारं विकल्पकमनंशमतेर्मतं च ॥४५॥
तेनागतं प्रमितिलक्षणमुक्तमत्र
जैनैर्न सर्वगमनंशमताववृत्तेः ॥
नो निर्विकल्पकमतिर्व्यवसायरूपा
यस्मात् तथा यदि तदा न निरंशताऽस्याः॥४६॥
एतन्न युक्तमिह यद्भवति स्वरूप-
निश्चायकं जिनमते ननु लक्षणं तत् ॥
प्रामाण्यलक्षणमिदं च तथैव मान-
त्वस्य व्यवस्थितिपरं न तदन्यथा तत् ॥४७॥
तल्लक्षणं स्वयमनिश्चितरूपमेव
लक्ष्यव्यवस्थितिपरं न भवेत्ततोऽस्य ॥
सिद्धिः पराभिमतमानत एव वाच्या
मानत्वमस्य गमकं खलु लिङ्गभावात् ॥४८॥
एवं स्थितौ भवति बाधतयैव दोषो-
ऽव्याप्तिः परेण कथिता न तु सोऽत्र युक्तः ॥
प्रत्यक्षतो भवति किं त्वनुमानतो वा
बाधो न तत्र प्रथमस्तव कल्पनार्हः ॥४९॥
नो निर्विकल्पनधियोऽक्षमतिर्भवेन्नो
नास्मद्विशिष्टजनुषामपि सा प्रसिद्धा ॥

संवेदनं स्वत इह प्रमितौ समर्थं
नो सम्मतं क्षणिकताद्यनुमाप्रणेतुः ॥५०॥
यस्मात् क्षणक्षयितया सकलाक्षबुद्धि-
र्नीलादिकन्तु विषयीकुरुते मतेऽस्मिन् ॥
सा साधयेद्यदि विक पमतिं विनार्थं
सत्त्वेन कः क्षणिकताऽनुमया तवार्थः ॥५१॥
स्यात् स्वानुरूपसविकल्पकसंविधाना-
न्मानत्वमस्य न च सोऽप्यनुभूयमानः ॥
संवेदनात्स्वत इहापि यदि प्रसिद्धिः
किं स्यात् तदा क्षणिकताऽवगता न तेन ॥५२॥
तस्यानुरूपसविकल्पकबोधतश्चेत्
सिद्धिस्तदा किमनवस्थितिरत्र ते नो ॥
तस्मात्त्वयाऽनुमितितोऽत्र निरंशबुद्धे-
स्स्यात्साधनं तदपि नैव विचारमार्गे ॥५३॥
यज्जायतेऽत्र सविकल्पकबुद्धिकाले
तन्निर्विकल्पकमिति प्रमिता यदि स्यात् ॥
व्याप्तिस्तदाऽक्षजधियोऽनुमितिप्रसिद्धं
स्यान्निर्विकल्पकमतित्वमिमां विना नो ॥५४॥
तत्राश्वकल्पनधियस्समये त्वयोक्ता
बुद्धिर्गवादिविषया नियमप्रसिद्ध्यै ॥
दृष्टान्तभावममलं प्रतिपद्यते नो
सिद्धिर्यतो न सुगताऽनुमतापि तस्याः ॥५५॥

दृष्टा यदैव विपिने भ्रमता मया गौ-
रश्वस्तदैव विदितोऽनिलतुल्यवेगः ॥
इत्यादिका स्मृतिरिहाभिमता प्रमाणं
यस्मान्न साऽपि सविकल्पकमन्तरा स्यात् ॥५६॥

अभ्यासपाटवप्रसङ्गवशाद् यदि स्या-
दर्थित्वतोऽथ च निरंशमतेः स्मृतिस्ते ॥
किन्न क्षणक्षयधियोऽप्यविकल्पिकाया-
स्स्यात्तत्स्मृतिः सुगतशिष्य ? तदोक्तहेतोः ॥५७॥

सामर्थ्यतद्विरहसङ्घटनापि तस्याः
स्यात्ते कथं वद निरंशमतित्ववादिन् ? ॥
येन त्वयापगतमप्यनुमोदितं स्या-
देकत्र सा तदितरत्र न सेति वाक्यम् ॥५८॥

स्मृत्युद्भवाद् भवति सा सविकल्पिकैव
तस्या न जन्म सविकल्पकजन्मकाले ॥
तस्मात् कथं कथय सौगत तेऽनुमानं
स्यान्निर्विकल्पकमतिप्रमितौ समर्थम् ॥५९॥

मानान्तरं न च तवोपगतं यतः स्यात्
तस्याः प्रसिद्धिरिति जैनमतं प्रमाणम् ॥
पूर्वोक्तलक्षणयुतं न कुतोऽपि बाधां
प्राप्नोति न त्वदुपदर्शितमत्र मानम् ॥६०॥

यस्मात् स्वलक्षणमतित्वमनंशबुद्धौ
स्वप्नेऽपि कस्यचिदिह प्रथते न चैव ॥

तत्पारमार्थिकमिदं शपथैकगम्यं
मानत्वलक्षणमविज्ञजनोपगम्यम् ॥६१॥

अर्थोपदर्शकतयाऽथ निरंशबोधो
मानं विकल्पनधियो जननात्तथा च ॥
द्वारं सदैव सविकल्पकमत्र मानं
क्लृप्तं निरंशमतितो व्यवहारकाले ॥६२॥

यद्यर्थगोचरतयाऽभिमतो विकल्पः-
स्यात्तर्हि तस्य जननादुपदर्शिका धीः ॥
यस्मान्न संशयविपर्ययकारणं धी-
र्मानं तथा च सविकल्पकमेव तत्त्वम् ॥६३॥

सामान्यगोचरतया यदि मानताऽस्य
सद्गोचरत्वविगमान्न तव प्रसिद्धा
व्यापारताऽपि तत एव निरंशबुद्धे-
स्स्यादस्य नैव विपरीतमतेरिवार्थे ॥६४॥

नो दृश्यकल्प्यविषया मतिरस्ति काचि-
द्भेदेऽप्यभेदघटनाऽत्र यया भवेत्ते ॥
नारोपितो भवति कोऽपि प्रभुः क्रियायां
तृष्णा कृशा भवति किं मृगतृष्णिकातः ॥६५॥

किञ्चाक्षजात्र सविकल्पकबुद्धिरेव
नेष्टा कुतो भवतु येन निरंशबुद्धेः ॥
तद्द्वारतो नियतगोचरमानता ते
मानप्रसिद्धिपदवीमवलम्बमाना ॥६६॥

नन्वत्र बुद्धतनया विविधैर्विकल्पै-
दुर्स्सन्दिहानमनसः प्रतिबोधनीयाः ॥
यस्माद्विना नहि विशेषणगोचरत्वं
बुद्धौ मते तव विशिष्टमतित्वमिष्टम् ॥६७॥
शब्दो विशेषणतया नहि भासतेऽर्थे-
ऽध्यक्षान्न शाब्दिकमतं तत एव युक्तम् ॥
शब्दो न नेत्रविषयो न स वर्ततेऽर्थे-
न व्यापको न च ततोऽभिमतो ह्यभिन्नः ॥६८॥
स्मृत्याऽपि तस्य नयनोत्थमतौ प्रकाशोऽ-
न्योन्याश्रयेण नहि युज्यत एव यस्मात् ॥
उद्बोधकाक्षजधियस्स्मरणस्य जन्म
तस्माच्च सेति न भवेदुभयप्रसिद्धिः ॥६९॥
जातिस्समानमतितो न च सम्प्रसिद्धा
सापोहगोचरतयैव यतः प्रसिद्धा ॥
तद्वत्त्वतोऽपि न विशिष्टतया घटादौ
बोधोदयो भवति गौतमतन्त्रसिद्धः ॥७०॥
नो युज्यते त्ववयवी व्यतिरिक्त एकः
स्थूलस्ततोऽपि न विशिष्टमतेर्विलासः ॥
द्रव्यं गुणाधिकरणन्न च विद्यतेऽत्र
तस्मात् कथाऽपि न विशिष्टधियोऽक्षजायाः ॥७१॥
बुद्धिर्घटादिविषया परमाणुपुञ्जाद्
द्रव्यं न कोऽपि विषयीकुरुतेऽक्षमध्ये ॥

रूपादयो हि नयनादिमतौ प्रथन्ते
द्रव्याणि नैव तु तदन्यतयेति विज्ञाः ॥७२॥
संयोजनं विभजनञ्च पृथङ् न चास्ति
भावादिहाणुनिचयात् कुत एव ताभ्याम् ॥
कर्म्मप्रसिद्धिरपि येन विशिष्टबोध-
स्तद्वत्त्वतोऽक्षजनितोऽनुमतो बुधानाम्॥७३॥
स्थैर्य्यं तथाऽस्य जननं च भवेत्कथञ्चि-
न्नो वै क्षणक्षयमते सुगतानुगानाम् ॥
अर्थक्रियादिघटना मत एव तस्मि-
न्स्थैर्य्यन्त्वविज्ञजनतानुमतं न युक्तम् ॥७४॥
पूर्वापरादिविगतं खलु वर्त्तमान-
मेवाक्षसन्निधिबलाद्विशदावभासे ॥
बोधे परिस्फुटवपुः प्रथते न चान्यत्
पूर्वादिताऽपि तत एव विशेषणं नो ॥७५॥
दण्डीति बुद्धिरपि चाक्षसमुद्भवत्वे
किन्नो भवेन्नियमतो वद सर्वपुंसाम् ॥
येनैव दण्डसहकारिबलात्समर्थो
दृष्टोऽत्र किन्तु पुरुषो ननु तद्वतैव ॥७६॥
दण्डस्तथा न च विशेषणमेव पुंस-
स्तस्यापि किन्तु स विशेष्यतया मतोऽत्र ॥
पुंसा तु येन पुरुषोपकृतेन दण्डे-
नालक्षितः फलभवो ननु तेन किन्न ॥७७॥

चेद्वस्तुतो यदि विशेष्यविशेषणत्वे
नैतादृशा विनिमयो भविता तदानीम् ॥
तस्माद्विशिष्टमतिरक्षसमुद्भवा नो
युक्ता निरंशमतिरेव ततोऽर्थतश्च ॥७८॥
स्वात्मप्रतिष्ठितमिदं जगदेव नो वै
वृत्तिः परस्य परधर्मिणि संप्रसिद्धा ॥
तत्त्वेऽनवस्थितिलतापरिवेष्टनं स्या-
न्नो भूतलाश्रितघटादिमतिस्ततोऽपि ॥७९॥
यश्चाणुदेश इह येन विशिष्ट इष्टो
नो तस्य नेत्रघटनाऽपि तदावृतत्वात् ॥
योऽनावृतस्स तु न तेन भवेद्विशिष्टो
देशादितोऽपि न विशिष्टमतिस्ततोऽक्षैः ॥८०॥
किञ्चाक्षयोगविमुखानपि भावसार्थान्
प्रत्यक्षबोध इह चेदवगाहते ते ॥
किन्नो भवेदखिलतत्त्वप्रकाशिका धी-
स्सर्वज्ञवत्सकलसत्त्वसमाश्रिताऽपि ॥८१॥
पूर्वादिके यदि तु सन्निधिमन्तरा ते
त्वक्षोत्थबोध बोध उपपद्यत एव तर्हि ॥
कस्मादनागतविनष्टपदार्थसार्थेऽ-
ध्यक्षामतिर्भवति नैव तथैव भिन्ने ॥८२॥
तस्माद् विशेषणमिहाथ विशेष्यमाभ्यां
संसर्गमज्ञजनता प्रथमं प्रकल्प्य ॥

बोधं विशिष्टविषयं मनुते ततः किं,
प्रत्यक्षताभ्युपगमोऽपि भवेच्च तस्य ॥८३॥
एतन्न चारु सुगतानुगदर्शितं यत्,
सर्वं पलालनिकरस्य समं विभाति ।
स्याद्वादलाञ्छितपदार्थमहेन्धनेद्ध--
बोधाग्निना सममुपैति न च प्रतिष्ठाम् ॥८४॥
नात्राक्षजस्त्वभिमतो निखिलोऽर्थबोध--
श्शब्दान्वितार्थविषयस्तव येन दोषः ॥
अन्योन्यसंश्रयभवस्मरणेन जन्ये,
शब्दावगाहिनि भवेन्नयनोत्थबोधे ॥ ८५ ॥
जातिः समानपरिणामतया त्वयापि,
जैनैरिवैक्यमतिविभ्रमवादिनेष्टा ॥
मन्तुं तथा विधिमुखस्य न प्रत्ययस्य,
तुच्छावगाहनतयोपगमोऽपि युक्तः ॥ ८६ ॥
नापोह एव तव जातिपदाभिषिक्तः
स्यात्तां विनाऽनुगतबुद्धिभवे समर्थः ॥
भेदद्वयाकलितमूर्त्तिरयं यतस्तेऽ-
गोन्यत्वरूप इह सम्मत आगमेन ॥८७॥
गोव्यक्तिभेद उत किं सकलस्य गोर्वा
भेदो निविष्ट इह न प्रथमोऽत्र युक्तः ॥
तत्त्वे हि गोष्वपि परस्परभिन्नभावाद्-
गोभिन्नतैव न गवान्यविभिन्नता स्यात् ॥८८॥

पक्षो द्वितीय इह तेऽनुमतो यदि स्या-
ज्जातिस्तदा स्वरसतस्तत एव सिद्धा ॥
जातिं विनाऽखिलगवप्रतियोगिकस्य
भेदस्य निर्वचनमेव न शक्यते यत् ॥८९॥
तत्राप्यपोहघटना यदि ते मता स्यात्
किन्नानवस्थितिघटा परितस्तदानीम् ॥
जातिर्न तार्किकमताऽत्र मते ततो न
स्वद्दोषभीतिरपि सम्भविनीति विद्धि ॥९०॥
स्थानं जहाति नहि पूर्वमितस्तथा वा
नान्यत्र गच्छति नवांशवती न जन्या ॥
तद्देशवृत्तिकलिता न च तत्कुतस्सा
गोव्यक्तिमात्रनियताऽभ्युपगन्तुमिष्टा ॥९१॥
एवं हि दोषसमुदायसमर्थनेन
नैयायिकस्त्यजतु तामतिरिक्तभावाम् ॥
जैनो न किं शबलवस्त्वनुरक्तबुद्धि-
स्तां स्वीकरोतु विशदप्रतिभाससिद्धाम् ॥९२॥
यस्मात्कथञ्चिदिह जायत एव जाति-
र्व्यक्त्युद्भवेऽपि तदनन्यतया तथा सा ॥
तन्नाशतो लयवती ध्रुवभाविनी च
नैतत्त्रयं हि विरहय्य मताऽत्र सत्ता ॥९३॥
साचोर्ध्वता जिनमते प्रथिता च तिर्यक्,
स्वद्रव्यमेव प्रथमानुगता घटादौ ॥

साधारणी परिणतिस्तु भवेद्द्वितीया,
पूर्वा त्रिकालगमनेयमनल्पदेशा ॥९४॥

सामान्यमत्र न विशेषपृथक्स्वरूपं
नो वा स भिन्न इत इष्यत आर्हतैर्यत् ॥
एकान्ततोऽपृथगपीह मतं द्वयं नो
जात्यन्तरं भवति तज्जिनसम्प्रदाये ॥९५॥

व्यावृत्तिबुद्धिरथ चानुगतत्वबुद्धि-
स्तद्वस्तुतो भवति नो समवाययोगात् ॥
तादात्म्यमेव यत आर्हततत्त्ववादे
संसर्गताश्रयतयाभिमतं कथञ्चित् ॥९६॥

भिन्ने हिमे भवति नैव हि विन्ध्यवृत्ति-
र्नो वा घटस्य घट एव घटा प्रसिद्धा ॥
तादात्म्यता भवति तेन भिदानुविद्धा
संसर्गमात्रनियता जिनसम्प्रदाये ॥९७॥

संयुक्ततापरिणतेस्तु बलादभेदो
द्रव्यद्वयस्य खलु भेद इह स्वरूपात् ॥
तादात्म्यमेव ननु भेदयुतन्ततोऽत्र
संयुक्तयोरपि मतं जिनतन्त्रविज्ञैः ॥९८॥

एकान्ततोऽक्षचरणानु मतो विभिन्नो
योगो विकल्पमुखजर्जरितस्वरूपः ॥
भिन्ने स किं भवति किन्नु भवेदभिन्ने
जात्यन्तरे भवति वा न गतिश्चतुर्थी ॥९९॥

आद्ये भवेद्वद कथं न हिमेऽपि विन्ध्य-
वृत्तिस्ततो बुधमता तव सम्प्रदाये ॥
चेत्कार्यकारणसमाश्रयणेन नायं
दोषस्तदा भवतु नो मतसिद्धिरेव ॥१००॥
यस्सर्वथा भवति सन्न च तस्य जन्म
नो वाऽसतो भवति हेतुबलात्तथा तत् ॥
जात्यन्तरस्य तु भवेदपि ते मतन्न
तत्त्वे विवाद इह नैव भवेन्मया ते ॥१०१॥
पक्षे द्वितीय इह किन्न घटादयस्स्यु-
स्स्वात्माश्रिता वद ततो न च सोऽपि युक्तः ॥
अन्त्ये विवादविलयो बुधजैनतत्त्वे
श्रद्धा त्वयापि कपटात्प्रकटीकृता यत् ॥१०२॥
संसर्ग एष तव किञ्च मते मतोऽस्ति
संसृष्टरूप उत वा विपरीत आद्ये ॥
स्वस्मात् स चेद्यदि तदा न तमन्तरापि
किन्द्रव्ययोरपि तवानुमतस्स विद्वन् ॥१०३॥
चेदन्यतो ननु भवेदनवस्थितिस्ते
तस्यापि सम्भवति सोऽन्यत एव यस्मात् ॥
नेष्टाऽनवस्थितिरियं न हि मानसिद्धा
तामन्तरापि गतिरस्ति यतस्स्वरूपात् ॥१०४॥
द्वैतीयके न नियमोऽविनिगम्यभावात्
सर्वस्य किं सकल एव ततो न वृत्तिः ॥

युक्तिस्समैव समवायनिराक्रियाया-
मेषा विशुद्धमतिभिस्स्वयमेव चिन्त्या ॥१०५॥
वायौ न किं भवति रूपविशिष्टबुद्धि-
रेको विभुश्च समवाय इहेष्यते यत् ॥
सम्बन्धसत्त्वनियतैव मतार्थसत्ता
ना चेत्तदा भवतु तस्य प्रयोजनं किम् ॥१०६॥
स्याच्चेन्न रूपप्रतियोगिक एष वायौ
वाच्यस्तदा विनिगमो ननु कोऽपि येन ॥
भूम्यादिकेऽस्ति स तु नो पवनादिभावे
ज्ञानाद् व्यवस्थितिरियञ्च न युज्यते ते ॥१०७॥
वायौ हि रूपविरहस्य मतिस्तवेष्टा
सा रूपबुद्धिजनितैव न रूपबुद्धेः ॥
आरोपतावगतिरस्ति विनैव रूपा-
भावप्रमाप्रमितिमित्यवधारणीयम् ॥१०८॥
चेल्लाघवात्तव प्रथा यदि तस्य तर्हि
नास्त्येव तच्च बुध तद्व्यतिरिक्ततायाम् ॥
द्रव्यादिभेदघटनादिप्रकल्पनेन
यद्गौरवं भवति तत्र तदात्मतातः ॥१०९॥
तादात्म्यतो भवति जातिविशिष्टबुद्धि-
स्तादात्म्यमत्र तु कथञ्चिदनन्यतैव ॥
तस्मात्कथं कथय बौद्ध विकल्पबुद्धि-
रक्षोद्भवापि किमु नैव प्रयाति सिद्धिम् ॥११०॥

नो सर्वथावयवतो व्यतिरिक्त एव
  स्थूलो घटाद्यवयवी जिनसम्प्रदाये ॥
भिन्नस्ततोऽथ च कथञ्चिदयं ततः किं
  तस्माद् विशिष्टमतिरक्षभवा न तस्मिन् ॥१११॥
अंशेन वृत्तिरुत किं निखिलात्मनांऽशे
  त्वत्सम्मतावयविनोऽप्यथवा न सास्ति ॥
इत्यादिदोषभयतो व्यतिरिक्ततैव
  स्यात् सर्वथाक्षिचरणानुमतास्य लुप्ता ॥११२॥
सोऽनन्तशक्तिकतया च भवेदनन्त-
  धर्म्मा ततोऽवयवसङ्घसमाश्रितोऽपि
किञ्चिच्चलत्यपि न गच्छति संस्थितोऽपि
  नो स्थैर्यवान् भवति चित्रमचित्ररूपः ॥११३॥
देशेन दृष्ट इह नैव भवेच्च दृष्टो
  देशावृतोऽपि तदनावृत एष इष्टः ॥
रक्तोऽप्यरक्त इह नैव विरोधचर्चा-
  ऽनन्तस्वभाववति वस्तुनि मानसिद्धे ॥११४॥
नास्य प्रथा भवति वा परमाणुपुञ्जा-
  द्यस्मान्महत्त्वमणुषूपगतन्त्वया नो ॥
संयुक्ततापि न च तेषु तव प्रसिद्धाऽ-
  दृश्याणुपुञ्जजनितन्न च दृश्यपुञ्जम् ॥११५॥
रूपादिभिन्नमिह नैव समस्ति किञ्चिद्-
  द्रव्यन्त्वयेति कथितन्नहि तच्च युक्तम् ॥

दृष्टं स्पृशामि कनकादि स एव चाह-
मित्यादिका मतिरुदेति न तद्विना यत् ॥११६॥
स्पर्शो न नेत्रविषयो न च रूपमिष्ट-
न्त्वग्गोचरं कथय कस्य भवेत्तथा धीः ॥
द्रव्यन्तदाश्रयतयाभ्युपगम्यते चेत्
तत्र द्वयोरपि तदा विषयत्वशक्तिः ॥११७॥
संयोगखण्डनमपि प्रथितन्त्वया यत्
तत्तार्किकस्य मतमेव निराकरोतु ॥
पर्यायताऽस्य कथिता ननु येन तस्मिन्
स्याद्वादवादिनि कथन्तव दोषपोषः ॥११८॥
संयोगिनोऽत्र परमाणव एव किं स्यु-
स्संयोगहेतव उतेतरथाद्यपक्षे ॥
संयोगकल्पनमनर्थकमेव तेषां
संयोगिता प्रथमतो ननु यत्प्रसिद्धा ॥११९॥
द्वैतीयके तु किमु सातिशयास्तथा स्युः
किं वा न तेऽतिशयतश्च विशिष्टरूपाः ॥
आद्येऽन्यतो यदि तु सातिशयत्वमेषां
किन्नानवस्थितिलतापरिवेष्टनं स्यात् ॥१२०॥
स्वस्माद्धि चेद्यदि तदा त्वविशेषतः किं
देशान्तरस्थितिमतामपि तद्भवेन्नो ॥
दोषादतोऽतिशयशून्यतयापि नैषां
स्वीकारपक्ष उपपद्यत एव युक्त्या ॥१२१॥

अव्याप्यवृत्तिरथ तार्किकसम्मतोऽयं
तद्वत्त्वतोऽणुषु कथन्नहि सांशता स्यात् ॥
इत्यादि दोषघटना जिनसम्प्रदाये
स्याद्वादलाञ्छिततनौ न भवेच्च तस्मिन् ॥१२२॥
संयोगवद्विभजनश्च तथैव सिद्ध-
न्नो द्रव्यतस्तदुभयं व्यतिरिक्तमेव ॥
तत्कारणं भवति कर्म्म तथैव तस्मात्
किन्नो विशिष्टमतिरक्षभवा ततो नः ॥१२३॥
कर्मोद्भवो भवति नो क्षणिकत्वपक्षे
स्थैर्य्ये भवेदपि न स प्रमितस्तु पक्षः ॥
इत्यादि यत्पुनरिहाभिहितन्त्वया तत्
स्यादेव तार्किकभयस्य निदानभूतम् ॥१२४॥
नो नः क्षणक्षयतयाभिमताः पदार्था
एकान्ततो न च तथा स्थिरतालयाश्च ॥
स्याद्वाद एव ननु तत्र निरस्तदोषः
कर्म्मादिभूतिफलकोऽभ्युपगन्तुमर्हः ॥१२५॥
यस्माद् भवेन्न च निरन्वयमेव जन्म
तस्मात् कथं क्षणिकपक्षकृतादरस्त्वम् ॥
पूर्वापरक्षणगताश्च विभिन्नधर्मा-
ध्यासात् कथं स्थिरतयैव तथोपगम्याः॥१२६॥
यच्चैकदा भवति यज्जनने समर्थं
तत्सर्वदेति नियमेन प्रसङ्गतो यत् ॥

सामर्थ्यतद्विरहरूपविरुद्धधर्म्मा-
ध्यासान्मतं क्षणिकतानियतश्च सत्त्वम् ॥१२७॥
अर्थक्रियाजनकतैव मताऽत्र सत्ता
तस्या बलात् क्षणिकता तव सर्व्वभावे ॥
एतद्द्वयन्ननु विचारसहन्न यस्मा-
न्नैयायिकैरपि कृता स्थिरताव्यवस्था ॥१२८॥
एकन्न किञ्चिदपि कारणमर्थकारि
सामग्र्यमेव जनकन्तत एव कार्यम् ॥
यस्मात्ततस्तु सहकारिसहायतोऽर्थं
कुर्युन्न कुर्युरपि तद्विरहात् पदार्थाः ॥ १२९ ॥
किं वा यथाऽत्र करणाकरणे न काल-
भेदे स्थिरे भवत एकपदार्थनिष्ठे ॥
एते तथैव भवतो ननु देशभेदे-
प्येकत्र धर्म्मिणि कथं क्षणिकेऽपि बौद्ध ॥१३०॥
यच्चैकदेश इह कार्यजनौ समर्थ-
स्तत्सर्व्वदेश इत एव करोतु कार्यम् ॥
नो चेद्विरुद्धघटनादिह चापि भेद
एवं तवोपरि कथन्न पतेत् प्रसङ्गः ॥ १३१ ॥
योऽयं क्षणः प्रकृतकालगतं पदार्थं
कर्त्तुं समर्थ इह सोऽन्यगतं तथा चेत् ॥
कार्यं त्रिकालगमसौ जनयेत्तथा च
साधु क्षणक्षयमतं भवता न्यगादि ॥ १३२ ॥

यो वै क्षणः प्रकृतकालगदेशवृत्ति-
कार्योद्भवे प्रभुरसौ यदि ते समर्थः ॥
कार्यं त्रिकालगतदेशगतं विधातुं
नित्यं विभु प्रथितमेव तदा त्वयाऽपि ॥१३३॥

पूर्वप्रसञ्जनभयादथदि तद्विरुद्ध-
मिष्टं तदा क्षणगतेऽपि भवेच्च भेदः ॥
तत्त्वेऽनवस्थितिघटा तव शून्यता वा
पक्षे क्षणक्षयकथा न तु सावकाशा ॥१३४॥

इत्थं स्वबुद्धिविभवो ननु तार्किकेण
व्यक्तीकृतस्तु प्रतिवन्दिबलान्न तत्त्वात् ॥
एकक्षणेऽपि बहुधर्म्मयुतं पदार्थं
यस्माद्विवेद न च सोऽपि कुतर्कमोहात् ॥१३५॥

शक्तिः स्वरूपसहकारिविभेदतोऽत्र
द्वेधा मता घटपटादिपदार्थनिष्ठा ॥
बौद्धोक्तदोषनिवहस्य कुतोऽवकाशः
स्याद्वादवादिनि वृथा प्रतिवन्दिचर्चा ॥१३६॥

स्थैर्ये स्थिते क्षणिकताऽनुगते क्रियायाः
किन्नोद्भवो न च विशिष्टमतिस्ततः किम् ॥
संयोगतो विभजनाच्च तदुद्भवाद्वा
किन्नाक्षजा भवतु धीर्विशदाऽवभासा ॥१३७॥

यद्वर्त्तमानमिह केवलमक्षबोधे
वस्तु प्रकाशत इति प्रतिपादितन्तत् ॥

ध्यान्ध्यं यतो नहि भवेत् तव केवलस्य
पूर्वापराद्यविषयीकरणेऽवभासः ॥१३८॥
ऐक्यं यथात्र प्रतियोग्यनुयोग्यपेक्षं
नो भासते तदुभयं विरहय्य बुद्धौ ॥
भेदस्तथैव प्रतियोग्यनुयोग्यपेक्षः
किं भासतान्तदिव केवलशब्दवाच्यः ॥१३९॥
भेदः स्वलक्षणतयैव मतो हि तेन
तद्बुद्धितो यदि भवेत् स गृहीत एव ॥
ऐक्यं स्वलक्षणतयैव मतं कथन्न
तच्चापि तर्हि तत एव गृहीतरूपम् ॥१४०॥
सान्निध्यतो भवति चाक्षमतेर्विलासः
पूर्वापरौ न विषयीकुरुते ततः सा ॥
इत्यादिकन्तव मते न हि युज्यते यत्
सान्निध्यमेव तु न चास्ति पृथक्पदार्थात् ॥१४१॥
नैक्यत्वतो ग्रहणमत्र भवेत्तथात्वे
भेदत्वतो ग्रहणमप्यनुमोदितं किम् ॥
धर्मिस्वरूपमुभयत्र समानमेव
तस्मात् कथन्न सविकल्पकबुद्धिरक्षणः ॥१४२॥
रूपे यथैव नयनस्य तथैव गन्धे
सान्निध्यमस्ति नयनान्न तु गन्धबुद्धिः ॥
योग्यत्वमेव नियतन्तत आर्हतानां
ग्राह्यस्वभावगमकम्मतमिन्द्रियाणाम् ॥१४३॥

स्याच्चेदतीतविषये तदनागते वा
तद्व्यक्षजापि मतिरस्तु ततश्च तेषाम् ॥
पूर्वापरौ च भजनान्न विना विभिन्नौ
स्तो वर्त्तमानत इयं क्व तदा कथा ते ॥१४४॥

यद्याग्रहस्तव तयोश्च विभिन्नकाल-
वृत्तित्वतो न विशदाभमतिस्तदानीम् ॥
सर्वज्ञता सुगततोऽपह्नुता त्वयैवं
तात्कालिकान्यविषयावगतेरभावात् ॥१४५॥

एतेन केवलविशेषणमन्तरैव
बोधो निरंशविशदो ननु वर्त्तमानम् ॥
अर्थं प्रकाशयति नान्यमिति प्रलापोऽ-
प्यस्तङ्गतस्सुगतशिष्यगणोपजीव्यः ॥१४६॥

दण्डान्वितः पुरुष इत्यपि बुद्धिरक्षजा
एवं स्थितौ शबलवस्तुत एव युक्ता ॥
सर्वस्य सा भवति किन्तु विवक्षितोऽर्थो
यस्स्यात् स एव वचनप्रथितस्तु लोकैः ॥१४७॥

चित्रात्मके घटपटादिपदार्थजाते
यस्यैव येन पुरुषेण कृता विवक्षा ॥
तत्रैव तस्य पुरुषस्य वचोविलासो
ज्ञातेषु सत्स्वपि च धर्म्मगणेषु बौद्ध ॥१४८॥

एतावतैव नियमो वचने न चास्ति
बुद्धिस्तु सर्वविषयाक्षभवार्थजन्या ॥

धर्म्मस्वरूपवदतोऽत्र मतश्च धर्म्मी
धर्मे विशेषणमपीति जिनानुगानाम् ॥१४९॥
धर्मो यथैव न च धर्मिविभिन्नरूपो
धर्मी तथैव न च धर्मविभिन्नरूपः ॥
एकान्ततो हि तत एव विशिष्टबुद्धि-
रन्योन्यतोऽस्तु न च काचिदिहास्ति हानिः१५०
एवञ्च मुग्धजनतापि विचित्ररूपं
पश्यँश्च दण्डपुरुषद्वयमेव बद्धम् ॥
पूर्वेक्षणेऽपि नयनेन न वक्ति यत्तु
तत्रान्यहेतुविरहो न च बुद्ध्यभावः ॥१५१॥
स्वात्मप्रतिष्ठितमिदं जगदुक्तवान्य-
त्तद्युक्तमेव जिनतन्त्रसमाश्रयेण ॥
भेदेऽप्यभेद इह यत्सकलेषु जैनै-
स्सत्त्वादिधर्म्मघटनाकृत उक्त एव ॥१५२॥
या चानवस्थितिघटाऽन्यसमाश्रितत्वे
प्रोक्ताऽत्र सूक्ष्ममतिना न च सा तु युक्ता ॥
आकाश आश्रयतयैव मतोऽखिलानां
नास्याश्रयो भवति कोऽपि कुतोऽनवस्था॥१५३॥
एकप्रदेशवति तत्र तदन्यदेशा-
वच्छिन्न एष ननु तिष्ठतु तावतापि ॥
साधारतानियम आर्हतसम्प्रदाये
उक्तः परैर्निखिलभावगतोऽपि युक्तः ॥१५४॥

नन्वत्र तार्किकमतेन विभुर्निरंश-
इशब्दाश्रयः प्रथित एष न किन्तवापि ॥
येनांशकल्पनपरिश्रमतोऽपि मुक्तिः
श्रेयस्करी नभसि ते भविता तदानीम् ॥१५५॥
शब्दो गुणो यदि भवेन्ननु युक्तमेतत्
स्यात्किन्तु पौद्गलिक एष मते जिनानाम् ॥
सङ्ख्याक्रियादिमतिरत्र यतो गुणत्वा-
भावप्रसाधनपरा विशदा न बाध्या ॥१५६॥
साक्षान्न तस्य यदि किन्तु परम्परात-
स्सङ्ख्या तदाश्रयगता किमु हेतुगा सा ॥
द्वित्वादिधीर्नहि भवेत् प्रथमे द्वितीये
स्यादेकतामतिलयो बहुकारणोत्थे ॥१५७॥
दूरादयं झटिति शब्द उपागतोऽयं
शाङ्खश्श्रुतिश्च बधिरीकुरुते बलीयान् ॥
शैले स्वयं प्रतिहतः पुनरेति कर्णं
द्वारादतोऽयमखिलो मम भाति नो ते ॥१५८॥
इत्यादिधीर्भवति तत्र विना न कर्म
सत्त्वे च तस्य गुणता नहि युक्तिसिद्धा ॥
सर्वा मतिर्मतिमतामुपचारतो नो
मुख्यात्तथाभ्युपगमे वद कोऽत्र दोषः ॥१५९॥
नाकाशरूपमिह तु श्रवणं मतं च
तत्त्वेऽखिलस्य युगपत्पुरुषस्य बुद्धिः ॥

शब्दे भवेद्व्यवहितेऽपि ततश्च शब्दो
  द्रव्यं श्रुतिः परिचितैव तयोस्तु प्राप्तिः ॥१६०॥
शक्तिस्तथात्र बहिरिन्द्रियमात्रवृत्तिः
  प्रत्येकमेव नियता जिनसम्प्रदाये ॥
तस्याः क्षयाद्बधिरताद्युपपद्यतेऽत्र
  नादृष्टकल्पनभवोऽपि महान्प्रयासः ॥१६१॥
तस्या बलान्नयनजा युगपन्मतिस्तु
  संजायते शशिनि शाखिनि चैव विद्वन् ॥
संयोगतो यदि भवेत् क्रमतस्तदानीं
  चन्द्रे च शाखिनि मतिद्वयमेव नैका ॥१६२॥
नो रश्मिमन्नयनमस्ति कुतोऽपि मानात्
  सिद्धं यतोऽत्र नयनात्तव निःसृतास्ते ॥
चन्द्रश्च शाखिनमपि प्रजवेन गत्वा
  संयुज्यमानतनवो ह्यवभासयन्तु ॥१६३॥
मध्ये रसादिषु भवेद्यदि रूपमात्र-
  प्रोद्बोधकत्वत इदन्ननु तैजसन्ते ॥
तस्माच्च दीपकलिकेव समस्ति रश्मि-
  चक्रास्पदन्तदपि तन्न विचाररम्यम् ॥१६४॥
प्रत्यक्षबाध इह पक्षगतो हि दोष-
  श्चक्षुर्न्न रश्मिसहितं क्वचिदप्यलोकि ॥
योग्या न रश्मय इतीक्षणगोचरा नो
  चेत्तर्हि भास्करकरा अपि किन्न रात्रौ ॥१६५॥

मार्जारचक्षुरिह बाह्यप्रकाशयुक्तं
चक्षुष्ट्वतो भवति रूपमतौ समर्थम् ॥
यद्वद्दिवा मनुजनेत्रमिति प्रमाणं
किन्नास्त्यदृश्यरविरश्मिषु रात्रिगेषु ॥१६६॥

उद्भूततापरिगतास्स्वत एव ते चेन्-
मार्जारचक्षुषि पदार्थमतौ समर्थाः ॥
नो तादृशा मनुजचक्षुषि तेन तेषां
रात्रौ न सूर्यकिरणस्य भवेद्व्यपेक्षा ॥१६७॥

यद्यादृशं भवति दर्शनगोचरस्तत्
त्वं स्वीकरोषि यदि तादृशमेव विद्वन् ॥
नेत्रे दिवा कथमदर्शनगोचरास्ते
रात्रौ न किं रविकरा अपि तादृशास्स्युः॥१६८॥

किं वा सुवर्णमपि नेत्रसमानमेवा-,
नुद्भूतरूपमपि ते न प्रकाशकं स्यात् ॥
योग्यत्वमत्र शरणं यदि तैजसत्वं
व्यर्थन्तदा नयनगं परिकल्पितन्ते ॥१६९॥

सूर्यांशवोऽथ यदि सन्निहिता रजन्यां
किं रूपगोचरमतिर्न्न भवेन्नराणाम् ॥
नैवं कथं भवति तार्किक सूर्यरश्मौ
नोलूकपक्षिण इहाद्धि मतिर्विशुद्धा ॥१७०॥

दीपो यथा भवति रूपमतौ समर्थ-
स्तद्वत्तमोऽपि कथमस्य न तैजसत्वम् ॥

रात्रिञ्चरादि तदपेक्ष्य यतो रजन्यां
स्पष्टं विलोकयति तद्व्यभिचारि हेतुः ॥१७१॥

नाभावता तमस आर्हतसम्प्रदाये
इष्टा तु पौद्गलिकताऽतितरादियोगात् ॥
तेजोऽणुभिर्भवति तस्य जनिस्तथाऽस्मिन्
स्पर्शश्च शीतलतयाभिमतो बुधानाम् ॥१७२॥

नो जातिभेद इह जैनमतानुगाना-
मिष्टेषु पुद्गलतयाऽणुषु सम्मतो यत् ॥
तेजोऽणवोऽपि तत एव भवन्ति शीता-
स्तज्जन्तमः पवनतोऽस्य मतिश्च शीते ॥१७३॥

तस्मान्न चाक्षिचरणानुमतोऽत्र शब्दो
नाकाश आश्रयतयाभिमतोऽस्य जैनैः ॥
भिन्नाश्रितं जगदिदन्न ततः कथं स्या-
न्नेत्रोद्भवापि सविकल्पनबुद्धिरेषाम् ॥१७४॥

येनैव योऽत्र सहितोऽसहितोऽपि तेन
नैकान्ततः किमपि सम्मतमागमेऽस्मिन् ॥
योऽनावृतः स तु न तेन भवेद्विशिष्ट
इत्यादि ते न वचनं वचनीयमेव ॥१७५॥

प्राप्तप्रकाशपटु नेन्द्रियमत्र किञ्चा-
वष्टब्धदेशमतिरक्षभवा न किं स्यात् ॥
आधारसङ्कुटितमूर्त्तिरतोऽक्षजन्य
आधेय इष्ट इह भास्यतया च बोधे ॥१७६॥

योग्यत्वमत्र फलगम्यमतः प्रतीतौ
यस्यैव यत्र विषयस्य भवेत्प्रकाशः ॥
पूर्वः परो भवतु वा निकटोऽथ दूर-
स्तस्यास्स एव विषयस्सविकल्पिकायाः ॥१७७॥

तस्मात् कथं सकलपूर्वपरादिभावः
स्याद् गोचरोऽक्षजधियोऽथ च सर्वविस्त्वम् ॥
किं वर्त्तमानमखिलन्तव भासते नो
किं वा तथा निकटवर्त्तिसमस्तभावाः ॥१७८॥

नन्वेवमस्तु सविकल्पकबोधसिद्धि-
स्साकारताऽस्य किमु तद्विपरीतता वा ॥
साकारता सुगतशिष्यमता तु तत्र
जागर्त्ति युक्तिनिवहानुगता न हेया ॥१७९॥

आकारमुक्तमिह नैव निरीक्ष्यते यज्-
ज्ञानं तदज्ञजनकल्पितमेव सन्नो ॥
साकारपक्षविमुखाद्विषयव्यवस्था
ज्ञानात् तथा न नियतान्यमते कथञ्चित् ॥१९०॥

कुम्भः पटोऽयमिह नीलमियञ्च शुक्ति-
रेषा नदी पनस एष इयं वनाली ॥
इत्यादिबोधजनिता व्यवहारयोग्या
साकारवादिनि भवेद् विषयव्यवस्था ॥१८१॥

विज्ञैरपि व्यवहृतौ ननु किं घटाद्या-
कारा मतिर्न्नयनतो विशदावभासा ॥

दीपैर्विना न भवतीति निगद्यते
नोऽनाकारपक्ष इह तेन बुधैरुपेक्ष्यः ॥१८२॥
स्वाकारतार्पकतयैव घटादयः स्युः
सौत्रान्तिकस्य च मते ननु सिद्धिभाजः ॥
बाह्यानुरागविमुखीकृतचित्तयोगा-
चारस्य तेऽपि नहि बोधविविक्तरूपाः ॥१८३॥
आपातमात्ररमणीयमिदं हि बौद्ध-
सन्तानबालवचनं वचनीयमेव ॥
स्याद्वादवादिन इहापि महास्त्रमेष
स्याद्वाद एव विमुखीकुरुते विपक्षम् ॥१८४॥
साकारता मतिगता विषयव्यवस्था-
हेतुर्मता भवति सा ननु तां विनाऽपि ॥
नेत्रादिना नियमितान्नियतस्य बोधात्
तत्रैव तन्नियमनञ्च तथा स्वभावात् ॥१८५॥
वस्तुस्वभाव इह पर्यनुयोगतो नो
हेयस्स्वहेतुबलतोऽचलितस्वरूपः ॥
किन्नान्यथा तव मतेऽपि भवेच्च नीला-
कारोऽप्यताद्दशतयेति परस्य प्रश्नः ॥१८६॥
नीलाद्यथाऽयमभवन्नयनात्तथैव
स्वाकारतार्पकमभून्नयनं कथन्न ॥
वस्तुस्वभावममलं शरणं विहाय
कान्या तवापि गतिरत्र तथैव कल्प्ये ॥१८७॥

साकारबोधमतिरस्ति नवा तथा ते
नान्त्ये प्रसिद्धिरपि तस्य भवेत्कथञ्चित् ॥
आद्येऽनवस्थितिमुखान्न भवेद्विमुक्ति--
स्साकारता यदि भवेन्ननु बोधबोधे ॥१८८॥

साकारता न यदि तत्र तदा कथं स्याद्
बोधव्यवस्थितिकथापि भवन्मतेन ॥
किं वा तयैव न कथं विषयव्यवस्था
साकारताविरहितादपि बोधतस्ते ॥१८९॥

साकारबोध इह किञ्च न चेत्पदार्थं
बाह्यं तवोपगमतो विषयीकरोति ॥
सिद्धिस्तदा भवतु तस्य कुतो न चार्था-
पत्तेर्हि तस्य विषयीकरणन्ततो नो ॥१९०॥

किञ्चानुमानत इयं न पृथक् त्वयेष्टा
व्याप्तिग्रहन्तु विरहय्य न तस्य जन्म ॥
व्याप्तिग्रहोऽप्यविषयीकरणे न तस्य
बाह्यप्रथाविलय एव भवेन्मते ते ॥१९१॥

बिम्बानुमा भवति या प्रतिबिम्बनेन
तत्रापि बिम्बप्रतिबिम्बनभावबन्धः ॥
आकार एष ननु तादृश इष्यते चेद्
बिम्बप्रसिद्धिरपि तर्हि तदन्यतः स्यात् ॥१९२॥

यो वेद बिम्बमतिरिक्तमिहानुबिम्बा-
न्मानान्तराद्भवति तत्प्रतिबिम्बहेतोः ॥

तस्यैव बिम्बविषयानुमतिर्न्न तेषां
साकारता निखिलबोधगता मता यैः ॥१९३॥
बोधक्षणे क्षणिकवादिमते न सत्ता-
कारार्पकस्य विषयस्य मता ततो नो ॥
स्यादन्यकालगतयोर्म्मतिबाह्ययोस्ते
बिम्बादिकल्पनकथापि विचारमार्गे ॥१९४॥
बाह्यो यथैव प्रतिबिम्बति ते मतौ किं
तद्वन्मतिर्न्न प्रतिबिम्बति बाह्य एव ॥
तत्र स्वभावमुररीकुरुषेऽथ किन्नो
तेनैव नोऽप्यभिमता विषयव्यवस्था ॥१९५॥
एतेन तार्किकमताद्विषयत्वबन्धात्
ग्राह्याद्विभिन्नतनुतो विषयव्यवस्था ॥
क्षिप्ता स्वभावशरणा यदि ते तदा स्युः
स्याद्वादिनां सुहृद एव न तद्विपक्षाः ॥१९६॥
वेदान्तिनामपि मते विषयप्रदेशं
गत्वा मनोऽपि बहिरिन्द्रियकप्रणाल्या
साकारवृत्तिपरिणामभवे घटाद्या-
कारत्वयोगि भवतीति न तच्च सत्यम् ॥१९७॥
यस्माच्च तैरपि मता विषयव्यवस्था
साकारवृत्तिजनितैव परञ्च सापि ॥
नो चेत्स्वभावशरणा व्यवतिष्ठते नो
नस्मिँस्तु नेत्रगमनादिककल्पनाऽलम् ॥१९८॥

बौद्धोक्तवत्कपिलशिष्यनिभालितोऽपि
साकारवाद इह वृत्तिगतो न युक्तः ॥
कूटस्थनित्यपुरुषोऽत्र न युक्तियुक्त-
स्तत्प्रक्रिया भवतु येन प्रमाणसिद्धा ॥१९९॥
साकारबोध इह किञ्च मतोऽपि जैनै-
र्बौद्धप्रदर्शितदिशा न तु सोऽभ्युपेतः ॥
ज्ञानं विशेषविषयं प्रतिपाद्यते यत्
साकारमेतदुपयोगतया प्रसिद्धम् ॥२००॥
साकारताविरहितं प्रवदन्ति बोधं
सामान्यगोचरमनल्पविदां वरिष्ठाः ॥
यत्सोपयोग इह दर्शनसंज्ञया वै
नीतः प्रसिद्धिपदवीं जिनतत्त्वविज्ञैः ॥२०१॥
अर्थाभिधानमतयो व्यवहारिभिर्य-
च्चैकेन सद्व्यवहृतौ तु प्रयुज्यमानाः ॥
शब्देन तेन नहि सिद्ध्यति बोधधर्म्मः
साकारतापि बुध तेऽनुमताऽत्र किन्तु ॥२०२॥
साकारबोध इह येन न चाभ्युपेत-
श्शब्दाभिलाप्य इह तेन न किम्मतस्सः ॥
ग्राह्यार्थशक्तवचनान्ननु येन तस्य
न स्याच्च बोध इह सद्व्यवहारयोग्यः॥२०३॥
एकाभिलापविषयत्वबलादभेदो
भेदेऽपि बोधबहिरर्थकयोर्मतोऽत्र ॥

भेदेन सङ्कुटितमूर्त्तिरभेद एव
संसर्गमात्रनियतो यत आर्हतानाम् ॥२०४॥

वैभाषिकः सुगतशिष्य इहाल्पविज्ञ-
स्साकारताविरहितार्थमितिं यदापि ॥
ब्रूते तदापि न जिनागमनीतितस्तां
स्पष्टीकरोति तत एव बुधैरुपेक्ष्यः ॥२०५॥

बोधं तदर्थमपि येन समानहेतु-
सामग्र्यतस्स समकालमुवाच बौद्धः ॥
युक्तस्स किं यत इह व्यतिरिक्तहेत्वो-
र्भिन्नक्षणे तदुभयोर्जननं प्रसिद्धम् ॥२०६॥

ग्राह्यं बहिः स्थितमबाधितबोधभास्यं
किन्नर्त्तकीनयनचेष्टितमीक्ष्यते नो
साधारणं परिषदा तत एव योगा-
चारप्रपञ्चितमतन्न विचाररम्यम् ॥२०७॥

नीलादिता भवतु तेऽत्र कुतः प्रमाणात्
ग्राह्ये न किन्तु मतिमात्रगतैव बौद्ध ॥
साकारतादिघटना नियता न बाह्य-
मर्थं विना नियतमज्ञ तथापि बोधे ॥२०८॥

यस्मात्पृथग्भवति यो नियमेन तस्माद्-
भिन्नोपलम्भविषयस्स निरीक्ष्यतेऽत्र ॥
नीलादिकस्तु मतितो न कदाचिदेव
भिन्नोपलम्भविषयस्स कथन्तदन्यः ॥२०९॥

इत्थन्न चानुमितिरत्र तव प्रमाणं
सुस्पष्टदृष्ट इह हि व्यभिचारदोषः ॥
भिन्ना प्रभापि नियमेन घटादिना यत्
सार्द्धं प्रकाशविषयो न पृथक्त्वतस्तु ॥२१०॥
किं वा न चित्रमतिरत्र पृथक्पदार्थात्
संवेद्यते भवतु येन न हेत्वसिद्धिः ॥
निलादिभिन्नतनुरेव यतस्तु पीता-
कारो मतो स्फुटवपुः प्रथते न चैक्यात्॥२११॥
ज्ञानादभिन्नतनुता यदि चेत्तवार्थे
पीतान्न नीलमपि भिन्नमभेदतः स्यात्॥
ज्ञानं यदेकमुभयादपृथक्स्वरूपं
चित्रन्त्वयैव विनिभालितमत्र चित्रम् ॥२१२॥
नो नीलपीतरचितव्यतिरिक्तचित्रा-
कारोऽपि चित्रमतिगोऽत्र निरीक्ष्यते ज्ञैः॥
नीलादिभिन्नतनुतैव भवेच्च येन
ते चित्रबुद्धिनियता खलु चित्रताख्या ॥२१३॥
अर्थक्रिया घटपटादिपृथक्स्वभावा-
न्नैका विरुद्धघटनात् तत एव बाह्ये ॥
भेदो यथा ननु तथा प्रतिभाससाङ्क-
र्य्यापत्तितो न च कथम्मतिगोऽपि भेदः॥२१४॥
किन्नो घटोऽयमितिवत्तव सम्प्रदाये
ज्ञानं घटः पटमठाविति वाग्विलासः ॥

पूर्वः परोऽथ नियमो न च दृश्यते योऽ-
भिन्नो हि येन प्रथितश्च तयोः प्रयोगे ॥२१५॥

तादात्म्यतो विषयता नियता मतेर्हि
ग्राह्यं घटादि यदि तेन मतेरभिन्नम् ॥
सर्वज्ञता सुगततोऽपगता तदा ते
सर्वस्य चैक्यमुत वा तदभिन्नतातः ॥ २१६ ॥

नो लाघवाद् भवति मानवहिष्कृताद्वा
वस्त्वैक्यसिद्धिरिह येन तव व्यवस्था ॥
तत्त्वे कथं घटपटादिपदार्थजातो
नैकस्वरूप इति किन्न भवेत्प्रसङ्गः ॥२१७॥

पूर्वं य एव भवता विनिभालितोऽश्वो
दृष्टोऽद्य सैव तु मयेति बहिष्पदार्थे ॥
सञ्जायते मतिरसौ सदृशत्वतस्ते
सादृश्यमत्र मतितो न कथं विभिन्नम् ॥२१८॥

नीलस्य बोधत इयं पृथगेव बुद्धिः
पीतत्वगोचरतयेति मतिस्तथा नो ॥
विज्ञानतैव यदि सर्वपदार्थगा स्याद्-
बाह्यक्षयाद् भवितुमर्हति तर्हि विद्वन् ॥२१९॥

बुद्धोऽस्म्यहं परिजना मम सर्वबौद्धा
इत्यादिबुद्धिरिह चेद्यदि चान्त्यजानाम् ॥
किन्तर्हि ते न गुरवो भवतां भवेयु-
र्लब्धो महानिह गुणस्सुगतेन शिष्यात् ॥२२०॥

किञ्चास्ति मुक्तिरिति बोधत एव मुक्ति-
स्सम्पत्स्यते तव वृथा सुगतस्य सेवा ॥
प्रेक्षावताऽपि सुगतेन वृथैव शास्त्रे
धर्म्मप्रदर्शनमकार्यपवर्गसिद्ध्यै ॥२२१॥

यद्वासनातिपरिपाकवशाद्विनाऽर्थं
ज्ञानादिभेद इह तेऽनुमतो न सोऽपि ॥
युक्तो यतो भवतु सापि कथं विचित्रा
बाह्यं विना न परिपाककथाऽपि तस्याः ॥२२२॥

स्वप्नोपमं यदि तु बोधतयैव सर्वं
ज्ञानं ततस्सविषयं नहि तद्वदेव ॥
इत्थन्तदा तव भवेद्यदि बाधितार्था
जाग्रद्दशामतिरपीह न चैवमेषा ॥२२३॥

यः स्पष्टबोधविषयस्स मृषैव बोध्यः
स्वप्नोपलब्धकनकादिपदार्थवच्चेत् ॥
बोधोऽपि सिद्धिपदवीन्न तदाऽत्र गच्छेत्
संवेदनाद्विशदतस्स्वत इत्यनर्थः ॥२२४॥

विज्ञानवादमवलम्ब्य तथा कथायां
वादी जयेन्न प्रतिवादिजनं कदापि ॥
वादी न चास्ति प्रतिवाद्यपि नैव नो वा
मध्यस्थ इत्यपि विचारय बौद्ध चित्ते ॥२२५॥

वैज्ञानिकं भवति सत्त्वमथात्र तेषां
नो पारमार्थिकमिदन्तव सम्मतश्चेत् ॥

विज्ञानमत्र किमु सत्यतया मतन्ते
किंवा भ्रमात्मकमिह प्रथमं यदीष्टम् ॥२२६॥
नान्यत्तदा भवति सत्त्वमतो मते नो
नामान्तरं भवतु तच्च न तेन हानिः ॥
द्वैतीयके तु निखिलोऽपि विनैव बाधां
भ्रान्तः कथं भवतु बोध उपेय आप्तैः ॥२२७॥
अर्थो ह्यसँस्तवमतोऽथ च तेन बोधोऽ-
भिन्नः कथम्भवतु वा किमु सोऽप्यसन्नो ॥
अर्थोऽथवा भवतु सन्सदभेदवत्त्वा-
न्नोऽभिन्नता सदसतोरुपपद्यते यत् ॥२२८॥
भिन्नङ्किमर्थमवगाहत एष बोधो-
ऽभिन्नश्च वा न तदुभयव्यतिरिक्तमस्ति ॥
आद्ये कथन्न भुवनत्रयवर्त्तिभाव-
सार्थप्रथा भवति ते व्यतिरिक्ततातः ॥२२९॥
द्वैतीयके तु बहिरर्थविलोप एव
विज्ञानवादिमतसेवनयाऽऽगतस्ते ॥
किं वर्त्तमानमुत तद्व्यतिरिक्तमेवं
ग्राह्यं प्रकाशयति बोध इहाद्यपक्षे ॥२३०॥
आद्ये कथन्नहि भवेन्निखिलस्य बोधो
देशान्तरस्थितिमतोऽप्यविशेषतो वः ॥
नो वर्त्तमानविषया मतिरन्त्यपक्षे
इत्यादिदोषघटना तव किन्न विद्वन् ॥२३१॥

यो भासते स विषयो बुध नो मतोऽत्रा-
भिन्नोऽथ भिन्न इति वा नियमो न चास्ति ॥
स्याद्वर्त्तमानमथवा विपरीतमेवा-
नेकान्ततः सुगतशिष्य कथं हि दोषः ॥२३२॥
ज्ञानेऽपि वा भवतु किञ्च मतिः कथन्ते
तादात्म्यतः क्षणिकतादिविशिष्टरूपे ॥
तत्त्वे क्षणक्षयितया स्वत एव बोधः
सिद्धो भवेदनुमितेरनपेक्षणं स्यात् ॥२३३॥
नानन्तधर्म्मघटनाऽभिमतैकरूपेऽ-
प्यस्त्याश्रये तव यतोंऽशविभागतस्स्यात् ॥
बोधेऽप्यबोध उत वाऽक्षणिकत्वमिथ्या-
रोपादिकल्पनमिति प्रविचारयान्तः ॥२३४॥
किञ्चानुमानमपि नैव विभिन्नमर्थं
स्वस्मात् प्रकाशयति येन ततोऽपि सिद्ध्येत् ॥
ज्ञानं क्षणक्षयितया न च ते मते स्याद्-
व्याप्तिप्रसिद्धिरपि सर्वसमन्वयेन ॥२३५॥
एतेन तेऽनुमितितोऽनुमतश्च बोधे
तादात्म्यमर्थप्रतियोगिकमप्यपास्तम् ॥
व्याप्तिग्रहस्य विलयादखिलानुमाया
उच्छेद एव नयतस्तव सिद्धिमेति ॥२३६॥
ज्ञानेषु चेद्यदि विभिन्नधियः प्रकाशो
बाह्येषु तर्हि न स किन्नु मतोऽपि येन ॥

द्वेषोऽपि तेषु न भवेत् तव निर्निमित्तो
जन्मान्धताऽपि तव नश्यतु बाह्यदृष्टेः ॥२३७॥
स्थूलो न बोध इह तेऽनुमतश्च किञ्च
यस्मात् स्वलक्षणमणूपगतन्त्वयैव ॥
अण्वात्मकस्तु न कदाचिदपीक्ष्यते स
बोधः कथं भवतु बोधविभासिताङ्गः ॥२३८॥
उत्पत्त्यवस्थितिविनाशसमन्वयेन
सत्त्वं स्वरूपत इहार्थगतं प्रसिद्धम् ॥
ज्ञानं विनापि न कथं व्यवतिष्ठतेऽर्थो-
दृष्टयार्थसृष्टिपरिकल्पनमप्रमाणम् ॥२३९॥
योग्योपलब्धिविरहाद्विरहो घटादे-
स्सिद्धिं प्रयाति न तु केवलबुद्ध्यभावात् ॥
योग्यत्वमत्र प्रतियोग्युपलम्भकस्य
स्वव्याप्यभिन्ननिखिलस्य भवेच्च सत्त्वम् ॥२४०॥
एवञ्च सन्नपि घटोऽत्र यदा न दृश्यो-
ऽयोग्यत्वमेव तु तदाऽभ्युपगन्तुमर्हम् ॥
नैतावता विरह एव भवेच्च योगा-
चारप्ररूपितदिशा जगतोऽखिलस्य ॥२४१॥
प्रद्वेष एष तव चेद्यदि बाह्यभावे
ज्ञाने क्षणक्षयनिरूपणमर्थवन्नो ॥
आत्मा त्रिकालकलितो ननु बोधरूपो
वेदान्तिनामिव कथन्न मते तवापि ॥२४२॥

सामर्थ्यतद्विरहरूपविरूद्धधर्म्मा-
ध्यासादभिन्नतनुरेष मतो न ते चेत् ॥
ज्ञानं क्षणक्षयमपि प्रमितन्त्वया नो
युक्तं विरुद्धघटनात इहैकरूपम् ॥२४३॥
ज्ञानं स्वसन्ततिगतं विदधाति बोधो
नो भिन्नसन्ततिगतन्तव सम्मतन्तत् ॥
इत्थं विरुद्धघटना क्षणिकेऽपि बोधे
किं स्वान्यसन्ततिसमाश्रयणान्न चास्ति ॥२४४॥
स्वादर्शनान्न परसन्ततिरस्ति तर्हि
तेनास्य दृष्टिविरहान्न कथं ह्यसत्त्वम् ॥
संवेदनात् स्वत इहास्य यदि प्रसिद्धिः
किन्तर्हि तस्य तत एव भवेन्न सिद्धिः॥२४५॥
किञ्चान्यसन्ततिलये सुगतोऽपि नो ते
सर्वज्ञ इष्ट उत वा निखिलोऽपि स स्यात् ॥
ज्ञानं विलक्षणमथास्य विनैव युक्त्या
नान्यस्य चेतसि पदं विदधाति बौद्ध ॥२४६॥
किञ्चालयाद्भवतु बोधत एव कस्मा-
ज्ज्ञानं द्विधा तव प्रवर्त्तकमालयञ्च ॥
तत्त्वेऽथ वा शबलवस्तु न किन्त्वयाऽपि
तद्जिनागममतं बहिरादृतं स्यात् ॥२४७॥
नो सन्ततिर्भवति किञ्च मता तवैका
स्याच्चेद्विवाद इह नाम्नि तु केवलं स्यात् ॥

बन्धो न मुक्तिरपि नो न च वासनादिः
सन्तानतस्तव मतो भविता तदानीम् ॥२४८॥

(तदुक्तमुदयनाचार्येण),

(न ग्राह्यभेदमवधूय धियोऽस्ति वृत्ति-
स्तद्बाधने वलिनि वेदनये जयश्रीः ॥
नो चेदनिन्द्यमिदमीदृशमेव विश्व-
न्तथ्यं तथागतमतस्य तु कोऽवकाशः॥)

सौत्रान्तिकोऽस्तु विमुखो विमुखोऽस्तुयोगा-
चारो हि तौ न सुगताभिमतार्थविज्ञौ ॥
वैभाषिकोऽपि तत एव न युक्तवादी
किं शून्यता भवतु माध्यमिकैर्मता नो ॥२४९॥

नात्मा न बोध इह नैव घटादिबाह्य-
स्साकारतादिघटना कुत एव बोधे ॥
सर्वे विचारपदवीमुपनीयमाना-
स्तिष्ठन्ति नो यत इमे विबुधैस्तु युक्त्या॥२५०॥

संवृत्तिसत्त्वमुपगीयत एतदेषां
यद्व्यावहारिकप्रथा सकलापि लोके ॥
बाह्यो यथा भवति नैव धिया विना सन्
बुद्धिस्सती नहि तथा स्वधियं विनैव ॥२५१॥

अन्त्यस्य सत्त्वविगमो यदि बुद्ध्यभावात्
तत्पूर्वपूर्वमपि किन्न भवेच्च शून्यम् ॥

स्वेनैव सिद्धिरपि नात्र निजाश्रयेण
बुद्धयन्तरानुसरणे त्वनवस्थितिः स्यात् ॥२५२॥
ग्राह्योऽणुरूप उत वात्र महान् घटादिः
किं वोभयन्न प्रथमोऽत्र प्रतीयतेऽक्ष्णा ॥
अंशादिवृत्तिविलयान्न भवेद् द्वितीयो
व्याघाततो नहि भवेच्च तृतीयपक्षः ॥२५३॥

किं कारणं विषय इष्ट उतान्य एव
ज्ञानस्य तत्र प्रथमो यदि सम्मतस्ते ॥
वाच्यस्तदा भवति सातिशयस्स हेतुः
किं वा विनाऽप्यतिशयं चरमोऽत्र सन्नो॥२५४॥

तत्वे प्रथा भवति किं व्यवधानभाजां
हेतुत्वतो न विशदाक्षधियोऽविशेषात् ॥
आद्ये यदि त्वतिशयोऽतिशयान्तरेण
किन्नानवस्थितिरपर्यवसानतस्तत् ॥२५५॥
यद्यन्तरातिशयमेव भवेत्स हेतौ
सर्वत्र किं भवति न ह्यविशेषतस्तत् ॥
द्वैतीयकेऽजनकमप्युपगम्यते चेद्
ग्राह्यन्तदा न नियमोऽत्र धियां प्रकाश्ये॥२५६॥

किञ्च व्यवस्थितिरियं निखिलेषु मानात्
प्रमाणिकैरुपगता न तु बोधमात्रात् ॥
मानान्तराद्भवति तस्य पुनः प्रसिद्धि-
रेषाऽनवस्थितिलतार्थमतावनर्था ॥२५७॥

भ्रान्तिः प्रमेति नहि बोधगतो विशेषः
स्वप्ने प्रबोधसमये च यतो विशेषः ॥
संवादितादिघटनाप्युभयोस्समाना
नापातमात्रमधुरा ह्यविवेकिनां किम् ॥२५८॥
बोधो भ्रमो भवति बाधितगोचरत्वात्
ज्ञानान्तराद्बहुविधोऽत्र विकल्पजालः ॥
ज्ञानान्तरेण किमु तस्य निजस्वरूप-
हानिर्भवेत् किमुत तद्विषयस्य लोपः ॥२५९॥
आद्ये विनाशजनकात् प्रमितेर्विनाशो
यद्वत्तथा भ्रममतेः स न बोधतोऽस्मात् ॥
किं बाधिता पटमतिर्घटबुद्धितो नो
पूर्वा तथोत्तरजनेरित एव हेतोः ॥२६०॥
लोपस्सतोऽथ विषयस्य न शक्यतेऽन्त्ये
कर्त्तुं नु केश्चिदसतोऽपि न युज्यते सः ॥
मिथ्यात्वमस्य स हि बोधयतीति चेत्स
तद्ग्राहकः किमु मतः किमु वाऽन्य एव॥२६१॥
चेद्ग्राहकः स्वविषयं स हि बाधतां नो
तत्त्वे भ्रमत्वमपि तस्य भवेत्कथन्न ॥
अग्राहको यदि तदाऽग्रहणान्न बाधा
स्याद्वा कथन्निखिलमेव ततो न बाध्यम् ॥२६२॥
मिथ्यात्वबोधनमपीष्टमभिन्नकाले
भिन्नक्षणेऽथ प्रथमो यदि सम्मतस्ते ॥

नो तर्हि पूर्वमतिगोचरबाधनं स्या-
दन्त्ये विभिन्नसमयाग्रहणान्न बाधा ॥२६३॥
किं वा यथोत्तरमतेः प्रथमा मतिस्स्याद्
बाध्या तथैव किमु नोत्तरधीश्च तस्याः ॥
अन्योन्यगोचरविरुद्धमतित्वमाभ्यां
व्यावर्त्तते न हि यतः प्रथमस्य बाधः ॥२६४॥
संवादनं भवति सत्यमतौ यथा ते
ज्ञानान्तराद् भवति तद्वदिहापि किन्नो ॥
द्वित्वन्न चन्द्रमसि तैमिरिका अनेके
पश्यन्ति किं ह्यभिलपन्ति न किं मिथस्ते॥२६५
जाग्रद्दशोत्थमतितो ननु यद्वदेव
स्वप्नोत्थधीविषयबाधनमस्ति तद्वत् ॥
स्वप्नात् प्रबोधविषयस्य न बाधनं किं
नैते दशे अपि मिथो भवतो विभिन्ने ॥२६६॥
यद्बाधकं तदपि बाध्यमबाधकं स्या-
न्मानान्तराच्च तदबाध्यतया मतञ्चेत् ॥
मानान्तरन्तदपि बाध्यतया प्रतीत-
न्तत्साधकं भवति नेति दृढानवस्था ॥२६७॥
संवादकं यदपि तत्र मतं भवेत्तत्,
किञ्चित्करं किमुत वा न करोति किञ्चित् ॥
आद्ये त्वभिन्नमुत वा व्यतिरिक्तमेव
संवाद्यबुद्धित इदं प्रकरोति तच्च ॥२६८॥

संवाद्यबुद्धिजननं प्रथमे न युक्तं
संवादकात् क्वचिदसौ न च दृष्टपूर्वम् ॥
अन्त्येऽतिरिक्तजननेऽपि न पूर्वबुद्धौ
व्यावर्त्तकं भ्रममतेरभवच्च किञ्चित् ॥२६९॥

यश्चोपकार उपदर्शितबुद्धितोऽभूत्
संवाद्यबुद्ध्यसमकालतयैव नास्याः॥
भिन्नस्स वा किमपि तत्र करोति नो वा
तत्रानवस्थितिघटा प्रथमेऽनिवार्या ॥२७०॥

अन्त्ये विशेषविरहाद्भ्रमतुल्यतैवा-
सम्बन्धतो भवति तेन हि पूर्वबुद्धेः ॥
अन्त्ये विशेषविरहाद्भ्रमतुल्यतैव
संवादकात् किमपि न क्रियते यतोऽस्याः॥२७१॥

अर्थे फलं किमपि किञ्च करोति बोधो
नो वा करोति यदि किं व्यतिरिक्तमर्थात् ॥
अर्थस्वरूपमुत वा प्रथमेऽनवस्था
पूर्वप्रदर्शितदिशाऽत्र दुरुद्धरैव ॥२७२॥

अन्त्ये यथार्थजननं प्रमया तथैव
भ्रान्त्यापि किन्न न विशेष इहास्ति कश्चित् ॥
बोधः फलं किमपि नार्थगतं विदध्या-
दन्त्ये यदा न नियमोऽपि तदा कथञ्चित्॥२७३

ज्ञाने घटाद्यपि करोति यदा विशेषो
भिन्नेऽनवस्थितिरिहापि च पूर्वनीत्या ॥

ज्ञानस्वरूपजनने न विशेष एव
  कश्चिद्यतो भवतु ते नियमोऽर्थतोऽपि ॥२७४॥
प्रामाण्यमर्थघटितं न विनार्थसिद्धिं
  ज्ञाने प्रसिद्ध्यति न सापि तमन्तरेण ॥
प्रामाण्यबुद्धिमनपेक्ष्य प्रमा न मान्या
  तत्त्वेऽप्रमापि तव किन्न प्रमाभ्युपेया ॥२७५॥
प्रामाण्यबुद्धिरपि नैव प्रमास्वरूपा
  स्वस्मिन् प्रमात्वमतिमङ्गगतान्निवेश्य ॥
किन्त्वन्यया भवति साप्यतिरिक्तबुद्ध्या
  सिद्ध्येत्प्रमात्मकतयेत्यनवस्थितिश्च ॥२७६॥
एवं भ्रमत्वमपि न प्रमितिं विनैव,
  भ्रान्तौ प्रसिद्ध्यति प्रमापि तथाऽन्यथा स्यात् ॥
इत्यादिदोषगणभीतिविविक्तरूपं
  शून्यत्वमेव सकलानुगतन्तु तत्त्वम् ॥२७७॥
एतच्च बौद्धपरिशीलितयुक्तिजालं
  युक्तं स्वशिष्यगणमात्रमनोऽधिरूढम् ॥
स्याद्वादलाञ्छितपदार्थतिरस्क्रियायां
  सामर्थ्यलेशमपि नैव दधाति यस्मात् ॥२७८॥
यन्त्वं विचारमधिकृत्य जगद्व्यलीकं
  ब्रूषे स सँस्तव भवेदुत वा व्यलीकम् ॥
आद्ये तथैव न भवन्तु समस्तभावाः
  किं सिद्धिभाज इतरेऽपि न शून्यता ते ॥२७९॥

अन्त्ये स्वयं ह्यसत एव विचारतो न
शून्यत्वसिद्धिरपि येन जगद्व्यलीकम् ॥
प्रामाणिकैस्सह कथापि न युज्यते ते
कस्ते भवेच्च प्रतिमल्ल इहाल्पविज्ञ ॥२८०॥
शून्यत्वगोचरप्रमा यदि सम्मताऽस्ति
मानन्तदा तव मतेऽपि न शून्यतावत् ॥
नो चेत्तदा प्रमितिगोचरचारिणी नो
स्याच्छून्यता जगति येन भवेत्प्रसिद्धा ॥२८१॥
ज्ञानं विनाऽपि जगतः स्वत एव सत्त्वं
संवृत्तिसत्त्वमत एव न सम्मतं नः ॥
ज्ञानानवस्थितिभयान्न ततोऽप्यसत्त्वं
जाग्रत्सु वस्तुषु भवेत्तव रोदनेन ॥२८२॥
नात्माश्रयो भवति बोधमतेः स्वतस्त्वे
प्रामाणिके विबुध दोषतयाऽभ्युपेयः ॥
संवृत्तिसत्त्वमपि जैनमताऽवलम्बा-
द्युक्तन्न किं व्यवहृतेरुपयोगि लोके ॥२८३॥
ग्राह्यं विकल्प्य तव खण्डयतोऽत्र भावः
कः किं घटादि नहि भासत एव बोधे ॥
तद्भासमानमपि वा न विचारमार्गं
युक्त्या प्रयाति तत एव न चाभ्युपेयम् ॥२८४॥
आद्यस्तवापि नहि सम्मत इष्यते यत्
संवृत्तिसत्त्वमखिलेष्वपि लोकदृष्ट्या ॥

एकान्तमेव न विचारविशुद्धरूप-
मन्त्ये प्रसिद्ध्यतु कथन्न जिनोक्तभावः ॥२८५॥
स्थूलो घटादिरणुरूपतयाऽपि जैनै-
र्द्रव्यस्वरूपमवलम्ब्य निमित्तभेदात् ॥
इष्टस्तथा स बहुशक्तिसमन्वयेना-
नेकांशवृत्तिरपि तैश्च कथञ्चिदेकः ॥२८६॥
यत्कारणं भवति तद्विषयस्तदन्य-
द्वेत्थन्न चात्र नियमो जिनसम्प्रदाये ॥
यत्तत्तदावरणकर्म्मलयोपशान्त्या-
देर्जायते नियतगोचर एव बोधः ॥२८७॥
यत्कारणं बहुविकल्प्य विचारमार्गाद्-
दूरीकृतन्तदपि वाक्छलमेव सर्वम् ॥
यस्माद्विकल्पनिकरो जनकापलापे
किं कारणं तव मतं किमु वा न चैव ॥२८८॥
आद्ये विकल्पनिकरं स्वयमेव तत्रा-
प्यालोच्य वाङ्नियमनं भवता विधेयम् ॥
अन्त्ये कथन्न जनकं स्थिरतामुपैतु
बाधां विकल्पनिकरान्न च प्राप यत्तत् ॥२८९॥
मानन्न मानमतिरिक्तमपेक्षते त-
न्नैवानवस्थितिरपीह विचारतस्ते ॥
किं वा विचार उपदर्शित एष तेऽपि
सिद्धिं प्रयातु कथमत्र तथैव बौद्ध ॥२९०॥

स्वप्नेऽस्थिरं चलमसम्भवितात्मजन्मा-
व्यालोचनादि च परस्परबाधितञ्च ॥
ज्ञानं प्रबोधसमये तु विविक्तमस्मा-
देवं स्थितौ हि न तयोर्व्यतिरिक्तता किम् २९१

यत्काकतालमिव सत्यमतोविव स्यात्
स्वप्नेऽपि यद्यपि समानमतेर्विलासात् ॥
संवादितादिघटनान्धपरम्परेव
किं स्यात्तथापि नहि बाधितगोचरत्वम् ॥२९२॥

सत्यत्वनिर्णयमतिस्तु भवेच्च जाग्रत्-
स्वस्थप्रबोधमतितोऽर्थविनिर्णयेन ॥
स्वप्नेऽप्यसत्प्रथनमिष्टमनल्पविज्ञै-
र्जैनैर्न्न यद् भवतु तेन कथन्न भावः ॥२९३॥

नासन्मतौ तव तु कारणमस्ति किञ्चि-
न्नो वासनापि नियता तु विना पदार्थम् ॥
किन्त्वन्यथा प्रथनमेव जिनागमज्ञै-
स्स्वप्ने निरूपितमतोऽन्यप्रथैव तस्मात् ॥२९४॥

नैयायिकैरपि न तत्र मतं व्यलीक-
भानन्न वा कपिलजैमिनितन्त्रविज्ञैः ॥
किन्त्वन्यथाप्रथनमेभिरपि प्रशस्तं
वेदे त्वनिर्वचनगोचरतैव तस्य ॥२९५॥

ख्यातिस्सतां भवति न त्वसतामभावात्
स्वाकारसंवरणतोऽन्यपरिग्रहाच्च ॥

स्वप्ने प्रथाऽर्थनिकरस्य यथैव शुक्ते-
श्चाक्चिक्यदोषवशतो रजतस्वभावात् ॥२९६॥
प्राभाकरेण भयतस्तव बोधमात्रे
याथार्थ्यमेव प्रथितं भ्रमताविरोधि ॥
भेदाग्रहस्त्वभिमतः स्मरणाक्षबुद्ध्यो-
स्तत्ताप्रमोष उपपादित एतदर्थम् ॥२९७॥
वन्ध्यासुताच्च खसुमं पृथगेव लोके-
ऽसत्त्वाविशेषकलनेपि मतं भवेत्तत् ॥
किञ्चान्यथाप्रथन एव तथा विवक्षा-
वैचित्र्यमप्यसति तन्न भवेत्कथञ्चित् ॥१९८॥
प्रत्येकशब्दसमयाच्छशशृङ्गवाक्याद्-
बोधोऽन्यथाप्रथन एव भवेद्गृहीतात् ॥
सङ्केतहेतुघटनाऽपि न च व्यलीके
शाब्दप्रवृत्तिरपि नो नियता विना ताम् ॥२९९॥
पूर्वं मया रजतरूपतयैव दोषा-
च्छुक्तिस्त्वियं विशदतोऽवगता पुरः स्था-
इत्यादिबुद्धिबलतो भ्रमताप्रसिद्धि-
र्नो रोदनात्तव भवेदपहातुमर्हा ॥३०००॥
प्राभाकारस्य मतमप्यनयैव युक्त्या
किं खण्डितं भवति नो यदि नो मतं सः ॥
आश्रित्य तिष्ठतु सदा न भयस्य लेश-
स्तत्तादिमोषमननभ्रमतोऽपि मुक्तिः ॥३०१॥

एतेन सिद्धमसदेव तवोक्तिजालं
यद्बाधितार्थविषयत्वनिराक्रियार्थम् ॥
येन भ्रमत्वमननं सुदृढं भ्रमे स्यात्
तत्सर्वमेव ननु बाधकमिष्टमिष्टैः ॥३०२॥
तद्ग्राहकोऽन्यविषयोऽथ च तुल्यकालः
किम्वान्यकाल इति नात्र विशेष इष्टः ॥
स्याद्वादिना भ्रममतित्वविनिर्णयो ये
स्ते बाधका बुधविकल्पभरेण तेऽलम् ॥३०३॥
अन्योन्यगोचरविरुद्धमतित्वसाम्ये-
ऽप्येकं भ्रमत्वमपरत्र प्रकाशयेद्यत् ॥
तद्बाधकं भवति तस्य प्रमास्वरूपं
पूर्वं भवेद् भवतु वोत्तरमन्यदेतत् ॥३०४॥
शुक्तौ यथोत्तरमतेः प्रथमस्य बाधो
दृष्टस्तथा प्रथमतो न किमुत्तरस्य ॥
किं वर्त्तमानमपि शौक्ल्यमतिर्न्न शङ्खे
पीतत्वबोधमुपहन्ति जनस्य पूर्वा ॥३०५॥
द्वित्वञ्च चन्द्रमसि यद्यपि दोषसाम्यात्
पश्यन्ति येऽपि मिथ एव तदालपन्ति ॥
तेषान्तथापि किमु नैक्यमतेः स्मृताया
भ्रान्तित्वनिर्णय उदेति तथाप्तवाक्यात् ॥३०६॥
नैकान्ततो भवति च भ्रमतैव तस्य
चन्द्रे च सत्यमतिताऽपि मतार्हतानाम् ॥

तस्मात्कथं कथय शून्यतयैव विश्वं
स्वीकार्यमन्धजनताप्रणिगद्यमानम् ॥३०७॥
संवेदनात् स्वत उभे च दशे प्रबोध-
स्वप्नात्मके प्रतिजनं पृथगेव भातः ॥
प्रामाण्यतद्विरहरूपतया तथाऽत्र
स्वप्ने व्यलीकप्रथनन्नहि सर्वथाऽस्ति ॥३०८॥
अर्थक्रियावगतिरन्यप्रमां विनैव
मानं स्वतो भवति मानतया गृहीता ॥
तस्यास्तु साधनमतेः प्रमितत्वबुद्धि-
र्नैकान्ततः परत एव प्रमात्वबुद्धिः ॥३०९॥
एतेन गौतममतन्तव युक्तिजालान्-
मीमांसकस्य च मतन्निरुपद्रवन्नो ॥
एकान्ततः परत एव प्रमात्वसिद्धि-
रेकान्ततोऽपरत एव मता हि ताभ्याम् ॥३१०॥
यैस्तु प्रमात्वमतिरन्यमतौ प्रसिद्ध्येत्,
संवादका ननु भवन्ति त एव बोधाः ॥
तुल्यावगाह्यसमगोचरतादि जैनै-
र्नैकान्ततो नियमतश्च मतन्तथात्वे ॥३११॥
किञ्चित्करादिकविकल्पभरेण ते चेत्
संवादखण्डनमगर्ह्यमविज्ञ तर्हि ॥
सिद्ध्येद्विकल्पनिकरोऽपि कथं स्वहेतो-
स्तत्राप्यरण्यरुदितन्निखिलन्त्वदुक्तम् ॥३१२॥

संवादखण्डनमनेन यदि व्यलीकं,
संवादसिद्धिरिह तर्हि भवेदबाध्या ॥
सत्यं मतं यदि तदा नहि सर्वमेव,
शून्यं तवोपगमतोऽपि प्रसिद्धिमेतु, ॥३१३॥
ग्राह्यो जडोऽत्र किमु नो न तथास्वभावात्,
किं ग्राहकोऽपि तत एव भवेन्न बोधः ॥
वह्निर्यथा दहति काष्ठमसौ तथा किं,
नाग्निं स्वभावबलमेव भवेदिहापि ॥३१४॥
शून्यत्वसिद्धिरिह ते ननु यैर्विचारै-
स्सत्यत्वसिद्धिरपि तैर्न्न कथं जगत्सु ॥
इत्यत्र किं बुध तवापि तमन्तरास्ति,
वादे विपक्षदलने हि गतिर्द्वितीया ॥३१५॥
ग्राह्योऽपि बोध इह संविदितो निजेन,
नो नो विरोधघटना प्रमिते स्वभावे ॥
स्वेष्टप्रसाधकतया तव सम्मतः किं,
नान्येष्टबाधकतयाऽभिमतो विचारः ॥३१६॥
ग्राह्यस्वभावपरिणामतया तु बाह्यो,
ज्ञानेन बोध इह बोधकतास्वभावः ॥
अर्थेन किन्नहि कथञ्चिदनन्तधर्मा,
सञ्जायते भवतु येन विकल्पदुष्टः ॥३१७॥
एकान्तवादमवलम्ब्य प्रदर्शितो न,
दोषोऽत्र जैनसरणौ लभते प्रतिष्ठाम् ॥

आपादनं भवति सर्वमनिष्टरूपं,
स्याद्वादवादिनि न तस्य यतोऽवकाशः ॥३१८॥
अर्थप्रसिद्धिरपि न प्रमितेर्विभिन्ना,
प्रामाण्यबुद्धिरपि तत्र च पूर्वनीत्या ॥
अन्योन्यसंश्रयघटा नहि विद्यतेऽत्र,
भ्रान्तित्वसिद्धिरपि तद्वदिह प्रसिद्धा ॥३१९॥
अर्थाननर्थजनकाननुचिन्त्य बौद्ध,
नैरात्म्यदर्शनमतं प्रकटीकरोषि ॥
तत्रापि तेऽस्ति नहि वासनया विनैव,
लोकव्यवस्थितिरतस्तु महाननर्थः ॥३२०॥
मा वासनाजलभृतान्धुपरम्परायां,
लोकाः पतन्त्विवति पदार्थततौ विचिन्त्य ॥
लोकोपकाररसिकोऽपि किमर्थमज्ञ,
स्याद्वादतन्त्रममलं न करोषि चित्ते ॥३२१॥
नैयायिकोपगतमिन्द्रियमप्रमाणं,
साक्षात्प्रमाजनकताविरहात्तथा चेत् ॥
अन्नादि तर्हि न परम्परयाऽपि किन्तै-
र्मानम्मतं जनकताघटनाच्च तद्वत् ॥३२२॥
जैनैर्द्विधेन्द्रियनिरूपणमुक्तमत्र,
द्रव्येन्द्रियं प्रथमतो द्विविधश्च तत्र ॥
शक्तिर्म्मतोपकरणेन्द्रियमिन्द्रियाणा-
न्निर्वृत्तिरूपमपरं खलु गोलकादि ॥३२३॥

भावेन्द्रियन्तदिव लब्ध्युपयोगभेदा-
दन्त्यं द्विधा प्रथममावरणक्षयादि ॥
ज्ञानं द्वितीयमुपयोगतया प्रसिद्धं,
साक्षात्तदेव जनकं प्रमितेर्हि मानम् ॥ ३२४ ॥

किञ्चेन्द्रियं भवति नार्थमतौ समर्थं
कुम्भादिवज्जडतयाऽस्वप्रकाशकत्वात् ॥
तद्भौतिकन्तिव्र मतश्च सुषुप्तिकाले
किन्तूलिकादिषु मतिर्न्न करोति सत्त्वात्॥३२५॥

नो मानसं भवति चाणु यतस्तदास्य
बाह्येन्द्रियेण घटनाविलयान्न बोधः ॥
स्यादिन्द्रियत्वत इदं च महत्त्वयोगि
नेत्रादिवत्तव मतेन कथन्न विद्वन् ॥३२६॥

लब्धीन्द्रियक्रमविशेषवशात् क्रमोऽपि
नेत्रादिजन्यमतिषूपगतोऽत्र जैनैः ॥
नास्मिन्मते मनस इन्द्रियताऽप्यभीष्टा
प्रोक्तं ह्यनिन्द्रियमिदं जिनतन्त्रविज्ञैः ॥३२७॥

स्वांशे प्रमा निखिल एव मतोऽत्र बोधो-
ऽर्थे त्वप्रमापि विपरीतप्रकाशकत्वात् ॥
याथार्थ्यगोचरमतित्वमिह प्रमात्वं
स्यादप्रमात्वमितरत्तत आर्हतानाम् ॥३२८॥

एतद्द्वयं स्वजनने परतस्स्वतो न
ज्ञप्तौ स्वतश्च परतश्च मतं जिनानाम् ॥

उत्पत्तिबोधनफलत्रितये प्रमात्वं
मीमांसकस्य कपिलस्य मतं स्वतस्तु ॥३२९॥
वेदान्तिनोऽपरत एव प्रमात्वमिष्ट-
मान्वीक्षिकीमतविदः परतो द्वयन्तु
बौद्धैस्तथैव परतः कथितं द्वयं तत्
त्वर्थांशमात्रमवलम्ब्य न च स्वरूपम् ॥३३०॥
एकान्तवादमवलम्ब्य प्रवृत्तिभाज
एते न युक्तिपदवीं जिनदेवतानाम् ॥
आश्रित्य याति किमु सिद्धिपदं विदोषा
एकान्ततैव परमेष्वपि युक्तिबाध्या ॥३३१॥
सामान्यबोधजनकव्यतिरिक्तहेतु-
जन्या प्रमा भवति बोधविशेषतातः ॥
भ्रान्तिर्यथा तव मता व्यतिरिक्तदोष-
जन्या तथा गुणभवा प्रमितिर्न किन्नः ॥३३२॥
प्रत्यक्षतो यदि गुणो नयनादिगोऽत्र
बाध्यस्ततोऽनुमितितोऽपि न चास्य सिद्धिः ॥
दोषोऽपि तर्हि तत एव न च प्रसिद्ध्ये-
द्भ्रान्तिः प्रमेव जनने स्वत एव किन्नो॥३३३॥
ज्ञाने प्रमात्वमथ शक्तिरदृष्टवस्तु-
प्रोद्बोधिका भवति सा स्वत एव बोधे ॥
ज्ञानेऽप्रमात्वमपि शक्तिरसत्प्रथाऽर्था
किन्न स्वतस्तव तथैव मताऽत्र विद्वन् ॥३३४॥

हेतौ प्रमात्वमथ नास्ति यतो न तस्मा-
द्धेतोः प्रमात्वभवनञ्च मतो मतन्ते ॥
ज्ञानत्वमप्यनुमतन्न च तर्हि ते स्यात्-
किं वा भ्रमत्वमपि ते स्वत एव तद्वत्॥३३५॥
यत्कारणाद् घटपटादिपदार्थजन्म,
शक्तिश्च तेषु तत एव न जायते किम् ॥
नैर्म्मल्यतो नयनगात्प्रमितिः प्रतीता
प्रामाण्यशक्तिरपि तस्य गुणात्ततोऽस्तु ॥३३६॥
मीमांसकैर्न्न पृथगेव मतोऽप्यभावो
भावाच्च दोषविरहोऽत्र गुणः प्रमायाम् ॥
येनास्तु हेतुरपि न व्यतिरिक्तभाव-
जन्यत्वमस्य तत एव भवेत्स्वतस्त्वम् ॥३३७॥
दोषोऽथवा भवतु किन्न गुणस्वभावा-
भावोऽप्रमाजनक इत्यपि भावयान्तः ॥
प्रामाण्यमेव परतोऽस्तु गुणस्वभावात्,
स्याद्भ्रान्तिताऽपरत एव विपर्ययेण ॥३३८॥
पित्तादिको नयनगोऽथ यथैव दोषो,
लोकप्रसिद्धपदवीमवगाहते ते ॥
किन्नो तथैव जनताप्रमितो गुणो न-
स्सिद्धिं प्रयातु न विशेष इहास्ति कश्चित् ३३९
औत्सर्गिकं भवति बोधगतं प्रमात्वं,
तस्मात् स्वतो यदि मतन्न च तच्च युक्तम् ॥

हेतुं विना न नियमोऽस्य भवेत्तथा च,
किं भ्रान्तिवृत्तिरपि नानियतस्य वास्य ॥३४०॥
ज्ञानत्ववन्निखिलबोधगतं प्रमात्वं,
स्वाभाविकं भवितुमर्हति न क्वचित्तु ॥
दोषान्न तस्य यदि जन्म तदा कथं न,
पूर्वोक्तनीतिबलतः परतोऽस्य जन्म ॥३४१॥
किं वाऽप्रमात्वमपि तत्समकक्षमेव,
स्वाभाविकन्न तव सम्मतमत्र विद्वन् ॥
किं प्रक्रिया भवतु युक्तिमृते त्वदुक्ता,
हास्यास्पदं न शतधाऽपि प्रलप्यमाना ॥३४२॥
संवादितादिपरहेतुत एव तस्य,
ज्ञप्तिस्तथा जनकबोधगतस्य युक्ता ॥
भ्रान्तित्वबुद्धिरिव नात्र विशेषलेशो,
लोकानुसारिसरणावुपलक्ष्यते यत् ॥३४३॥
अर्थक्रियामतिगतं प्रमितित्वमिष्टं,
ज्ञप्तौ स्वतो जिनमतानुगतैस्ततो नो ॥
मानानवस्थितिरपीह भवेच्च येन,
प्रामाण्यबुद्धिरखिलेषु परानपेक्षा ॥३४४॥
प्रामाण्यसंशयमतिर्न्न भवेत्स्वतस्त्वे,
ज्ञानग्रहे तदपि निश्चितमेव यस्मात् ॥
ज्ञानाग्रहे तु न भवेत्सुतरां यतोऽस्यां,
धर्मिग्रहो बुधमतो जनको बुधाग्र्य ॥३४५॥

प्रामाण्यमंशमिह बोधगतं विशेष-
कर्मक्षयोपशमतो जिनसम्प्रदाये ॥
बोधोऽवगाहत इतीष्यत एवमेव
ज्ञानस्वरूपमपि तत्प्रथते न पूर्वम् ॥४४६॥
एतेन केवलमतौ प्रमितित्वबुद्धिः
स्वस्माद्भवेन्निखिलकर्म्मलयान्न भिन्नात् ॥
इत्युक्तमेव तत एव तदुत्थबोधे
प्रामाण्यसंशयकथाऽपि न सावकाशा ॥३४७॥
किञ्च प्रमाणमपरं यदि नैव किञ्चित्-
संवादितादिकमपेक्षत आत्मसिद्धौ ॥
मीमांसकाद्दत इवास्तु तथागतोक्तः
प्रामाण्यभागिह तदागम आप्तमान्यः ॥३४८॥
बुद्धोक्तवाक्यजनिते यदि न प्रमात्वं,
बाधात्तदा भवतु तद्विरहेण बोधे ॥
प्रामाण्यसिद्धिरिति किं परतो न सिद्धि-
र्भङ्ग्यन्तरात्तव मता प्रमितौ द्विजाग्र्य ॥३४९॥
यस्मात्पृथक्तव मते विरहो न तुच्छो
बाधस्य किन्तु स भवेच्च तदन्यभावः ॥
संवादिता भवतु वा गुणजन्यता वा
किं वाऽन्य एव परतः प्रमितिस्तु सिद्धा॥३५०
कण्ठादितोऽक्षरजनिर्जनताप्रसिद्धा
तेषान्ततिः कथमजन्यतयाऽभ्युपेया ॥

नित्यत्वतो भवतु तेन प्रमाणभावः
कस्मात्त्वदागमगतः पुरुषापलापात् ॥ ३५१ ॥
दोषाकलङ्कितमतिः पुरुषो न कोऽपि
तस्मात्त्वया श्रुतिरजन्यतयाऽभ्युपेता ॥
प्रामाण्यरक्षणकृते न च सोऽपि कामः
सम्पत्स्यतेऽप्रमितिबुद्धिजनिप्रसङ्गात् ॥३५२॥
नो सत्त्वमात्रत इह प्रभवन्ति शब्दा-
श्शाब्द्यां परन्तु समयग्रहसव्यपेक्षाः ॥
सङ्केतकर्तृपुरुषा न च दोषमुक्ता-
स्तस्मात् कथं कथय मानमतिः श्रुतेस्स्यात्३५३
नैकान्ततो भवति कोऽपि विनाशधर्म्मा
नित्योऽथवा प्रमितिगोचरसञ्चरिष्णुः ॥
अर्थक्रियाजनिरनित्यत एव नैवं
नो नित्यतो भवति किन्तु तदन्यतो यत् ॥३५४
कण्ठोत्थिता मरुत एव विचित्रशक्ति-
सामर्थ्यतस्तव मते ध्वनिशब्दवाच्याः ॥
ये व्यञ्जका अभिमता जनकत्वभाजः
काद्यक्षरस्य च भवन्ति त एव किन्नो ॥३५५॥
नित्यो विभुश्च तव सम्मत एष कादि-
र्व्यङ्ग्यः कथं भवतु तैरविकारिरूपः ॥
अव्यङ्ग्यरूपविगमे च कथन्न जन्यः
पूर्वस्वभावविगमादपरस्य लाभात् ॥ ३५६ ॥

व्यङ्ग्यो़ऽप्ययं यदि तु देशत एव तर्हि
सर्वात्मना भवति देशगतोऽथ देशात् ॥
आद्ये विभुत्वविलयो नियतैकदेश-
स्थित्याऽन्तिमे किमनवस्थितिदोषमुक्तिः ॥३५७॥
सर्वात्मना यदि तथाऽत्र मतोऽथ कादि-
र्देशान्तरस्थपुरुषैरपि किन्न तर्हि ॥
तस्य श्रुतिर्भवतु वा निकटस्थितस्या-
प्यश्रावणन्तदिव किन्न तदेकभावे ॥ ३५८ ॥
एकेन्द्रियग्रहणयोग्यतयाऽपि वर्णा
व्यङ्ग्या पृथङ्नियतवायुबलात्कथं स्युः ॥
तत्त्वे समाधिकरणेषु विभिन्नतो न
व्यङ्ग्यत्वमत्र विबुधैरवलोकितं यत् ॥ ३५९ ॥
तस्मात्कथं वद भवेन्न यदैकवर्णो-
ऽध्यक्षप्रथामुपगतो निखिलोऽपि कादिः ॥
तत्काल एव प्रमितेः पदवीं प्रपन्नो,
युक्तन्न चावरणकल्पनमेषु युक्त्या ॥३६०॥
नो वायवो वरणकारिण आप्तमान्या-
स्ते व्यञ्जकास्तव यतोऽभिमता बुधाग्र्य ॥
यद्व्यञ्जकं भवति तत्समजातिकन्नो
दृष्टः क्वचिद्वरणकारितया च तस्य ॥ ३६१ ॥
शब्दे त्वयाऽऽवरणकारिण आहृताः किं
श्रोत्रेऽथवा यदि पुरस्सरकल्प इष्टः ॥

तत्रापि किं वचनवद्विभवो मतास्ते
किं वाऽपकृष्टपरिमाणपवित्रिताश्च ॥ ३६२ ॥
आद्ये लयो नहि भवेद्विभुतान्वितेषु
नित्यत्वमेव भवताऽदृतमत्र यस्मात् ॥
शब्दोपलब्धिकथयापि गतं तथा च
बाधिर्यमेव जगति प्रथितन्न किं स्यात् ॥३६३॥
अन्त्ये न चैकपवनेन विभोस्तु कादेः
स्यादावृत्तिर्बहव एव ततः प्रकल्प्याः ॥
प्रत्येकमेव न तु तेषु प्रमाणमस्ति
तैरन्तराऽपि च गतिः खलु जन्यपक्षे ॥३६४॥
स्याद्व्यञ्जकेन पवनेन विरोधिवायो-
स्तद्देशगस्य विलये किमु सर्वदा नो ॥
तत्रस्थतद्वचनबुद्धिरतोऽप्यनेके
कल्प्या गुरुत्वमधिकं किमतः परं स्यात् ॥३६५॥
दोषस्त्वयं श्रुतिगतावरणेऽपि तस्मात्
कल्पोऽन्तिमोऽपि कथमत्र तवोपपन्नः ॥
किञ्च क्रमोऽपि नहि युज्यत एव नित्ये
वर्णे द्विधा स हि यतोऽभिमतो बुधानाम्॥३६६॥
देशात् क्रमोऽविरलदेशसमाश्रितेषु,
मूर्त्तेषु पुष्पनिकरेषु यतोऽत्र दृष्टः ॥
जन्येषु तन्तुवसनेषु च कालजन्यो,
दृष्टः क्रमस्तदुभयं प्रकृते न चास्ति ॥ ३६७ ॥

वायोर्यथैव गमनेऽपि न मध्यदेशे,
स्वारम्भकावयवयोगविनाशजन्यः ॥
नाशस्तथैव वचनस्य भवेन्न नाशो,
विश्लेषतोऽवयवकस्य विशेषबन्धात् ॥ ३६८ ॥
एतेन पौद्गलिकतोपगमे परेण,
प्राप्तिश्रुतेर्न्नहि भवेद्वचनस्य नाशात् ॥
द्रव्यान्तरप्रबलयोगत इत्यपास्तं,
वायोर्न्न किन्तव मतेऽपि तथैव नाशः ॥३६९॥
शक्तिग्रहोऽस्ति ननु यस्य न सोऽस्ति शब्द-
स्तज्जन्यताऽभ्युपगमे व्यवहारकाले ॥
यो वर्त्ततेऽथ स भवेन्न गृहीतशक्ति-
स्तस्मान्न शाब्दमतिरार्हतसम्प्रदाये ॥३७०॥
इत्यादिदोषघटनापि परप्रयुक्ता,
स्यात्तस्य येन न मता वचनेषु जातिः ॥
कत्वादिका निखिलकादिगता तु भिन्ना-
भिन्ना समानपरिणामतया मता यैः ॥ ३७१ ॥
तेषां न दोषकणतोऽपि जिनानुगानां,
स्पर्शो मते भवति पौद्गलिकेऽपि शब्दे ॥
जातिं विना नहि तवापि घटादिकेऽर्थे,
शक्तिर्म्मताऽनुगतजात्यभिधाप्रलापिन् ॥ ३७२ ॥
शक्या न जातिरिह वाहनदोहनादि- (युग्मम्)
कार्यान्वयापगमतो हि विशेषभिन्ना॥

आक्षेपतो भवति नैव मतिस्तु शाब्दी
नो लक्षणाऽप्यनुपपत्तिमतिं विनाऽर्थे ॥३७३॥
सामान्यतो विरहितो न विशेष एव
शक्यस्तथाऽननुगमेन भवेत्परन्तु॥
एतद्द्वयं भवति भिन्नमभेदयोगि
संसृष्टमेव वचसामिह शक्यमिष्टम् ॥३७४॥
शक्तस्तथा भवति नानुगतस्वरूपो
नो व्यक्तिरूप इह कादिरसत्त्वयोगात्॥
सामान्यसंवलित एष विभिन्नरूपो
जन्योऽपि किन्नहि भवेद्गमकोऽर्थराशेः ॥३७५॥
नित्यत्वतोऽस्ति वचसां यदि दोषमुक्ते-
र्न्नो भ्रान्तिबुद्धिजनने पटुता तदा किम्॥
तेनैव तेषु न भवेद्गुणयोगलभ्यं
प्रामाण्यमप्यनुमतं बुध ते मते तु ॥३७६॥
बौद्धागमादिषु यथा पुरुषस्य कर्त्तुः
स्मृत्या मता पुरुषकर्तृकता तथैव ॥
वेदे स्मृतिर्न्नहि किमस्ति यतो न तस्य
कर्त्ता प्रसिद्ध्यति पुमान् तव नीतिभीतः॥३७७॥
सिद्धार्थकं च वचनन्न मतं प्रमाणं
मीमांसकस्य तत एव न कर्त्तृसिद्धिः ॥
विध्यंगतां स्तुतिपरत्वबलेन किन्तु
तस्याभ्युपेत्य फलवत्त्वमपि प्रशस्तम् ॥३७८॥

एतद्वचो नहि विचारपथं बुधानां
मीमांसकस्य कथमप्यवगाहतेऽत्र॥
स्वार्थे न चेद्यदि प्रमाणमसौ तदास्य
विध्यङ्गताऽपि नियतस्य न भेदतः स्यात्॥३७९॥
सर्वस्य सर्वविधिबोधितकर्म्मयोगः
स्यादर्थवादवचनस्य निरर्थकत्वे॥
बाध्यार्थकस्य यदि चान्यपरत्वमस्य
नैतावता सकलमेव निजार्थशून्यम् ॥३८०॥
सिद्धार्थकाच्च वचसः स्मृतिरेव कर्त्तु-
र्न्नो चेत्तदा सुगतकर्तृकतादिसिद्धिः ॥
बौद्धागमादिषु कथं भविता तथा च
द्वेषोऽपि तेषु भवतामनिमित्तिकः स्यात् ॥३८१॥
सर्वज्ञ एव यदि कोऽपि भवेन्न वक्ता
युक्तस्तदा पुरुषदोषकृतस्तु दोषः ॥
शब्दे परं विदितसर्वपदार्थतत्त्व-
स्तीर्थङ्करो न भवतां श्रुतिगोचरः किम् ॥३८१
सर्वज्ञता वचनकर्तृतया विरुद्धा
सिद्धा भवेद्यदि तदा न भवेत् स वक्ता॥
न त्वेतदस्ति वद काऽत्र तवास्ति युक्तिः
सिद्ध्येद्यया नहि पुमान्निखिलार्थविज्ञः ॥३८३॥
स्वार्थावगाहिमतिजन्यमिह प्रसिद्धं
वाक्यं प्रमाणमिति तेन विलक्षणेन॥

वक्ता प्रसिद्ध्यति विलक्षण एव लोके
व्याप्तिस्तथैव नियता न विपर्ययेण ॥३८४॥

दृष्टार्थकञ्च वचनन्न जिनप्रणीतं
बाधां प्रमाणनिकरेण यतो निजार्थे॥
स्याद्वादलाञ्छिततनौ भजते तदैक्य-
वाक्यात् तदन्यदपि मानतयैव मान्यम् ॥३८५॥

एतादृशेन वचनेन निजप्रणेतृ-
सिद्धौ कथन्न सकलार्थविदः प्रसिद्धिः ॥
बाधप्रमाणविगमादपि किञ्च युक्ता
सर्वज्ञसिद्धिरनुमात्मतया प्रमाणम् ॥३८६॥

यद्वृद्धितोऽपचयवानिह यः प्रसिद्धो-
ऽत्यन्तप्रकर्षगमने ननु तस्य तस्य॥
आत्यन्तिकक्षय इतस्सकलार्थविज्ञा-
द्रागादिदोषघटनाऽप्यतिदूरमार्हत् ॥३८७॥

एतेन युक्तिनिकरोऽपि विभोः परस्य
सर्वज्ञतापनयनेऽभिमतो न युक्तः ॥
तत्सम्मतं कथकपद्धतिमत्र युक्त्या-
ऽऽनीयोपहन्ति जिनदर्शनविज्ञ इत्थम् ॥३८८॥

नन्वप्रमाणकमिहाभ्युपगन्तुमर्हम्
प्रामाणिकैः किमपि नो तत एव वाच्यम् ॥
सत्त्वे प्रमाणमिह सर्वविदः किमस्ति
प्रत्यक्षमत्र लभते न निजस्वरूपम् ॥३८९॥

यस्मात् परात्ममतिगोचरबुद्धिशाली
नास्मद्विधोऽक्षजमतेः कथमप्यशक्तेः ॥
अस्मद्विशिष्टजनुषां मतिरस्य चेत्त-
च्छ्रद्धास्पदं जडमतिं विरहय्य कस्य ॥३९०॥

प्रत्यक्षपूर्वकतयैव न चानुमानं
नो वास्य साधकतया प्रथितोऽस्ति हेतुः ॥
नैतादृशे तु विषयेऽस्त्युपमाप्रचार-
श्शब्दोऽपि नात्र कुरुते मतिमुज्ज्वलाभाम् ॥३९१

यस्माद्वचो भवति सर्वविदः प्रमाण-
मेतादृशे तु विषये न तु चर्म्मदृष्टेः ॥
सिद्धे तु सर्वविदि तद्वचनत्वसिद्धि-
रन्योन्यसंश्रयघटा प्रकृते ततस्स्यात् ॥ ३९२ ॥

एकस्य सिद्धिरिह चेद् यदि भिन्नसर्व-
ज्ञोक्तागमादपरतो ननु तस्य कस्मात् ॥
तस्यापि भिन्ननिखिलार्थविदुक्तवाक्यात्
सिद्धिर्भवेद् यदि तदा सुदृढाऽनवस्था ॥३९३॥

अन्योन्यवाक्यजमतेः प्रभवा न सिद्धि-
रन्योन्यसंश्रयलतापरिवेष्टनात् स्यात् ॥
स्याच्चक्रकस्तदतिरिक्तसमाश्रये तु
नैतावता नियतसर्वविदः प्रसिद्धिः ॥ ३९४ ॥

ज्ञानं तथा निजगतं वचनेन सोऽपि
नोध्यक्षमन्यजनवृत्तितयाऽत्र कर्त्तुम् ॥

सामर्थ्यवानिति न तत्समकालिकैश्च
ज्ञातो भवेन्ननु जनैरपि तत्त्वदृष्ट्या ॥ ३९५ ॥
नो भिन्नकालपुरुषैर्व्यवधानभाग्भिः
सर्वज्ञता परगता विदिता ह्ययोग्या ॥
तामन्तरा त्वनुपपन्नमिहास्ति किञ्चि-
न्नैवार्थतोऽपि तव सिद्ध्यतु येन विज्ञः ॥३९६॥
भावो ह्ययं भवति न प्रतिषेधदक्षा-
भावप्रमाणविषयोऽस्य ततो न सिद्धिः ॥
नैवोक्तभिन्नमिह तेऽपि मतं प्रमाणं
प्रामाणिकस्य स च केन प्रसिद्धिमेतु ॥३९७॥
नोत्पत्तुमर्हति तथा सकलार्थबोधो
हेतुं विना नियतदेशकतादिहानेः ॥
हेतुस्तु तस्य नयनादि यदीन्द्रियं स्यात्
प्रत्यक्षता ननु तदोपगता तत्र स्यात् ॥३९८॥
तत्त्वे न तस्य सकलार्थप्रकाशकत्वं
नेत्रादिना नियमनाद्विषये स्वकीये ॥
यस्मान्न चाक्षुषमतिः प्रतिबन्धकाना-
मुच्छेदतोऽप्यविषयेऽत्र जनस्य दृष्टा ॥ ३९९ ॥
यद्यन्यगोचरचरोऽपि भवेत् कदाचि-
दक्षान्तरस्य विषयो न तदेन्द्रियाणि ॥
कल्प्यानि नेत्रप्रभृतीनि बहूनि यस्मा-
त्स्पर्शेन्द्रियेण सकलेन्द्रियकार्यभावः ॥ ४०० ॥

तस्माद्यदा नयनतोऽस्य मतिस्तदा नो
गन्धादिवस्तुविषया न च सर्वविन्त्वम् ॥
अक्षान्तरादपि जनिर्यदि तस्य तत्रा-
प्यक्षान्तरस्य विषयो विषयो न युक्तः ॥४०१॥

नो मानसश्च बहिरिन्द्रियमन्तरेण
बाह्ये प्रवृत्तिमदतो न ततोऽपि तस्य ॥
युक्ता जनिर्न्न च तथा विषयं विनैव
प्रत्यक्षबोध उपपद्यत एष विद्वन् ॥ ४०२ ॥

नालौकिको भवति गौतमसम्मतोऽपि,
सम्बन्ध इन्द्रियगणस्य समस्तभावैः ॥
प्रत्यक्षबोधजनकोऽभिमतो बुधानां
तत्त्वेऽथवा सकल एव न सर्ववित्किम् ॥४०३॥

वाच्यत्वतस्सकलमेव समानभावात्
सम्बद्धमत्र मनसो भवताम्मतेन ॥
तस्मात् समस्तविषयप्रतिभासनं कि-
न्नालौकिकाद् भवितुमर्हति सन्निकर्षात्॥४०४॥

लिङ्गादयं यदि भवेदनुमानरूपो
व्याप्तिग्रहः प्रथमतस्सकलेषु वाच्यः ॥
नाध्यक्षरूप इह सोऽपि भवेद्धि तस्य
लिङ्गान्तरप्रभवतैव मता त्वया स्यात् ॥४०५॥

तत्रानवस्थितिलतापरिवेष्टनान्न
मुक्तिः कथञ्चिदपि ते भविताऽनुमायाम् ॥

किञ्चानुमामतिमतो यदि सर्ववित्त्व-
मस्मादृशामपि कथन्नहि सर्ववित्त्वम् ॥४०६॥
वाच्यत्वतस्सकलमेव भवेत् प्रमेय-
मित्यादिकानुमितिरस्ति न किन्तथापि ॥
नास्मादृशां यदि भवेदिह सर्ववित्त्वं
किं श्रद्धयाऽपि तव केवलया भवेत्तत् ॥४०७॥
सादृश्यबुद्धिजनितोपमितेर्बलान्नो
सर्वज्ञता भवितुमर्हति पुंसि यस्मात् ॥
सादृश्यगोचरतयैव मता बुधाना-
मेषा न चान्यविषया प्रमिताऽस्ति लोके॥४०८॥
प्रत्येकशस्सकलवस्तुमतौ समर्थ-
श्शब्दोऽथ कोऽपि नहि विद्यत एव लोके ॥
अस्त्यागमः परमसौ बहुविस्तृतत्वा-
न्नाशेषतोऽध्ययनगोचरसञ्चरिष्णुः ॥४०९॥
सर्वं विना किमपि नानुपपन्नमर्था-
पत्त्यापि सर्वविषयावगतिर्न्न युक्ता ॥
नाभावमानविषयः खलु वस्तुराशि-
स्तस्यासदर्थकृतयैव यतः प्रसिद्धिः ॥४१०॥
नाभ्यासतोऽपि सकलावगमोद्भवः स्या-
च्छक्तिं विहाय नहि सोऽपि प्रभुः क्रियायाम् ॥
किन्ताप्यमानमपि नीरमनेकशो वै
वह्नित्वमेति निजतत्त्वपरिक्षयेण ॥४११॥

नोल्लङ्घनञ्च शतशः क्रियमाणमेव-
माल्यन्तिकं क्वचिदपि प्रविलोक्यतेऽत्र ॥
व्यापारराशिसहकारिसमन्वयेऽपि
नेत्रेण सौरभमतेर्जननं न दृष्टम् ॥४१२॥
भ्रान्तिस्तथा परगतामवबोद्धुमीशो
भ्रान्तो भवेदपरथा नहि सर्ववित्स्यात् ॥
ज्ञानं यतः स्वविषयेण विना कृतं न
बोधेऽवभासत इति प्रथितोऽत्र पन्थाः ॥४१३॥
प्रत्यक्षबाधिततयाऽप्यनुमा प्रतिष्ठां
प्राप्नोति सर्वविदि नैव पराभ्युपेता ॥
किञ्चानुमापि परकल्पितपुंसि सर्व-
ज्ञत्वापवादकतयाऽप्रतिघास्ति किन्नो ॥४१४॥
पुंस्त्वादसावहमिवाल्पविदभ्युपेयो
नो सर्वविन्न च तथागमसम्प्रणेता ॥
वक्तृत्वतोऽहमिव सोऽपि च सर्वविन्नो
रागादिमानहमिवायमपि प्रमाता ॥४१५॥
पूर्वापरौ न समयौ निखिलज्ञयुक्तौ
कालत्वतोऽभिनवकाल इव प्रसिद्धः ॥
देशान्तरे प्रकृतदेश इवास्ति नैव
सर्वज्ञ इत्यनुमितीरवधारयान्तः ॥४१६॥
वक्तृत्वतो भवति तेन समानधर्म्मा
किन्नास्मदादिरित एव भवेच्च सोऽपि ॥

अस्मादृशैश्च सदृशोऽल्पपदार्थवित्त्वात्
तस्मात् कथं भवति नोपमितेस्तु बाधा॥४१७॥
शब्दस्त्वलौकिक इहास्ति विधिप्रधानो
नो सिद्धिगोचरचरो न ततोऽस्य बाधः ॥
किन्त्वस्मदादिरचिता बहवः प्रतीता-
स्तद्बाधका न भवतां श्रुतिगोचराः किम्॥४१८॥
स्यात्सर्वविद्यदि तदा तव सम्मतोऽत्र
पञ्चप्रमाणविषयोऽपि भवेन्न चैवम् ॥
तस्मान्न चास्ति स इदं किमु बाधकन्नो
भावप्रमाणमपि तद्विषयानुमायाः ॥४१९॥
किञ्चास्य कीटमशकादिमतिः किमर्था
प्रेक्षावताऽपि भवताऽभिमताऽत्र पुंसः ॥
सौख्यास्पदाभिमतसर्वमतिं प्रकल्प्य
नानुग्रहः किमु कृतोऽस्य निजोपदेष्टुः ॥४२०॥
दुःखानुभूतिवशतः खलु दुःखभोगी
दुःखीति लोकसरणौ जनताप्रसिद्धः ॥
दुःखं परस्य विशदप्रमया विजानन्
दुःखी भवेत् सकलविन्नहि किन्त्वाप्तः ॥४२१॥
इत्थं वदन् स्वगृह एव जनैरुपास्यो
मीमांसको भवतु नो बुधमण्डपेऽपि ॥
वाङ्मात्रतोऽत्र नहि सिद्धिमुपैति किञ्चि-
द्युक्तिर्न्न का चिदपि तेन सती प्रयुक्ता ॥४२२॥

प्रत्यक्षबुद्धिरिह नैव ममापि मान्या
तत्खण्डनं क्षतिकरन्न च सर्वविस्त्वे ॥
नैवाऽनुमा तदुदयाऽपि च तत्र मानं
केनोपमानमिह मानतया प्रयुक्तम् ॥४२३॥
सामान्यतो भवति दृष्टमिहानुमान-
न्तत्साधनाय निरुपद्रवयुक्तिसिद्धम् ॥
ज्ञानप्रकर्षजनितो वचनप्रकर्षः
किन्नास्मदादिनियतो नियमो न येन ॥४२४॥
स्पष्टैकबोधविषया ननु सर्वभावाः
कस्यापि सातिशयबोधवतोऽत्र पुंसः ॥
पञ्चाङ्गुलीवदभिधेयप्रमेयतादे-
र्व्याप्तेर्न्न चात्र विरहो न च दोषलेशः ॥४२५॥
सामान्यतो भवति यो मतिगोचरस्सो-
ऽसाधारणेन मतिगोचर इत्यतोऽपि ॥
सत्त्वादिना मतिगता ननु सर्वभावाः
कस्यापि बोधविषया नियतस्वरूपैः ॥४२६॥
व्याप्तिग्रहोऽपि सुलभो मनसोहतो वा
किं वान्यतोऽस्तु भवतामपि मान्य एषः ॥
धूमानुमानमपि तेन विना कथं स्याद्
यत्रोभयोरिति गतिर्भवतैव दत्ता ॥ ४२७ ॥
सिद्धार्थकस्य वचनस्य च पूर्वनीत्या ।
प्रामाण्यमत्र भवतामपि सम्प्रसिद्धम् ॥

तत्त्वे च तस्य भवदागमतोऽपि सिद्धि-
हस्तस्थरत्नमतिवत्किमु नास्ति विद्वन् ॥४२८॥
प्रत्यक्ष एव स च केवलबोध इष्टो
जैनैस्तदावरणकर्मलयोऽस्य हेतुः ॥
नाक्षोद्भवत्वमिह लक्षणमस्य किन्तु
स्पष्टत्वमेव विशदीकृतमार्हतैर्यत् ॥ ४२९ ॥
तस्माद्विकल्पनिकरो भवतोऽर्थवान्नो
हेतूद्भवत्वविषये जिनतन्त्रसिद्धः ॥
स्वाभाविको हि गुण आत्मनि बोधरूपो
निश्शेषकर्मविलये प्रथते विशुद्धः ॥ ४३० ॥
अभ्यासतो भवति नैव प्रकर्षनिष्ठा-
ऽन्यौपाधिकस्य प्रकृते तु कथं न सा स्यात् ॥
नैर्मल्यमम्भसि न किं कतकप्रयोगेऽ-
त्यन्तप्रकर्षपरिणामि जनेन दृष्टम् ॥ ४३१ ॥
भ्रान्तिं तु यद्यपि परस्य स वेत्ति तेन
भ्रान्तत्वमस्य च तथापि न युज्यते यत् ॥
भ्रान्तेः प्रमाणविधयाऽवगतौ भवेत्तत्
भ्रान्तित्वतोऽवगमने तु प्रमातृतैव ॥४३२॥
ग्राह्यांशतोऽपि प्रकृतेऽस्ति न तस्य भावो
भ्रान्तौ तु तद्विषयताप्यवगाहनेऽपि ॥
यन्नास्ति यत्र ननु तस्य मतौ तु तत्र
तत्किं न तद्विषयतास्ति तदप्रमायाम् ॥४३३॥

अध्यक्षबाध इह योग्यतया प्रसिद्धं
ग्राह्ये भवेन्नहि परस्तु परस्य योग्यः ॥
त्वद्दर्शितानुमितितो न भवेच्च बाधा
नैकत्र दर्शनबलान्नियमा हि युक्तः ॥ ४३४ ॥
मीमांसकत्वमपि जैमिनितोऽन्यथा स्यात्
पुंस्त्वादितोऽपहृतसत्त्वमदर्शनं किम् ॥
रथ्यानरे भवतु नो नियमोऽत्र येन
कश्चिद्विशेष इह नैव निभालितोऽस्ति ॥४३५॥
प्राभाकरोऽपि पुरुषत्वसमन्वयेन
मीमांसको नहि भवेत्स इवाल्पबुद्धिः ॥
एतादृशानुमितयस्स्ववधाय कृत्यो-त्थानं
भवेयुरिति तद्धृदये कुरुष्व ॥ ४३६ ॥
तात्कालिकैरविदिताखिलवेदतत्त्वै-
र्ज्ञातो बभूव तव जैमिनिरत्र यद्वत् ॥
तद्वज्जिनोऽपि विदिताखिलवस्तुतत्त्वो
ज्ञातो विनेयभविकैरिह किन्न मान्यः ॥ ४३७ ॥
व्याख्यातृतागुणबलेन यथा त्रिवेदी
वेदैकभागविदुषामपि जैमिनिर्वः ॥
ज्ञातो बभूव किमु नोऽपि तथैव नोऽर्हन्
सिद्धान्तदेशविदुषा विदितोऽखिलज्ञः ॥४३८॥
साधर्म्यतो यदि भवेन्नहि सर्ववित्स
मीमांसकोऽपि तव जैमिनिरत्र न स्यात् ॥

सामान्यतोऽथ नियमो वचनस्य चास्ति
बुद्ध्यैव नाऽल्पविषयावगमेन विद्वन् ॥४३९॥
स्वात्मस्थितं ह्यनुभवन्ननु दुःखराशिं
स्वाभेदतो भवति कर्म्मठ दुःखभोगी ॥
अन्यात्मनिष्ठमवयन्नपि च प्रमाता
दुःखं कथं भवतु सर्वविदस्य भोक्ता ॥४४०॥
आप्तोक्ततागुणबलाद्वचनं प्रमाणं
प्रामाण्यसिद्धिरपि तत्र ततस्ततोऽस्तु ॥
किञ्च प्रमाणमपि जैमिनितन्त्रसिद्धं
नास्ति स्वतो भवतु कस्य प्रमात्वमिष्टम्॥४४१॥
व्यापार एष कथितो ननु तैः प्रमातु-
र्य्याथार्थ्यमर्थनियतं प्रथते हि तस्मात् ॥
व्यापारयुक्त इह कार्यभवे समर्थो
हेतुर्न तन्तु विरहय्य पटुः क्रियायाम् ॥ ४४२॥
नन्वीदृशो नियम आद्रियते भवद्भि-
र्व्यापार इष्ट इह हेतुरथाप्यहेतुः ॥
आद्येऽनवस्थितिरथानियमप्रसङ्गो
व्यापारतद्विरहकल्पनया भवेत्ते ॥ ४४३ ॥
अन्त्ये स्वभावविलयोऽजनको यतो न
व्यापारतापरिगतो विबुधप्रसिद्धः ॥
व्यापारभिन्नजनकस्य च तद्व्यपेक्षा
नो तस्य सेति यदि कोऽत्र विशेष इष्टः ॥४४४॥

नो तत्स्वभावशरणेन पदप्रसारो
युक्तोऽत्र युक्तिशरणैकप्रकल्प्यरूपे ॥
प्रत्यक्षसिद्धिविषये खलु तत्र तस्या-
र्थापत्तितो भवति कल्पनमत्र नैवम् ॥४४५॥

व्यापार एष किमु जन्यतया मतस्ते
किं वा न जन्य इति नात्र तृतीयकल्पः ॥
आद्ये न हेतुमनपेक्ष्य भवेच्च जन्म
निर्हेतुकस्य नियमो नहि युज्यते यत् ॥४४६॥

व्यापारयुक्त इह चेद्यदि तस्य हेतु-
स्तत्राप्यपर्यवसितिर्भवतामवार्या ॥
व्यापारमुक्तमपि तज्जनकम्मतञ्चेत्
तस्यैव तर्हि नहि कल्पनमर्थवत्स्यात् ॥४४७॥

अन्त्ये सदैव विषयावगतिः प्रसक्ता
आत्मा तदन्वित इहास्ति सदा प्रमाता ॥
अन्धोऽपि पश्यतु घटादिपदार्थराशीन्
नेत्रादिकं विफलमेव तव प्रसक्तम् ॥४४८॥

भट्टेन किञ्च स हि नेन्द्रियगोचरस्तु
प्रोक्तोऽनुमाविषय एव मतस्तथा च ॥
स्याज्ज्ञातताऽनुमितिहेतुरथास्य किंवा
ज्ञप्तिस्तु तेन जनिता प्रथमो न युक्तः ॥४४९

ज्ञानस्य बाह्यविषयेण न चास्ति बन्धो
नो तं विना नियतबाह्यगता तु सा स्यात् ॥

सम्बन्ध इष्ट इह चेत्तव कोऽपि तर्हि
किं ज्ञातताभ्युंपगमेन निरर्थकेन ॥४५०॥
ज्ञानञ्च सर्वमिह साम्प्रतगोचरन्न
भूतं भविष्यदपि यद्विषयीकरोति ॥
नो ज्ञातता भवितुमर्हति तत्र तस्माज्-
ज्ञानं प्रसिद्ध्यतु तयाऽनुमितेः कथन्ते ॥४५१॥
किञ्चेष्टतादिकमपि प्रथितन्न कस्मा-
दिच्छादयोऽप्यनुमितेर्विषयास्ततस्स्युः ॥
ज्ञाता तथा भवति साऽनुमितौ समर्था
तत्रानवस्थितिरपर्यवसानतः स्यात् ॥४५२॥
व्याप्तिग्रहोऽपि च तया सह तस्य वाच्यः
सोऽपि प्रसिद्ध्यति न तामपरां विहाय ॥
एषानवस्थितिलता त्वपरोदिता स्यात्
तस्मात् कथं कथय तस्य तयाऽनुमास्तु॥४५३॥
ज्ञप्तिः फलं यदि भवेदनुमापकं सा
स्वेनैव सिद्ध्यति तदोत विभिन्नबोधात् ॥
आद्ये तयैव निखिलो व्यवहार इष्टः
स्यात्तेऽन्यबोधपरिकल्पनमर्थवन्नो ॥ ४५४॥
अन्त्येऽनवस्थितिनिपातभयान्न मुक्ति-
र्ज्ञाता यतो भवति सानुमितौ तु हेतुः ॥
व्यापारतोऽस्ति नहि कोऽपि विशेषलेश-
स्तस्याः किमर्थमिह कल्पनमादृतं स्यात्॥४५५॥

प्राभाकरोऽत्र विषये न कथाधिकारी
संवेदनं भवतु येन तदुक्तमिष्टम् ॥
ज्ञानत्वमेव प्रमितित्वमनेन बोधे
प्रोक्तं भ्रमत्वमपरन्न च तस्य किञ्चित्॥४५६॥

भेदाग्रहः खलु प्रवर्त्तक इष्यते तै-
र्भ्रान्तिस्थले परमसौ न विचारमार्गे ॥
सुप्तस्य तेन नहि जायत एव यत्न-
स्तुच्छस्ततो नहि स तेऽपि मते भवेच्च ॥४५७॥

भेदाग्रहो भवति ते ननु पर्युदास-
वृत्त्या त्वभेदमतिरेव तथा च सिद्धा ॥
भ्रान्त्यात्मिका मतिरिति स्वत एव नैव
बोधत्वतो भवति मास्वमतेः प्रसिद्धिः ॥ ४५८॥

ज्ञप्तौ यथैव परतश्च भवेत् प्रमाणं
कार्ये तथैव परतो विनिभालनीयम् ॥
हेतुप्रमा त्वधिकृता प्रकृते ततो न
स्याद्वादपक्षविमुखः परतोऽपि पक्षः ॥ ४५९ ॥

मीमांसके प्रतिहते न च सर्वसत्त्व-
द्वैतप्रवादिमतमप्यनुमोदनीयम् ॥
युक्तिस्समा तदुभयोर्हि निराक्रियायां
पूर्वप्रदर्शितदिशा त्ववधारणीया ॥ ४६०॥

शून्यत्ववादिमतखण्डनदर्शितोक्त-
नीतिस्तथा भवति तस्य निराक्रियायाम् ॥

विज्ञानवादपरिमर्द्दनयुक्तिजालोऽ-
प्यस्त्येव किञ्च तदुपज्ञप्रकारमार्गे ॥ ४६१ ॥
सर्वं सदेव नहि विश्वमसत्तथा नो
आविद्यकं भवति किन्त्विह दृश्यवस्तु ॥
एतच्च तैरुपगतं परमत्र तत्त्वं
ज्ञात्वापि नो विशदयन्ति तदेव चित्रम् ॥ ४६२
जात्यन्तरे भवति वस्तुनि नैव दोषः
प्रत्येकपक्षमवलम्ब्य यतोऽस्य वृत्तिः ॥
यद्व्यावहारिकमिदन्तव सत्त्वमिष्ट-
न्तत्पारमार्थिकतयैव विचारयान्तः ॥ ४६३॥
शून्यत्वमस्य जगतो न विना प्रमाणं
प्रामाणिकस्य निकटे तव सिद्धिमेति ॥
प्रत्यक्षमानमिह सत्त्वप्रसाधकञ्च
मिथ्यात्वसाधकतयाऽभ्युपगन्तुमर्हम् ॥ ४६४ ॥
मानान्तरं भवति किन्तु ततोऽपि नैव
प्रत्यक्षबाधिततया तदुपैति सिद्धिम् ॥
स्याद्वादतस्सकल एव तथा च हेतु-
र्जात्यन्तरस्य गमको न तु शून्यतायाः ॥४६५॥
दृश्यत्वतो जगति तेऽभिमतञ्च सिद्धिं
मिथ्यात्वमेति बुध दोषलतोर्विलासात् ॥
लिङ्गन्त्विदं यदि न दृश्यमतो न सिद्धि-
र्ज्ञातं यतो भवति लिङ्गमिह प्रमाणम् ॥४६६॥

दृश्यं भवेद् यदि तदा स्वयमेव मिथ्या
नान्यानुमाजननशक्तियुतं भवेतत् ॥
व्याप्तिस्तथा भवति नात्र न पक्षतास्ति
रूपत्रयन्तव मतश्च न युज्यतेऽस्मिन् ॥४६७॥

शब्दस्स्वयं तव मते नहि सत्यरूपो
मिथ्यात्वसिद्धिरपि तेन कथं घटेत ॥
शक्तिग्रहाद्यपि न चास्ति न शाब्दबोध-
श्श्रोता न चास्ति न च कोऽपि तवास्ति वक्ता४६८

ब्रह्मात्मकं यदि भवेत्प्रथितञ्च विश्व-
मद्वैतवाद इह तर्हि तव प्रसिद्ध्येत् ॥
स्तम्भो घटः पट इति प्रविभेदतो न
प्रत्यक्षबुद्धिरुपपद्यत एव तत्त्वे ॥ ४६९ ॥

निष्टङ्कनं भवति चाक्षमतेर्घटादे-
र्न स्वान्यभेदकलनां हि विनैव तस्मात् ॥
भेदावगाहिमतितस्तव बाध्यमाना
नाद्वैतबुद्धिरपि सिद्धिपथं प्रयाति ॥४७०॥

सत्त्वं रजस्तम इति त्रितयस्वरूपा
माया मता मम तु सा निखिलेषु सत्ता ॥
वादोऽपि नाम्नि परमत्र न तत्र काचि-
द्धानिर्जिनैकशरणानुगतप्रकारे ॥ ४७१ ॥

सत्त्वं स्थितिर्भवति जन्म रजोगुणोऽत्र
नाशस्तमोगुण इति त्रितयात्मकं यत् ॥

सत्त्वं मतं सकलवस्तुगतं जिनानां
  तादात्म्यसंवलितभेदयुतं मिथस्तत् ॥ ४७२ ॥
यत्स्वप्रकाशमिह तत्र तमो न दृष्टं
  ब्रह्मस्वरूपनियता कथमस्त्वविद्या ॥
विद्या तथा भवति नो विषयं विनैव
  तत्त्वेऽथवा ननु तयोरिह को विशेषः ॥४७३॥
वाङ्मात्रतो विशदबोधप्रकाशमानं
  विश्वं न चापलपितुं खलु शक्यमन्यैः ॥
एवं स्थितौ भवति तन्मतमेव मिथ्या
  तत्प्रक्रियाश्रयणमत्र बुधैर्न कार्य्यम् ॥४७४॥
ज्ञानस्वरूपमपि यस्य मते न सिद्ध्ये-
  न्नैयायिकस्य न कथाकरणेऽधिकारः ॥
व्यक्तिं विनैव ननु धर्म्मपरीक्षणं हि
  खे चित्रनिर्मितिसमं प्रवदन्ति विज्ञाः ॥४७५॥
आत्मा यतो भवति तस्य मते प्रमाता
  ज्ञानं प्रमा तदुभयोः समवायबन्धः॥
एतत्त्रयन्नहि प्रमाणपथं प्रयाति
  प्रामाण्यतत्त्वमननं क्व तदाऽस्वतोऽस्तु ॥४७६॥
नित्यो महान्सकलमूर्त्तगतोऽयमात्मा
  नैकान्तो भवितुमर्हति सत्त्वहानेः ॥
बौद्धोक्तयुक्तिकबलेन भवेन्न नित्यो
  माने महत्यपि न मानमिहास्ति किञ्चित्॥४७७॥

प्रत्यक्षतस्सकलदेहभृतां स्वदेह-
तुल्यात्ममानविषयैव मतिः प्रसिद्धा ॥
प्रत्यक्षबाधिततयाऽनुमितिर्न चात्रा-
त्यन्तप्रकृष्टपरिमाणप्रसाधिका स्यात् ॥४७८॥

नैवापकृष्टपरिमाणतया महत्त्वे
कार्यत्वतो भवति नाशप्रसञ्जनञ्च ॥
व्याप्तिस्तयोर्न्नहि प्रयोजकमन्तरेण
येनात्मनोऽपि विलयोऽर्थत आगतः स्यात् ॥४७९

किञ्चास्य मानमपि नस्तनुनामकर्म्मो-
द्भूतं मतम्भवति तन्न च नित्यमेव ॥
नाशेऽथ तस्य च भवेदनुगामिनोऽपि
जीवस्य तत्परिणतस्य लयः कथञ्चित् ॥४८०॥

नो सर्वथा जिनमते विलयोऽस्ति कस्या-
प्येवं स्थिते न परदर्शितदोषपोषः ॥
यत्खण्डनेऽप्यवयवस्य तनोः करादे-
स्तद्देशखण्डनमिह प्रवदन्ति वृद्धाः ॥४८१॥

कम्पोपलब्धिरत एव च खण्डितेऽंश
आत्मप्रदेशगमनादुपपद्यते नः ॥
नो नो मनोऽन्तरप्रवेशविकल्पनेन
कम्पोपपादनपरिश्रमदुःखलेशः ॥४८२॥

एतेन सावयवताऽल्पमहत्त्वयोगात्
संयोगजत्वमुपगम्य विनाशिताऽस्य ॥

तन्नाशतो ननु परेण प्रदर्शिता या
सेष्टप्रसञ्जनतया क्षतिकारिणी नो ॥ ४८३ ॥
नो प्रक्रियाऽपि परमार्थत इष्यते सा
नैयायिकोपरचिता परमार्हतैस्तु ॥
संयोगनाशमनपेक्ष्य यतो विनाशः
केयूरभावपरिणामककुण्डलस्य ॥४८४॥
किञ्चानुमानमपि देहसमानमान
आत्मन्यबाधिततयाऽत्र प्रवर्त्तते नः ॥
यत्रैव यो भवति दृष्टगुणस्स तत्र
कुम्भादिवद् भवति चात्र न दोषलेशः ॥४८५॥
नित्ये विभौ च नहि कर्म्मकलापबन्धो-
ऽभावे च तस्य सुतरान्नहि मुक्तियोगः ॥
नो जन्म मृत्युरपि नैव न कर्तृभोक्तृ-
भावौ तथाऽविचलितात्मनि तार्किकाणाम् ४८६
नोऽदृष्टमिष्टमखिलेऽपि च जन्यभावे
हेतुर्बुधाग्र्य ननु येन विभुस्तवासौ ॥
सिद्ध्येत्समस्तजनिमत्सु च तस्य योग-
सम्पादनार्थमिति भावय तार्किक त्वम् ॥४८७॥
वायोर्गतिर्हुतभुजो ज्वलनं स्वभावात्
स्वस्वस्वभावनियता हि समस्तभावाः ॥
किञ्चापराद्धमणुभिस्तव येन तेषु
नानन्तशक्तिमवलोकयसे स्फुटाभाम् ॥ ४८८ ॥

किञ्चास्त्वदृष्टमिह कारणमर्थराशौ
नैयायिकस्य न ततोऽपि विभुत्वसिद्धिः ॥
स्वाधारयोगपरिकल्पनमन्तराऽपि
शक्त्यैव यद्भवितुमर्हति हेतुताऽस्य ॥४८९॥
वैचित्र्यमेव शरणं विभुवादिनोऽपि
यत्नो यतो नहि ततोऽर्थभवे समर्थः ॥
यत्ने कृतेऽपि बहुशो न मुखं प्रयाति
ग्रासो विनैव च करग्रहणं जनानाम् ॥ ४९० ॥
आकर्षणं भवति तञ्च विनापि मान्यं
स्पर्शादयोमणिगुणादयसस्तवापि ॥
सान्निध्यतो न च परोऽस्ति तयोस्तु प्राप्ति-
र्नोऽदृष्टकल्पनमिहापि तव प्रशस्तम् ॥४९१॥
शत्रोर्यथा मरणहेतुरयं तथैव
श्येनादियागजनितः सुहृदो न किं स्यात् ॥
उद्देश्यताद्यपरबन्धमुरीकरोषि
चेत्तर्ह्यलं विभुतयाऽऽत्मप्रकल्पनेन ॥ ४९२ ॥
संसर्गसंघटितमेव न कारणत्वं
शक्त्यात्मकं भवति किन्तु जिनागमे तत् ॥
शक्तिः स्वकार्यनियता नियतात्मभाव-
स्थित्या भवेन्नियतकारणगैव किञ्च ॥४९३॥
स्याद् गौरवन्तव विरोध्यविरोधकत्वे-
ऽवच्छेदकस्य नियतस्य प्रवेशनेन ॥

यस्माद् घटात्मनि मतेर्विरहेऽपि देहा-
त्मन्यस्ति बुद्धिघटनैकविभुस्वरूपे ॥४९४॥
ज्ञानादिकं प्रति तनोर्ज्जनकत्वमेवं
स्यात्कल्पनीयमिति गौरवमत्र किन्न ॥
आपादकापगमतोऽविभुतामते नो
नापत्तिरस्ति तत एव न गौरवं स्यात् ॥४९५॥
ज्ञानादिकश्च नहि तत्र परप्रकाशे
सिद्ध्येत् कुतोऽस्य ननु साश्रयता गुणत्वात् ॥
तत्तच्छरीरनियमोऽपि विभोर्न्न युक्तो
ज्ञानादि तन्नियमितं सुतरान्न च स्यात् ॥४९६॥
नादृष्टतोऽपि नियमस्तव युज्यतेऽत्र
तस्यैव यन्न च नियामकमस्ति किञ्चित् ॥
स्वस्वामिभावनियमोऽपि कथन्तथैवाऽ-
दृष्टात्मनोर्नियतयोरुपपद्यते ते ॥४९७॥
नन्वेतदर्थमिह सर्वपदार्थविज्ञोऽ-
धिष्ठायकोऽक्षिचरणानुमतो महेशः ॥
पश्यन् स एव नियतात्मगतन्त्वदृष्टं
स्वस्वामिभावनियमेन करोतु किन्नो ॥४९८॥
कार्यं सकर्तृकमिति स्वत एव लोकैः,
सामान्यतोऽत्र नियमोऽवगतो घटादौ ॥
भूम्यङ्कुराद्यवयवित्ववशात् प्रसिद्धं
कार्यं स्वकर्तृशिवसाधनतत्परन्नः ॥४९९॥

स्याल्लाघवात् स विभुरेकतयैव मान्यो
ज्ञानाद्यजन्यमत एव भवेच्च तस्य ॥
नित्यत्वतो भवति चाविनिगम्यभावा-
ज्ज्ञानादि सर्वविषयं परमेश्वरस्य ॥५००॥
एतावता सकलवित्सकलप्रणेता
युक्त्या प्रसिद्ध्यति तथा सति तत्र मानम् ॥
शब्दोऽपि तद्विरचितो नहि धर्म्यसिद्धि-
दोषादितोऽनुमितितोऽस्य निराक्रियास्ति ॥५०१॥
इत्यादि गौतमसुतैरुपगीयमानं
न्यायानुसारिपथवर्त्ति न युक्त्यभावात् ॥
युक्तिस्सती भवति वस्तुप्रसाधिका या
नैकान्तवादिमतनिर्भरतो भवेत्सा ॥५०२॥
नाचेतनं भवति चेतनसव्यपेक्ष-
मेव स्वकार्यजनने पटुरित्यमन्दैः ॥
व्याप्तिर्मता तव तु येन प्रवृत्तिभाज-
स्तत्प्रेरिता अणुमुखाः स्वत एव नैवम् ॥५०३॥
नाकारणाद् भवति कार्यमतोऽनुमा स्यात्
कार्येण हेतुविषया न ततो महेशः ॥
कर्त्ता प्रसिद्ध्यति यतो नहि जन्यमात्रे
कर्त्रा विनाऽभवनमव्यभिचारि दृष्टम् ॥५०४॥
यद्दृष्टिमात्रत इह स्मृतिरस्ति कर्त्तु-
स्तादृग्पदार्थजनको भवतोऽस्तु कर्त्ता ॥

क्षित्यङ्कुराद्यनुभवेऽपि न जायते यत्
कर्त्तुः स्मृतिर्न्न च सकर्तृकमिष्यते तत् ॥५०५॥
एकत्र दर्शनबलाद्यदि कार्यमात्रे
कर्त्ता मतो जनक ईश इहेन्द्रमूर्ध्नः ॥
किं कारणन्नहि नरो भवतां मते स्यात्
कुम्भादिवद् भवति सोऽपि मृदो विकारः ॥५०६॥
कर्त्ता शरीररहितो न च संप्रसिद्धो-
ऽदृष्टोऽपिचेत्तव मतो नियमानुरोधात् ॥
क्षित्यङ्कुराद्यपि घटादिविलक्षणन्न
कार्यन्तदा किमिह दृष्टमकर्तृकं स्यात् ॥५०७॥
कार्य्यत्वतो भवतु कारणजन्यताऽस्य
तत्रापि लाघवबलादणुजन्यतैव ॥
भासेत लैङ्गिकमतौ भवजन्यता तु
नो गौरवप्रतिहता तव नीतिरीतेः ॥५०८॥
एकान्ततस्तव मता न च कार्यताऽत्र
पक्षेऽस्त्यतो भवति नो किमु हेत्वसिद्धिः ॥
सामान्यतो भवति साऽव्यभिचारिणी नो
आत्माद्यपक्षगमनादिति चिन्तनीयम् ॥५०९॥
एतेन नावयविताऽपि मता तव स्यात्
कार्यत्वसिद्ध्यनुगुणा शशशृङ्गकल्पा ॥
सामान्यतो भवतु सा न तयार्थसिद्धिः
काचित्तवाभिलषितेति विचारयान्तः ॥५१०॥

ज्ञानत्वतो निखिलमेव भवेच्च जन्यं
  ज्ञानं तदन्यदपि तेऽनुमतं कथं स्यात् ॥
किं वा तथैव न घटादिविलक्षणं सत्
  कार्यं मृदाद्यपि मतन्तव कर्त्रजन्यम् ॥५११॥
संवेदनं स्वत इहोपगतं त्वया नो
  जीवात्मबोधगतमीश्वरबोधगन्तत् ॥
ज्ञानत्वतो भवितुमर्हति नैव तद्वत्
  सर्वज्ञता वद तदाऽस्य कथन्नु युक्ता ॥५१२॥
जात्या समानमपि तन्निखिलावगाहि
  स्वात्मावभासि च विलक्षणमिष्टमस्य ॥
कार्यत्वतस्तदिव तुल्यमकर्तृकञ्च
  कुम्भादिनाऽङ्कुरमृदादि विलक्षणं सत् ॥५१३॥
जन्यस्य वृत्तिनियमो ननु कार्यभावा
  द्यद्येन जन्यमिह तन्नियतं तदस्तु ॥
ज्ञानन्तु तत्तव मते नहि जन्यमिष्टं
  कस्मात् ततो न सकलात्मगतं भवेत्तत् ॥५१४॥
एतेन सर्वविषयत्वप्रसाधिका ते
  युक्तिर्भवेत्सकलवृत्तिप्रसाधिकाऽपि ॥
अत्र स्वभाव उररीक्रियतेऽथ तर्हि
  कर्त्तुर्विनाऽपि तत एव न किं मृदादि ॥५१५॥
स्याल्लाघवाद्यदि न सर्वगतस्स बोध-
  स्तेनैव सर्वविषयोऽपि न युज्यतेऽथ ॥

एकत्र तद्विनिगमो न परत्र चेत्तत्
तुल्यं निभालय मृदादिषु कार्यतायाम् ॥५१६॥
कर्तृत्वमस्य यदि बोधप्रयत्नकाम-
संसर्ग एव ननु तर्हि समस्तभावे ॥
कर्तृत्वमापतितमस्य ततो न नित्यं
किञ्चित्तवाप्यभिमतं स्थिरतामुपैतु ॥५१७॥
यद्धेतुगोचरमतिर्न्ननु तस्य कर्त्ता
नान्यस्य तद्विगमतो यदि सम्मतस्ते ॥
ज्ञानादि तर्हि नहि केवलमर्थकारि
कार्यव्यवस्थितिरिहान्यबलाद्यतोऽभूत् ॥५१८॥
कर्त्ता न सर्वजनकावगतौ समर्थः
कुम्भादिकार्यजननेऽप्यवलोकितोऽस्ति ॥
यस्माददृष्टमपि कारणमस्त्यदृष्ट-
कालादिकं घटपटादिविधानदक्षैः ॥५१९॥
एवं समस्तजनकावगतेरभावे-
ऽपीशोऽङ्कुरादिविदधातु ततो न तस्य ॥
स्यात्कल्पनं सकलकारणप्रेरकत्वा-
दज्ञातहेतुरपि किन्न करोतु कार्यम् ॥५२०॥
सामान्यतो न वपुषाऽनुविधातनस्ति
कार्यस्य तेन नहि कारणमिष्यते तत् ॥
कर्त्रापि नैव सममस्ति विलोक्यमानं
प्रेक्षवता तदिति सोऽपि न कारणन्ते ॥५२१॥

न प्रक्रियानुसरणेन भवेद् व्यवस्था
कर्त्ता प्रसिद्ध्यतु यतो निखिलेऽपि कार्ये ॥
किञ्चान्वयो न नियतो व्यतिरेक एव
किन्त्वत्र कारणतयाऽभ्युपगम्यमाने ॥५२२॥
ईशस्त्वया सकलकालगतो मतोऽस्ति
काले ततो न विरहोऽस्य तथा न देशे ॥
व्याप्त्यान्वयादिति कथं व्यतिरेकशून्ये
हेतुत्वमप्युपगतन्तव सिद्धिमेतु ॥५२३॥
ज्ञानादयो निखिलकार्यजनौ समर्था
व्यापारतामनुभवन्ति सदैव तस्य ॥
कार्यन्ततो निखिलमेव सदैव किन्न
सामर्थ्यभाजि जनके न जनेर्विलम्बः ॥५२४॥
सोऽपेक्षते यदि परं सहकारिणं त-
न्नित्यं भवेदुत ततो व्यतिरिक्तमेव ॥
आद्ये भवेज्जनिमतान्न जनेर्विलम्बः
कर्त्ता सदाऽस्ति सहकारिकरम्बितो यत्॥५२५॥
अन्त्ये स ईश्वरकृतोऽभ्युपगम्यते चेत्
तस्यापि किन्नहि भवेच्च सदैव जन्म ॥
तत्राऽपि सोऽन्यसहकारिसमाश्रयेण
हेतुर्भवेद्यदि तदा सुदृढाऽनवस्था ॥५२६॥
इष्टानवस्थितिरियं हि प्रमाणमूला
विश्वव्यवस्थितिरियं न यतोऽन्तरा ताम्

इत्यादितार्किकवचो न विचाररम्यं
भावावबोधविरहेण प्रवर्त्तमानम् ॥५२७॥
अन्यानि यानि जनकानि त्वयोदितानि,
वस्तूनि तान्यपि महेशकृतानि चेत्स्युः ॥
सर्वाणि तानि न भवन्ति सदैव कस्मा-
देवं स्थितौ च जनकानि कुतः क्रमेण ॥५२८॥
तत्रानवस्थितिलता न हृदि स्थिता ते
जैनैरपीह ननु सोपगतैव यस्मात् ॥
किन्त्वीदृशापेक्षण ईश्वरस्या-
पेक्षानवस्थितिघटा त्वपरैव काचित् ॥ ५२९ ॥
तत्कारणानि यदि नेश्वरसम्भवानि
तैरेव किं भवति नो व्यभिचारि लिङ्गम् ॥
प्रेक्षावतां भवति किञ्च प्रयोजनेन
व्याप्ता प्रवृत्तिरिह नेतरथा क्रियायाम् ॥५३०॥
सम्प्राप्तकामनिकरस्य महेश्वरस्य
नो ते प्रपञ्चकरणात्किमपीष्टमिष्टम् ॥
क्षित्यङ्कुरादिकमयं विदधातु कस्मा-
त्प्रेक्षाऽथवा किमु भवेन्न त्वयाऽस्य लुप्ता ॥५३१
कारुण्यतो भगवतो यदि ते प्रवृत्तिः
सृष्टिर्भवेच्छुभमयी न च तद्विरुद्धा ॥
क्रीडा तु रागनियता न भवेन्महेशे
न क्रीडयाऽपि तत एव जगत्प्रवृत्तिः ॥५३२॥

दुःखापनोदनकृते च भवेद्विलासः
किं वा सुखाय तदुभावपि नो महेशे ॥
स्वातन्त्र्यमात्मनियतं सकलेषु पश्यन्
दुःखान्वयं जगदिदं प्रकरोतु कस्मात् ॥ ५३३॥
धर्म्माद्यपूर्वसहकारिवशान्महेशो
वैचित्र्यशालि जगदेव करोति नान्यत् ॥
एवं मतं यदि तदा परतन्त्रतैव
स्वातन्त्र्यमस्य नहि तेऽभिमतन्तु युक्तम् ५३४
धर्म्मं विलोक्य ननु तेन सुखं करोतु
पापं विलोक्य विरतोऽस्तु च दुःखसृष्टेः ॥
एवं कृते भवति नो परतन्त्रताऽनु-
कम्पापि सर्वजनिमत्सु प्रकाशिता स्यात् ॥५३५
पापं विधाय पुनरस्य विनाशकर्त्तु-
र्भोगेन मूढजनतोऽप्यपकृष्टताऽस्य ॥
नूनं भवेन्न नियमोऽस्ति तथा विनाशो
भोगेन कर्मपटलस्य न चान्यथेति ॥५३६॥
ज्ञानाग्निनाऽप्यशुभकर्म्मततेर्विनाशः
शास्त्रे तवापि ननु सम्प्रतिपन्न एव ॥
ज्ञानं स्वसन्ततिगतन्न कथं विधाय
सर्वोपकारनिपुणोऽप्यभवन्महेशः ॥५३७॥
दण्ड्याय दण्डमिह यन्नृपतिर्ददाति
रागादिदोषकलितो व्यपदिश्यते तत् ॥

दण्ड्यापकारविषये च न कर्तृताऽस्य
शम्भुस्तवाभिलषितस्तु ततो विरुद्धः ॥५३८॥
राजा स्वतन्त्र इह नैव तथा क्रियायां
मन्त्र्याद्यनेककरणोपकृतः प्रभुस्सः ॥
राज्यक्षयादिभयतो नयमार्गगामी
नैवं शिवस्तव मतोऽखिलकार्यकर्त्ता ॥५३९॥
राजा प्रसन्नहृदयो द्रविणं ददाति
क्रुद्धो हरत्यखिलमेव धनञ्च किं वा ॥
कोपप्रसादविगतो भवतां महेशः
कस्येष्टकृद् भवतु कस्य च दुःखकारी ॥ ५४०॥
धर्म्मादयो नियमिता नियमेन कार्यं
कुर्वन्ति नोऽनियमिता इति शम्भुसिद्धिः ॥
शम्भुस्स्वयं यदि न कार्यजनौ प्रभुस्स्यात्
सिद्धिस्तदा भवतु तस्य कथं पटिष्ठा ॥५४१॥
नेत्रादिकं नियतगोचरमत्र दृष्टं
क्षेत्रज्ञतोऽनियतगोचरतस्स्वकीये ॥
ग्राह्ये प्रवृत्तिमदधिष्ठितमेव तद्वत्
क्षेत्रज्ञराशिरपि किन्न ततो महेशः ॥ ५४२॥
एतन्न युक्तमनवस्थितिदोषतस्तेऽ-
धिष्ठायकानुशरणस्य यतो न काष्ठा ॥
विश्रान्तिरस्ति यदि तर्हि न शम्भुसिद्धि-
र्व्याप्तेर्लयाद् भवितुमर्हति गौतमानाम् ॥५४३॥

पक्षाप्रसिद्धिरिह दोषतया न चेष्टो
जैनैर्यतो भवतु तस्य शरीरिताद्ये ॥
साध्येऽप्रसिद्धिघटना खलु धर्म्म्यसिद्धया
वैकल्पिकी त्वभिमता बुध धर्म्मिसिद्धिः ॥५४४

किञ्च स्वतन्त्रगमके खलु धर्म्म्यसिद्धि-
र्दोषो भवेन्न च प्रसङ्गतयाऽप्यभीष्टे ॥
एवं स्थिते भवतु किन्न च कर्तृतादे-
रीशे शरीरघटनादिप्रसञ्जनन्नः ॥ ५४५॥

ईशोऽथवा किमु न जैनमते मतोऽस्ति
धर्म्यप्रसिद्धिवचनं वचनीयमेव ॥
कर्त्ता परन्न च भवेत्तत एव तस्य
कर्तृत्वखण्डनपरं शिवखण्डनन्नः ॥५४६॥

तीर्थप्रवर्त्तनपटुर्भवतां मतेऽपि
कस्माद् भवेत्स इति नैव परेण चोद्यम् ॥
कामादिदोषरहितोऽपि हि तीर्थकृत्व-
स्वाभाव्यतो भवति तीर्थकरो जिनेन्द्रः ॥५४७॥

यत्तेन तीर्थकरनाम शुभैरनेकैः
कर्मार्जितन्तदुदयाद्भविकोपकृत्यै ॥
तीर्थं प्रवर्त्तयति कर्म्मवशेन सिद्धो
निःशेषकर्म्मवियुतोऽतनुरार्हतानाम् ॥ ५४८ ॥

नैतद्गुणात्मकमिहाभिमतं जिनानां
ज्ञानादिवद् भवति पौद्गलिकं परन्तु ॥

स्वाभाविकोर्ध्वगतिमानपि यस्य योगा-
दात्मा भवे भ्रमति मत्त इवेह मद्यात् ॥५४९॥
नन्वत्र गौतमसुतानुमतो न माता
ज्ञानन्नवा न च तयोस्समवायबन्धः ॥
इत्थं त्वयैव विनिभालितमेतयैव
नीत्या न किं गुरुमतं मतमद्वितीयम् ॥५५०॥
न स्वर्गलोकमनुगच्छति कोऽपि जीवो
देहाद्विभिन्न इह सोऽपि न मानसिद्धः ॥
पूर्वः परो न च भवो नरकादिकन्नो
प्रत्यक्षभिन्नमथ मानममानमेव ॥५५१॥
किं पूजया किमु तथेन्द्रियनिग्रहेण
दारादिभोगविमुखैश्च मुधा तपोभिः ॥
कश्चागतोऽत्र परलोकत इत्यविज्ञा
धूर्त्तप्रलापवचनैः किमु वञ्चिता नो ॥५५२॥
चत्वारि सर्वजनताऽक्षजगोचराणि
भूतानि सन्ति नहि तद्व्यतिरिक्तमस्ति ॥
तान्येव देहपरिणामविशेषलाभे
किञ्चेतनानि न भवन्ति यतोऽन्य आत्मा५५३
दृष्टो हविर्गुडकणिक्कसमष्टिरूपे
किं मोदके न हि विचित्ररसप्रकर्षः ॥
किं वा तथा न मदशक्तिरनन्यरूपे
संयोगतस्समुदयात्मनि दृष्टपूर्वा ॥५५४॥

शृङ्गं शशीयमपि किन्न मतन्त्वयाऽङ्ग
नो दृश्यते क्वचिदपीति न तन्मतं चेत् ॥
आत्मोपलब्ध इह किं भवता कदाचि-
न्नेत्रादिना ननु यतो न भवेत् स मिथ्या ५५५
नाहं प्रतीतिविषयो भवतामिहात्मा
गौरोऽहमित्यनुभवो हि शरीरधर्म्मैः ॥
एकत्र धर्म्मिणि सहावगतौ प्रवीणो-
ऽहन्त्वस्य सुख्यहमिति प्रथनन्तु मिथ्या ॥५५६॥
लिङ्गं न चात्र निरुपद्रवमीक्ष्यते यत्
तेनानुमानमपि तस्य भवेन्न सिद्धौ ॥
नो व्याप्तिबुद्धिमनपेक्ष्य तवानुमायाः
किञ्चोद्भवोऽप्यभिमतो बुध लिङ्गजायाः ॥५५७॥
व्याप्तिग्रहो भवति न व्यभिचारशङ्का-
भङ्गानुकूलमनपेक्ष्य च तत्र तर्कम् ॥
व्याप्तिग्रहञ्च विरहय्य न तर्कजन्म
तत्रापि किं भवति न व्यभिचारशङ्का ॥५५८॥
तस्याः क्षयोऽपि यदि तर्कसमाश्रयेण
स्याच्चक्रको भ्रमणतोऽभ्रमणेऽनवस्था ॥
व्याप्तिग्रहोऽक्षजनितः किमु लिङ्गजो वा
तत्राक्षजो यदि मतो न च युज्यते सः ॥५५९॥
यस्मात् पुरःस्थितपदार्थमतौ प्रवीण-
न्नेत्रादिक व्यवहितार्थमतावलन्नो ॥

व्याप्तिग्रहो निखिलसाधनसाध्यधर्म्मि-
ग्राही कथं भवतु तेन न लिङ्गजोऽपि ॥५६०॥
नैवागृहीतनियमोऽनुमितौ समर्थो
हेतुस्ततो नियमबुद्धिरिहापि लिङ्गात् ॥
तत्रापि तद्ग्रहणमन्यत एव लिङ्गा-
देषाऽपरा नियमबुद्धिकृताऽनवस्था ॥५६१॥
गौणं प्रमाणमिह नैव मतं बुधानां
प्रत्यक्षमात्रमत एव भवेत्प्रमाणम् ॥
गौणात् त्वयाऽनुमितिकारणवृत्तिरुक्ता,
गौणत्वतो न तव मानमतोऽनुमानम् ॥५६२॥
पक्षो यतो भवति साध्यविशिष्टधर्म्मी
व्याप्तिग्रहे स तव साध्यपरो मतोऽथ ॥
व्याप्यस्य पक्षघटनाग्रहणे स धर्म्मी
गौणाद्विना कथय काऽत्र तवास्ति नीतिः॥५६३॥
सामान्यमत्र यदि साध्यतया मतन्ते
तत्साधनं भवति तर्हि वृथैव सिद्धेः ॥
किञ्च प्रवृत्तिरपि नैव फलार्थिनां स्या-
ज्ज्ञानं विनाऽन्यदिह तस्य यतो न कार्यम् ५६४
व्याप्यग्रहाद् भवति नैव विशेषरूप-
स्साध्योऽन्वयादिघटना न विशेषतो यत् ॥
प्रत्येकपक्षपरिदर्शितदोषतस्तु,
नैवोभयं भवति साध्यतयाप्यदुष्टम् ॥५६५ ॥

लोके तु धूममतितो गिरिगह्वरे या
धूमध्वजावगतिरस्ति न सानुमाख्या ॥
सम्भावना भवति किन्त्वथवा स्मृतिस्साऽ-
संसर्गभानविकला व्यवहारयोग्या ॥५६६॥

यच्चास्त्यनुव्यवसितावनुमात्वभान-
मस्यास्ततो भवति नानुमितित्वसिद्धिः ॥
यस्मादसन्मतिबलादुपनीतमेवा-
सत्ख्यातिबोधविषयोऽनुमितित्वमस्याः ॥५६७॥

तन्मानसत्वनियतन्न परोक्षवृत्ति
किं वास्त्वतो भवति लाघवमत्र पक्षे ॥
सामान्यतो भवति मानसबोधमात्रे
बाह्याक्षबोधजनकं प्रतिबन्धकं यत् ॥५६८॥

तस्मिन् परोक्षमतियोगिनि कल्पिते तु
किं गौरवन्न प्रतिबन्धकतान्यतातः ॥
प्रत्यक्षता निखिलविज्ञजनप्रसिद्धा
हेया न तर्करसिकैरनुमात्मबोधे ॥ ५६९ ॥

साङ्कर्य्यदोषघटना तु कुतार्किकाणां
जातित्वबाधकतयाऽभिमता न विज्ञैः ॥
आत्मत्वजातिरपि येन न भूतसङ्घे
देहात्मके गुरुमतेन भवेत्प्रसिद्धा ॥५७०॥

संयोग इन्द्रियभवे न पृथक्प्रकल्प्यो
व्यापार आत्मविषये मनसोऽपि बोधे ॥

संयोगिनो हि समवायत एव देहे
नेत्रादिना मतिरुदेष्यति तार्किकाणाम् ॥५७१॥
शालूकतो भवति गोमयतोऽपि जन्म
शालूकजातिनियमेऽपि च वृश्चिकानाम् ॥
ज्ञानैकजातिनियमेऽपि विभिन्नजाते-
र्हेतोर्भवेत् किमु न बुद्धिजनिस्तथैव ॥५७२॥
पित्रोः कदाचिदिह शुक्ररजस्समुत्थो
बोधो रसायनप्रयोगभवः कदाचित् ॥
अभ्यासतो भवति सोऽथ च तेन नात्मा
देहात् पृथक्तव प्रसिद्धिमुपैति युक्त्या ॥५७३॥
प्रज्ञादिकं प्रतिदिनञ्च शरीरवृद्ध्या
प्राप्तप्रकर्षमिह सर्वजनप्रसिद्धम् ॥
दृष्ट्वापि देहगुणतां यदि तस्य नैव
मन्ता तदा भवतु तस्य तु को विपक्षः ॥५७४॥
बालस्य जन्मसमयेऽपि च दुग्धपाने,
वृत्तिस्स्वभावबलतो न च वासनातः ॥
शङ्का न तत्र विदुषां खलु युज्यतेऽर्थे
स्वाभाविकी हि बहुधा जगतो व्यवस्था॥५७५
शीतं जलं कथय केन कृतन्तथाग्नि-
रुष्णस्वभाव इह केन विनिर्मितोऽभूत् ॥
आकर्षणानुगतशक्तिरयोमणीनां
कस्मादभून्न च तथा प्रकृते वितर्कः ॥ ५७६ ॥

नो कार्यकारणसमाश्रयणेन कोऽपि
कार्यो विचार इह तर्कवितर्कदक्षैः ॥
नो वस्तुतो गुरुमतेऽनुमतः कयोश्चि-
द्यत्कार्यकारणतया नियमेन बन्धः ॥५७७॥

प्रत्येकशो घटपटादिषु वर्त्तते नो
त्रित्वादिकं पुनरिदं समुदायवृत्ति ॥
तद्वन्न भूमिजलवह्निमरुत्स्वपि स्यात्
प्रत्येकशश्च किमवृत्त्यपि चेतनत्वम् ॥५७८॥

कुम्भादिभावमिह योग्यमवाप्य दृश्योऽ-
दृश्योऽपि चाणुनिकरस्समुदाय्यभिन्नः ॥
देहस्वभावमवलम्ब्य तथैव किन्न
भूतानि चेतनतया परिणामयन्ति ॥५७९॥

मुक्तात्मनां विबुधगौतमतन्त्रसिद्धो
ज्ञानादिकस्य विरहोऽपि यथा तथैव ॥
प्राणादियोगविगमे ननु चेतनाया
देहे लयोऽपि मृतके गुरुतन्त्रसिद्धः ॥५८०॥

आत्मप्रसिद्धिजनकं न यथाऽत्र मानं
तद्बाधकञ्च न तथैव विभाति मानम् ॥
यस्माद्विचारकतयाऽक्षजबोध इष्टो
नाप्तेस्तु यद्यपि तथापि भवेत् प्रसङ्गः ॥५८१॥

यद्यङ्कितस्य शशशृङ्गनिषेधनेऽपि
तस्यैव यद् भवति वृत्तिरबाधितस्य ॥

आत्माऽस्ति नेति न निषेधविधानमेवं
यद्यस्ति तत्र तव किन्तु किमस्ति मानम् ५८२
सर्वत्र तेन बुध पर्यनुयोगमात्रं
कृत्वा बृहस्पतिरमन्दमतिप्रभावात् ॥
ध्यान्ध्यं विमूढजनचित्तसमाश्रितन्तु
स्वर्गादिखण्डनगिराऽनयदन्तधाम ॥५८३॥
चार्वाकबाललपितं गुरुगौरवेण
मान्यं भवेदनुपसेवितसद्गुरूणाम् ॥
एतद्वचो न च जिनागमतत्त्वनिष्ठा-
काष्ठाविशुद्धमनसां पुनरार्हतानाम् ॥ ५८४ ॥
चार्वाकमन्दमतयो हि परात्मसंस्था
अज्ञानसंशयविरुद्धमतीरनक्षाः ॥
ज्ञात्वेन्द्रियैर्न्न प्रभविष्णव आदधाना
बुद्धिं यथार्थविषयामपनेतुमेते ॥ ५८५ ॥
स्वर्गादिकश्च जिनगौतमतन्त्रविज्ञै-
रिष्टन्त्वलौकिकमिति प्रमितन्त्वया यत् ॥
तन्नाक्षजप्रमितितो नयनाद्ययोग्यं
चेष्टादिलिङ्गजनितानुमितेः परन्तु ॥ ५८६ ॥
अध्यक्षगोचरतया नियमोऽस्ति नो वा
सत्त्वस्य तेऽभिमत आद्य इहाप्रशस्यः ॥
यस्मात्तथा सति तवापि मते प्रमाणं
प्राप्तं भवेदनुमितेर्जनकं विविक्तम् ॥५८७॥

आत्माऽन्तिमे वद तवापि कथन्न सत्यो-
ऽप्रत्यक्षगोचरचरोऽपि मृषा प्रलापिन् ॥
व्याप्ता व्यवस्थितिरियं किमु मानतो वा
मेयस्य किन्नु तव नैव मतेऽस्ति विद्वन् ।५८८

आद्येऽनुमानमपि किन्न करोषि चित्ते
भङ्ग्यन्तरेण वचसा प्रतिपादितं यत् ॥
अन्त्ये कथन्न शशशृङ्गमपि प्रमेयं
सिद्ध्येद्बृहस्पतिमतन्तु ततो विचित्रम् ॥५८९॥

स्वाध्यक्षबोधविगमात् किमु नास्ति जीवो
देहाद्विविक्त उत वा निखिलैरदृष्टेः ॥
आद्ये स्वकीयनयनाद्यपि नैव सिद्ध्येद-
न्धस्य ते किमु घटाद्यपि सिद्धिमेतु ॥ ५९०॥

प्रत्यक्षतो नहि कदाचिदपि क्वचिद्वा
कैश्चित्तनोरवगतो व्यतिरिक्त आत्मा ॥
एवन्तवाभिलषितोऽन्तिमकल्प एषा
बुद्धिर्मताक्षजनितात परैव काचित् ॥ ५९१॥

कल्पो न चाद्य इह तेऽभिमतो यतो नो
नेत्रादिकस्य विषया व्यवधानभाजः ॥
अन्त्ये परोक्षमतिरेव भवेत्ततस्ते
मान्याऽनुमाऽपि च मते किमु नैव विद्वन् ५९२

या लौकिकैरुपगताऽनुमितिर्यथार्था
लोकप्रवृत्तिचतुरा तव सम्मता सा ॥

शास्त्रेऽपि लौकिकपरीक्षकयोर्विशेषो
नो कश्चिदत्र विबुधैरवलोकितो यत् ॥५९३॥
प्रामाण्यलक्षणमबाधितगोचरत्वं
संवादितेति तवसम्मतमेतदेव ॥
प्रामाण्यसाधकतयाऽक्षभवे तु बोधे
तत्रानुमाऽभ्युपगमोऽरुचितोऽपि किन्नो॥ ५९४ ॥
शब्दार्थयोश्च समयग्रहसव्यपेक्षो-
द्बुद्धस्वभाव इह वाचकतादिरूपः ॥
संसर्ग आर्हतमते प्रमितोऽस्ति किन्नो
आप्तागमोऽपि तव येन न च प्रमाणम् ॥५९५॥
सर्वज्ञसिद्धिरिह दर्शितनीतितस्ते
मान्यैव तद्वचनतः प्रतिपादिता ये
स्वर्गादयो नहि भवन्ति च तेऽप्यसत्याः
प्रत्यक्षगोचरचराः परमस्य पुंसः ॥५९६॥
यद्यागमो न च भवेत्तव मानमिष्टं
त्वद्वाक्यतो नहि परस्य भवेत्प्रमार्थे ॥
नो वा परोक्तवचनात्तव बोधलेशो
लोके कथाऽपि च परेण निरार्थिका ते ॥५९७॥
शास्त्रन्निरर्थकतयैव गुरुप्रणीतं
वाच्यन्न कैश्चिदपि तत्त्वमतात्रहेतु ॥
प्रेक्षावताऽपि गुरुणा स्वयमेव प्रेक्षा-
कारित्वमात्मनियतं विफलीकृतं किम् ॥५९८॥

किञ्च प्रसिद्धिपदवीन्न गुरुस्तवापि,
शब्दानुमानप्रमितौ विरहय्य याति ॥
शाब्दप्रमाणमुररीकुरु लोकदृष्ट्या-
प्यास्था गुरोरपि मते तव तद्विना नो ॥५९९॥
देहस्वरूपपरिणामबलेन भूता-
न्येवास्ति चेतनमिति प्रतिपादितं यत् ॥
तत्रापि किं स च ततो व्यतिरिक्त इष्टो-
ऽभिन्नोऽथवा न प्रथमस्तत्र सम्मतोऽस्ति॥६००॥
तत्वे बृहस्पतिविलोकिततत्वसंख्या-
लोपोऽधिकस्य वचसा च तवैव प्राप्तेः ॥
पक्षो द्वितीय इह ते यदि सम्मतस्तत्
किन्नो घटादिषु भवेदविशेषतस्तत् ॥६०१॥
नो मोदकाद्यपि हविर्गुडकाद्यभिन्न-
मेकान्ततो जिनमते प्रथितं परन्तु ॥
भिन्नस्वभावगमनाद्व्यतिरिक्ततावत्
स्याद्वादतो भवति भिन्नमभिन्नमेभिः ॥६०२॥
प्रत्येकवृत्तिरिह चापि न चेद्रसादि-
न्नैयत्यतो भवति तर्हि कथं प्रकृष्टः ॥
यद्वद्धविर्गुडकणिक्कसमुद्भवस्स
तद्वत्कथन्न तिलरेणुजलादिभिस्सः ॥६०३॥
मद्ये न मादनफलो समुदाय्यभिन्ने
भिन्नेऽपि किन्तु समवैति मतेऽत्र शक्तिः ॥

चार्वाक तत्तदुभयन्तव सम्मतन्न
दृष्टान्तभावममलं प्रतिपद्यतेऽत्र ॥६०४॥
नो शक्तितो भवति चेतनता मते ते
प्रत्येकभूतपरमाणुगता यतस्सा ॥
दृश्या न चास्ति न च तद्व्यतिरिक्ततायां
प्रत्यक्षमानमपरन्तव सम्मतन्न ॥६०५॥
शक्तिश्च चेतनतया यदि सा विभिन्ना
सम्बन्ध एव भविता न तयोस्तदानीम् ॥
तादात्म्यमेव यदि तेऽनुमतन्तयोस्तत्
प्रत्येकशो भवतु चेतनताप्रकाशः ॥६०६॥
नायोग्यमिष्टमिह शृङ्गमतो यदि स्यात्
तद्वै शशे किमु न तन्मतिरक्षजा तत् ॥
प्रत्यक्षबोधविरहाच्च ततो न तस्य
सद्भावसिद्धिरियमेव गतिर्न्न जीवे ॥६०७॥
आत्मा परो न च परस्य हि चर्म्मदृष्टे-
र्योग्यस्ततो विशदबुद्धिचरो न चान्यैः ॥
सर्वज्ञबोधविषयास्तु समस्तभावा-
स्तत्रात्मनोऽपि निखिलस्य कथन्न भानम् ६०८
चेष्टादिलिङ्गजनिता मितिरस्मदादे-
र्मानं परात्मविषयाऽपि च चर्म्मदृष्टेः ॥
स्वात्मा स्वसंविदितबोधत एव साक्षात्
सिद्धो न चान्यदिह मानमपेक्षते नः ॥६०९॥

तत्राहमित्यधिगतिर्न्न शरीरतोऽस्ति
यस्मात् तमस्यपि महानिबिडे रजन्याम् ॥
देहप्रबोधविरहे नयनादितोऽस्या
भावो जनैः स्वविदितो निरपह्नुतोऽस्ति ॥६१०॥
नेत्राद्यजन्यविषयत्ववतस्त्वहन्त्वं
स्वाभाविकं भवति नो नयनादियोग्ये ॥
किन्त्वौपचारिकमतो व्यतिरिक्त आत्मा-
ऽहन्त्वप्रतीतिविषयो न शरीरमेवम् ॥६११॥
अत्यन्तसन्निधजने निजकार्यनिष्ठे
दृष्टाहमित्यधिगतिर्न्ननु लौकिकानाम् ॥
देहे स्वभोगजनकत्वबलात् तथैवा-
हन्त्वप्रतीतिरुपपद्यत एव पुंसाम् ॥६१२॥
तस्मान्न सुख्यहमिति प्रमितिर्मृषार्था
गौरोहमित्यधिगतेरुपचारतैव ॥
आत्मा ममायमिति केवलमुक्तिलासो
देहे स्वयं भवति वस्तुत एव वोधः ॥६१३॥
व्याप्त्यग्रहादनुमितिर्न्न परात्मनश्चेद्
धूमाद्धुताशनमतिस्तव किन्निमित्ता ॥
नैवानुमानमिह सम्मतमित्यवाच्यं
पूर्वोक्तदोषगणभीतिमता त्वया तु ॥६१४॥
देशान्तरन्तव मते न गृहीतमक्षैः
कालान्तरन्न तव भूतविविक्तिमस्ति ॥

तस्मात् कथं कथय ते व्यभिचारशङ्का
स्यादन्तरानुमितिमज्ञ परोक्षभावे ॥६१५॥
नो पञ्चलक्षणमिहानुमतन्तु लिङ्गं
नो वा त्रिलक्षणमथानुपपन्नता या ॥
साध्यं विना भवति हेतुगता तु सैका
सद्धेतुलक्षणमतो न च दोषपोषः ॥६१६॥
सा कार्यकारणबलादुत वा स्वभावा-
त्किं वान्यतः क्वचिदपि प्रथिता यदि स्यात् ॥
लोकप्रवृत्तिविरहादिप्रसङ्गतर्क्का-
जय्या तदा नहि बिभेति च शङ्कया ते ॥६१७॥
प्रत्यक्षतोऽनुमितितोऽथ च शाब्दतो वा
व्याप्तिग्रहो न च मतो बुध जैनतन्त्रे ॥
तत्खण्डनन्निखिलमेव सहायकन्नो
ह्यंशेन तेऽपि हृदि पल्लविता जिनोक्तिः ॥६१८॥
तर्कात्मकस्सकलसाध्यसमग्रहेत्वा-
क्षेपेण मानमिह जैनमतानुगानाम् ॥
व्याप्तेर्म्मतावलमयं श्रुतिगोचरः किं
जातः कदाचिदपि ते न गुरोस्सकाशे ॥६१९॥
शब्दप्रवृत्तिरिह चेद्यदि गौणवृत्त्या
नैतावता भवति बाधितगोचरत्वम् ॥
नो तं विना भ्रममतित्वमुपेयमस्या
येन प्रमात्वमविगीततया न सिद्ध्येत् ॥६२०॥

हेतोर्न्न पक्षघटनामितिरार्हतानां
 किञ्चानुमाफलतयोपगता मते तु ॥
पक्षप्रयोग इह गौणतयोत मुख्या-
 दित्यादिपक्षरचनानुचिता विकल्पैः ॥६२१॥
अम्भोनिधौ भवति वृद्ध्यनुमोदयेन
 चन्द्रस्य वृष्ट्यनुमितिस्तु पिपीलिकादेः ॥
साण्डस्य संचरणतोऽथ च कृत्तिकादेः
 पूर्वोदयादनुमितिस्त्वपरोदयस्य ॥६२२॥
ब्राह्मण्यसाध्यविषयाऽनुमितिश्च पुत्रे
 ब्राह्मण्यतस्सकललोकमतेव पित्रोः ॥
नैतादृशेष्वपि परिश्रमतो बुधेन
 लिङ्गेषु पक्षघटनाऽनुगतिर्विधेया ॥६२३॥
यत्रैव यो भवति येन विनाऽत्र हेतुः
 साध्येन धार्म्मिणि यतोऽनुपपन्नरूपः ॥
तत्रैव तस्य गमकस्स निजोपपत्त्यै
 स्यात्पक्षसाध्यनियमोऽपि च तावतैव ॥ ६२४ ॥
नाम्भोनिधेरुदरवर्त्त्यनलेन धूमो
 दृष्टो गिरौ खलु विनाऽनुपपन्नरूपः ॥
तस्मान्न तस्य गमको वद सोपयुक्ता
 हेतोऽस्तु पक्षघटना क्व तव स्थिताऽपि ॥६२५॥
हेतौ समस्ति तत एव न धीधनेन,
 वाच्यानुमाफलतया परमार्थतस्सा ॥

किं ज्ञाततादिरपि तत्र च विद्यमानोऽ-
भीष्टस्तथा विबुध गौतमतन्त्रयुक्त्या ॥६२६॥
सामान्यमात्रमिह साध्यतया मतन्नो
नो वा विशेष उभयात्मकमेव किन्तु ॥
प्रत्येकपक्षपरिदर्शितदोषजालः
स्याद्वादतन्त्रविमुखो लभतां क्व सिद्धिम्॥६२७॥

सम्भावना नहि प्रमाभिमता प्रमात्वं,
संवादतो भ्रमधियाऽवगतन्तु तस्याम् ॥
कार्यार्थिनोऽभिमतहेतुप्रवृत्तये स्यात्
संवादितार्थविषयत्वमयी न चास्ति ॥६२८॥

संभावना हि सविकल्पकबुद्धिरूपा
सा नार्थगोचरतया तव सम्मताऽस्ति ॥
संवादितामतिरपि भ्रम एव तस्यां
चेत्तर्हि किन्तव भवेदनवस्थितिर्न्न ॥६२९॥

स्यान्निर्विकल्पकसमुत्थविकल्पभास्य-
ग्राहित्वमत्र सविकल्पनमात्रवृत्ति ॥
संवादिता परमसौ न च निर्विकल्पे
तिष्ठत्यतः कथमिह प्रमितित्वबुद्धिः ॥६३०॥

सा निर्विकल्पकभवावगतार्थधीत्वं
स्यान्निर्विकल्पसविकल्पनमात्रवृत्ति ॥
इष्टा तदानुमतिरेव प्रमात्वसाध्या
तस्माच्छलादभिमता भवताम्मतेऽपि ॥ ६३१ ॥

संवेदनं स्वत इहानुमितेः प्रमात्वे
चास्मन्मते भवितुमर्हति तत्त्वयागात् ॥
सम्भावनायदिमा तव सम्मता स्यात्
संवेदनं स्वत इहापि भवेन्न चैवम् ॥ ६३२ ॥
सामान्यमत्र नहि तुच्छमबाध्यबोध-
ग्राह्यत्वतो नियतलिङ्गजबोधभास्यम् ॥
येन प्रमाऽनुमितिरेव भवेत्स्वतो न
संवेदनं तदवगाहि कथं प्रमात्वे ॥ ६३३ ॥
प्रत्यक्षमेव तव सम्मतमत्र नान्यत्
सम्भावनाऽप्युदयमेतु कथम्मते ते ॥
प्रत्यक्षहेतुविरहाद्धि परोक्षवह्वे-
र्भानं भवेन्नहि परन्तु विपर्ययस्य ॥ ६३४ ॥
कोटिद्वयावगतितो ननु संशयः स्यात्
कोटिद्वयावगतिहेतुरतस्तु वाच्यः ॥
एकैककोटिविषयीकरणे समर्थो
बोधोऽक्षजन्य इति नोभयकोटिभानम्॥ ६३५ ॥
स्याच्चेदियं स्मृतिरतो नियतप्रदेशे
वृत्तिस्तदाऽनुमितितो न भवेच्च पुंसाम् ॥
पूर्वानुभूतिविषये स्मृतितः प्रवृत्ति-
र्दृष्टा न सन्निहितधर्म्मिणि लौकिकानाम् ६३६
नासत्पदार्थविषयावगमेऽस्ति हेतुः
ख्यातिस्ततो भवति सद्विषयैव सर्वा ॥

अन्यत्र दृष्टविषयस्य यदन्यदेशे
 ज्ञानं भवेद् भ्रममतिस्तु तदेव यस्मात् ॥६३७॥
एवं स्थिते त्वनुमितित्वमतिर्यथार्था
 कुत्रापि चेत्तव मताऽनुमितिस्तदास्ति ॥
नो चेदनुव्यवसितावसतस्तु तस्य
 भानं कथं भवितुमर्हति हेत्वभावात् ॥ ६३८ ॥
अध्यक्षतोऽपि तव बोधगता न सिद्ध्येत्
 किञ्चासतोऽप्युपगते मतिगोचरत्वे ॥
तस्यास्त्वनुव्यवसितौ न कथन्तथैवा-
 सत्ख्यातितो भवति भानमिहाक्षबोधे ॥६३९॥
नो निर्विकल्पकमतिस्स्वत एव सिद्धा
 स्वप्नेऽपि भाति ननु येन तयैव सिद्धयेत् ॥
प्रत्यक्षता स्वनियता किमु शून्यता नो
 सिद्धयेच्च कल्पनमतेर्भ्रमतामते ते ॥६४०॥
नो मानसत्वनियताऽनुमितित्वजाति-
 र्व्याप्तिग्रहोद्भवमतौ नियमेन भावात् ॥
स्यादन्यथा घटपटाद्यपि मानसेऽस्मिन्
 सामान्यहेतुबलतः किमु नैव भास्यम् ॥६४१॥
तद्व्याप्यवत्त्वविषया मतिरन्यबोधे
 त्वत्सम्मतेह प्रतिबन्धकभावतश्चेत् ॥
बोधस्सुखादिविषयोऽप्यनुमानहेतौ
 सत्वे कथं भवतु मानस इष्यते यत् ॥६४२॥

भोगोद्भवो नियमतस्सुखदुःखभावे
तत्तद्द्वयं तव मतं यदि बोधमात्रे ॥
जात्यैकयाऽनुगतया प्रतिबन्धकंत-
दुत्तेजकं च कथितप्रतिबन्धकेऽथ ॥६४३॥
किं लघवादनुमितिव्यतिरिक्तता त्वं
त्यक्त्वा न कल्पयसि मानसबोधमात्रे ॥
पूर्वोक्तयुक्तिबलतः प्रतिबन्धकत्वं
तस्वेऽनुमा किमु न मानसबोधभिन्ना ॥६४४॥
एतेन यैरनुमितिव्यतिरिक्त एव
भोगान्यमानसभवेऽनुगतान्तु जातिम् ॥
स्वीकृत्य तद्वति मतं प्रतिबन्धकत्वं
तेषां मतं भवति गौरवतो निरस्तम् ॥६४५॥
आत्मत्वजातिरिह देहगता यदि स्यात्
किं चक्षुषा भवति नात्ममतिस्तु तत्र ॥
ज्ञानादिकश्च परदेहगतन्न कस्माद्
रूपादिवन्नयनतः स्फुटमेव भाति ॥६४६॥
स्वात्मप्रकाश इह जैनमते प्रमाता,
संयोगकल्पनभवा गुरुता न चास्ति ॥
न प्राप्य कार्यभिमतं नयनं मनश्च
सम्बन्ध इन्द्रियभवे निखिले न हेतुः ॥६४७॥
नापेक्ष्य गौतममतञ्च तथा लघुत्वं
तत्प्रक्रियात इह यन्नियमेन तस्य ॥

संसर्गता त्रुटिमतेरनुरोधतस्तु
कल्प्यैव नात्र विषयेऽन्यगतिस्तवास्ति ॥६४८॥

संयोगिनो हि समवायबलान्न चाणो-
रूपस्य चाक्षुषमतिर्बुध येन तस्मात् ॥
संयोगिनो भवति योग्यतया निवेशो
नोभिन्नजीवपरिकल्पनतो गुरुत्वम् ॥६४९॥

शालूकगोमयभवावपि वृश्चिकौ न
वैचित्र्यतोऽत्र भवतस्तु समानजातौ ॥
शालूकतोऽथ च न गोमय इष्यते वा
वैजात्ययोग्यऽपि च पौद्गलिकत्वभावात् ॥६५०॥

अभ्यासशुक्ररसयोगजचेतनासु
वैजात्यमण्वपि न च प्रतिपद्यते ज्ञैः ॥
तत्कारणेषु तु तथा तव सम्मतेषु
साजात्यमस्ति न च बोधजडत्वभेदात् ॥६५१

अभ्यास एव नियतो ननु तेषु हेतु-
र्नो शुक्रशोणितरसायनसेवनादिः ॥
दृष्टो यतो यमलयोस्तु रसायनादेः
साम्येऽपि तेन जनितोऽत्र मतेः प्रकर्षः ॥६५२॥

कस्मिँश्चिदेकविषयेऽभ्यसनेन शास्त्रे
शास्त्रान्तरे भवति यन्मतिपाटवादिः ॥
तेनापि सिद्ध्यति बटोरपरप्रयत्ना-
द्बुद्धिर्विनाऽप्यनुपमाऽभ्यसनप्रकर्षात् ॥६५३॥

एतद्भवे नहि यतोऽभ्यसनादिरस्य
जन्मान्तरस्य स तु सिद्ध्यति कार्यलिङ्गात् ॥
कार्यैकजातिनियमोऽसति बाधके नो
स्याद्धेतुजातिनियमव्यतिरेकतोऽत्र ॥६५४॥

नो देहवृद्धिबलतो नियमेन प्रज्ञा-
वृद्धिर्महाजगरनागवरादिकेषु ॥
वृद्धिः क्वचित्तु सहकारिविशेषतोऽस्तू-
पादानता नहि तनौ ननु चेतनायाः ॥६५५॥

क्षेत्रादिहेतुवशतोऽपि विवृद्धिभाजो
वृक्षादयः किमु भवन्ति न चाल्पबीजैः ॥
देहे विकारजननान्नियमेन बोधे
नो वा विकार उपलभ्यत एव किञ्च ॥६५६॥

देहैकदेशदलनेऽपि च सात्त्विकानां
ज्ञाने विकारकणिकाऽपि न जायते यत् ॥
स्वात्मैकतानमनसां च विकारलेशो
ज्ञाने न चास्ति विकृतेऽपि शरीरदेशे ॥६५७॥

नान्यानुभूतविषयस्मृतिरन्यपुंसो
दृष्टा भवेत् स्मरणमेव न देहपक्षे ॥
बाल्ये विलोकितपदार्थततेर्ज्जराया-
मेकं न वृद्ध्यपचयाच्च यतश्शरीरम् ॥६५९॥

सन्तानतोऽप्यनुभवस्मरणात्मबोधौ
नो हेतुजन्यविधयाऽत्र प्रकल्पनीयौ ॥

बाल्ये भवेत्प्रथमतो ननु चेतना ते
  कस्मान्न मातृगतचेतनतात एषा ॥६५९॥
तत्त्वेऽथवा भवतु मात्रनुभूतवस्तु-
  जातस्मृतिर्न्न कथमत्र शिशोस्तु बाल्ये ॥
पूर्वापरानुगतकार्मणदेहतोऽन्य-
  स्मान्नो भवेच्चपलताद्युपसर्पणञ्च ॥६६०॥
देहस्स चात्मनियतोऽध्यवसायभेदा-
  द्बन्धस्वरूपपरिणामतयात्मनैव ॥
संस्थापितः प्रकृतितोऽथ च देशतश्च
  स्थित्यानुभावत इति प्रविभाग इष्टः ॥६६१॥
वृत्तिर्न्न चेष्टजनकत्वमतिं विनैव
  ज्ञानं द्विधा त्वनुभवस्मृतिभेदतोऽत्र ॥
बालस्य चानुभवहेतुवियोगतो नो
  जन्मक्षणेऽनुभवबोधभवोऽभ्युपेयः ॥६६२॥
किन्तु स्मृतिर्भवति साऽनुभवं विना नो
  नैवानुभूतिरिह जन्मनि तस्य यस्मात् ॥
संस्कारतः परभवानुभवात्मलाभात्
  सा स्तन्यपानसुखसाधनताऽवभासा ॥६६३॥
एवं स्थिते तव तु कारणमन्तरा चेत्,
  स्वाभाविकी यदि प्रवृत्तिरसौ मता तत् ॥
किं सर्वदा सकलगोचर एव यत्नो
  नोदेति हेतुनिरपेक्षतया स्वभावात् ॥६६४॥

शैत्यं जले भवति कारणमन्तरा नो
नैवोष्णताऽनलगता जनकं विनाऽत्र ॥
शक्तिस्स्वकार्यनियता जनकं विनाऽय-
स्कान्तादिगा जिनसुतैर्न च सम्मताऽस्ति ॥६६५

किञ्च स्वभाववचनन्न निरर्थकन्ते
वाच्यन्तु किञ्चिदपि तस्य भवेदवश्यम् ॥
भूतातिरिक्तमभिधेयमनिष्टमेव
भूतात्मकं भवति तन्न विशेषकृत्ते ॥६६६॥

यस्माद् घटाद्यपि मतन्तव भूतमध्ये
स्तन्यादिपानविषया कृतिरस्य किन्नो ॥
व्यावृत्तितो भवति यश्च विशेषभावो
नो तात्विकस्स तु मिथोऽपि च सम्भवी यत्॥६६७

धूमार्थिनान्नियमतो ह्यनले प्रवृत्ति-
स्तृप्त्यार्थिनां तु ननु भोजनपानकादौ ।
नो कार्य्यकारणमतिं विरहय्य किञ्च
स्यादन्यथा जगदिदं न कथन्निरीहम् ॥६६८॥

दण्डादिकं यदि भवेन्न च कुम्भहेतुः
किन्तद्विनाऽपि वद कुम्भभवो न ते स्यात् ॥
यो यस्य नो भवति हेतुरसौ विना तं
दृष्टो यथा पटकटादि विनैव दण्डम् ॥६६९॥

यस्योद्भवो नियमतस्त्ववधेर्य्यतस्स्यात्
पूर्वोऽवधिर्भवति कारणमेव सोऽयम् ॥

तं स्वीकरोषि यदि किन्न तदा स्वनीत्या
हेतुत्वमप्यनुमतं वचनान्तरेण ॥६७०॥
त्रित्वादिकं च समुदायिषु खण्डशश्चे-
न्नो सत्तदा न समुदायगतं भवेत्तत् ॥
नो सर्वथा समुदितस्समुदायिभिन्नः
स्याद्वादवाद्यभिमतो बुध तत्त्वदृष्टया ॥६७१॥
नो सर्वथाऽवयवरूपतयैव जैनैः
कुम्भादयोऽवयविनोऽभिमतास्तथात्वे ॥
अर्थक्रियामतिवचांसि विभेदतो न
स्युर्वा मतेऽवयविनोऽवयवाद्यतोऽत्र ॥६७२॥
शक्त्यात्मना च महदाद्यपि मानमासीत्
कुम्भात्मकाणुनिचयेषु मते जिनानाम् ॥
नैवासतो हि शशशृङ्गवदेव जन्मा-
भीष्टन्ततो भवति चेतनता न भूते ॥६७३॥
भिन्नन्न चास्त्यणुचयान्महदादि मानं
स्याद्वादवाद्यभिमतश्च कथञ्चिदेव ॥
तत्प्रक्रिया तव मते घटते न चैका-
न्तोच्छेदभीतित इति प्रविचारयान्तः ॥६७४॥
देहे तु चेतनतयाऽभ्युपगम्यमाने
व्यासज्यवृत्तिरिह चेतनताऽन्यथा वा ॥
आद्ये बहुत्वमिव नाणुचयात्मकेऽस्मिन्
कस्याप्यणोर्विगमतो ननु सा तव स्यात् ६७५

अन्त्ये कथन्न बहवोऽभ्युपगम्यमाना-
स्तत्तच्छरीरनियता मतिगोचरास्स्युः ॥
ऐक्यानुभूतिरपि नैव विभिन्नरूपे
चैतन्ययोगिनि सुखादिधियस्तथा स्यात् ॥६७६

छेदेऽपि किञ्च शिरसोऽन्यसमाश्रिता सा
किन्नास्ति येन मरणं शिरसो वियोगात् ॥
प्राणोत्क्रमात्तव मते न च चेतनाया
युक्तः क्षयोऽपि खलु भूतसमाश्रितायाः ॥६७७॥

प्राणत्वजातिरपरा न मते तवास्ति
यन्त्रादितस्तनुगतात्पवनाद्विशेषः ॥
प्राणस्य सिद्ध्यतु कुतो यदि वा विशेषो
जातिं विनाऽप्यभिमतोऽत्र तदात्मसिद्धिः ६७८

आयुःक्षयात्प्रबलकर्म्मपराहतेश्च
कश्चिन्मृतो भवति न त्वपरस्समाने ॥
रोगे चिकित्सनविधौ च चिकित्सके च
पथ्ये तथैव करणे परिचारकेऽपि ॥६७९॥

आयुः क्षयो न न च कर्म विरुद्धमस्ति
भूतात्परन्तव मते निरुजे शरीरे ॥
किं कारणं वद न येन तु चेतनत्वं
दोषत्रयोपशमने मृतकेऽविकारे ॥६८०॥

नैव ज्वरादिकृतमस्ति तदोष्णतादि
युज्येत येन ननु तत्र विकारिभावः ॥

नैवाविकारिणि निजस्य गुणस्य दृष्टो
ह्रासः परं स तु विवृद्धिमुपैति भूयः ॥६८१॥
किञ्चिद्विलक्षणतयाऽभिमतश्च भूतं
वैगुण्यतो भवति यस्य चितां विनाशः ॥
भूतस्वभावघटनाव्यतिरिक्त एष
आत्मप्रयोगजनितो ननु तत्स्वभावः ॥६८२॥
व्याप्तिं विना न च प्रसङ्गप्रवृत्तिरस्ति
व्याप्तिग्रहोऽभिमत एव प्रसङ्गकर्तुः ॥
तत्त्वेऽनुमानमपि किन्न भवेत्प्रमाणं
किं वा नचागममतिः प्रमितिर्विविक्ता ॥६८३॥
नन्वेतदर्भकमतं भवतां विचित्र-
युक्तिप्रथाविदलितं शतशोऽल्पमानम् ॥
किं कापिलं मतमपि प्रथितं निरस्तं
कूटस्थनित्य इह येन भवेन्न चात्मा ॥६८४॥
कर्तृ प्रधानमिह सत्त्वरजस्तमोभि-
रेकं सदेव च गुणैस्त्रितयात्मकं यत् ॥
व्याप्य स्थितं त्रिभुवनं परिणामयोगि-
नित्यं क्रियारहितमज्ञमनन्यतन्त्रम् ॥६८५॥
तस्यैव सत्त्वगुणवृद्धिकृता त्ववस्था
बुद्धिर्गुणत्रयमयी महदादिवाच्या ॥
आमोक्षमात्मनियता तत एव पुंसोऽ-
भेदाद्भवो भ्रमकृतोऽपरिणामिनोऽपि ॥६८६॥

एकात्मसंसृतिविमुक्तिवशाद्यतो न
सर्वात्मसंसृतिविमुक्तय आप्तमान्याः ॥
तस्माद्भवन्ति बहवः पुरुषास्तथैव
स्युर्बुद्धयो मतिसुखादिगुणास्तु तासु ॥६८७॥

तद्वृत्तिरत्र कपिलानुमतं प्रमाणं
ज्ञानं घटोऽयमिति सैव जनप्रसिद्धम् ॥
आत्मा तदालिखित एव प्रमाफलं स्या-
दन्योन्यमेव प्रतिबिम्बनमिष्यतेऽत्र ॥६८८॥

बुद्धिर्जडापि पुरुषप्रतिबिम्बनेन
चैतन्यतापरिगतेव विभात्यभेदात् ॥
तद्वत् पुमान् भवति तत्प्रतिबिम्बनेन
कर्त्तेव बोधविषयः स्वयमप्यकर्ता ॥६८९॥

पङ्ग्वन्धयोरिव परस्परसव्यपेक्षा
बुद्ध्यात्मनोर्भवति कार्यजनौ समर्था ॥
भोक्तृत्वतो विषयसाक्षितया पुमांस-
श्चैतन्यभावनियता विभवोऽथ नित्याः ॥६९०॥

आत्मा न संसरति नापि विमुच्यते यत्
कूटस्थनित्यमत एव तमामनन्ति ॥
बुद्ध्यात्मना प्रकृतिरेव च बद्ध्यते सा
तत्त्वप्रबोधजनने तु विमुच्यते वै ॥६९१॥

तत्त्वन्न चान्यबुधदर्शनतन्त्रसिद्धं
तत्पञ्चविंशतितया कपिलोक्तमेव ॥

तत्र त्रयं प्रथमदर्शितमन्यदित्थं
बुद्धेरहंकृतिरसावपि पूर्ववत्स्यात् ॥६९२॥
घ्राणत्वगक्षिरसनाश्रुतिसंज्ञकानि
ज्ञानेन्द्रियाणि च भवन्ति ततस्तथैव ॥
कर्म्मेन्द्रियाणि वचनग्रहणादिकर्म-
कारीणि पञ्च कपिलानुमतानि तानि ॥६९३॥
वाक्पाणिपादसहिते भवतश्च पायू-
पस्थे मनस्तदुभयात्मकमेवमस्मात् ॥
तन्मात्रसंज्ञकतया प्रथितानि पञ्च
भूतानि षोडशगणस्समुदेत्यहन्त्वात् ॥६९४॥
भूतेभ्य एभ्य इतराणि भवन्ति पञ्च
भूतानि तानि च महान्ति मतानि विज्ञैः ॥
आकाशवाय्वनलजीवनपार्थिवानि
तत्त्वान्तरं भवति नो जनितश्च तेभ्यः ॥६९५॥
मुण्डी शिखी भवतु वाऽस्तु गृही कपाली
यो वेद कापिलमतप्रथितञ्च तत्त्वम् ॥
पूर्वप्रदर्शितमिदं गृहिणीव तस्य
मुक्तिस्सदा भवति सन्निहिताऽप्रयत्नात् ६९६
इत्यादि कापिलमतं न विचाररम्यं
प्राधान्यमेव प्रकृतौ नहि सिद्धिमेति ॥
सत्कार्यवादमवलम्ब्य भवेच्च तस्य
सिद्धिर्गुणत्रयमयस्य न चान्यथाऽपि ॥६९६॥

एकान्ततः परमसौ तव युज्यते नो
निष्पादनं भवति कारणकूटतो यत् ॥
सिद्धस्य नोऽन्यनिरपेक्षतया परन्तु
साध्यस्य पूर्वमसतस्तु कथञ्चिदेव ॥६९८॥
या चासतो जनिनिराकरणेऽस्ति युक्ति-
स्सा स्यात्परोपगतनीतिपथे त्वदुक्ता ॥
स्याद्वादतन्त्रविमुखे न तु सर्वविज्ञ-
मानप्रथापरिगते सबलात्मकेऽपि ॥६९९॥
सत्त्वं सुखं भवति दुःखमयं रजोऽथ
मोहस्तमो गुण इति त्रितयात्मकं चेत् ॥
बाह्यं घटादि ननु तर्हि प्रधानसिद्धि-
र्युक्ता तदात्मकतया तव नैतदेवम् ॥७००॥
सातानुभूतिविषयः सुखमिष्यते स्व-
संवेदनात्मकतया तदपि प्रमातुः ॥
ज्ञानात्मकं भवति तन्न घटादि बाह्यं
दुःखन्तथा तदिव नो न च मोहरूपम् ॥७०१॥
बाह्यं सुखात्मकमतो नयनादितोऽस्य
बुद्धौ तु बिम्बप्रतिबिम्बनभावतश्चेत् ॥
सातात्मिका परिणतिर्न्न तथा कथं स्याद्-
दुःखात्मिकाऽपि च तदैव ततस्तथा सा ॥७०२॥
तात्कालिकं यदि रजस्तमसी व्यपेक्ष्य
सत्त्वं विवृद्धमत एव सुखं न दुःखम् ॥

तद्दर्शनेऽपि ननु तर्हि समानकालं
किं पश्यतां भवति नो सुखमेव बाह्यम् ॥७०३॥
इष्टोऽथ ते यदि महानपि देहभेद-
भिन्नो गुणत्रययुतस्तत एव यस्याम् ॥
बुद्धौ भवेदुपचयो ननु यस्य तस्यां
तस्य स्वतुल्यबहिरर्थगुणव्यपेक्षा ॥७०४॥
एवं स्थिते भवति सत्त्वगुणप्रकर्षे
बुद्धौ सुखात्मप्रतिबिम्बनमर्थराशेः ॥
सत्त्वोदयादथ च तद्विपरीततस्स्याद्
दुःखादिजन्मनियमोऽप्युपपन्न एवम् ॥७०५॥
नन्वेतदप्यनुपपन्नमवेहि यस्मात्
सत्त्वादिवृद्ध्युपचयादि भवेत्कथञ्चितः ॥
भिन्नत्वयोगिषु महत्सु समानकाले
बाह्ये कथं भवतु चैकतयाऽवभाते ॥७०६॥
एकक्षणेऽपि यदि बाह्यघटादिवस्तु
स्वद्रष्टृभेदवशतस्तु विभिन्नमेव ।
तस्मात्सुखादिगुणवृद्ध्युपमर्दनाभ्यां
भिन्नावभासि प्रतिबिम्बनमस्ति तर्हि ॥७०७॥
एकान्ततत्त्ववचनन्तव नैव सिद्ध्ये-
दैक्येऽपि भेदघटनोपगमेन किञ्च ।
बाह्ये गुणत्रयसमाश्रयणं विनाऽपि
बुद्धौ भविष्यति सुखादि विचित्रतात् ॥७०८॥

एतेन किञ्चिदिह किञ्चिदपेक्ष्य सत्त्व-
रूपात्मना जननतस्सुखकारि तस्य ॥
दुःखात्मना तु जननादथ दुःखकारि-
मोहात्मना जननतो ननु मोहकारि ॥७०९॥
एतन्निरस्तमथ वाऽत्र कथन्नु पक्षे
यो यस्य दुःखजनकोऽथ स एव तस्य ॥
कालान्तरे भवतु मोहजनौ समर्थ
आनन्दहेतुरपि सैव कथञ्च भावः ॥७१०॥
आत्मा तु चेतनतया तव सम्मतो यः
कर्त्ता स एव सुखदुःखफलोपभोक्ता ॥
अस्तु प्रधानमहदादि निरर्थकन्ते
कूटस्थता किमिह सत्त्वविरोधिनी नो ॥७११॥
स्वाभाविकस्य विगमो न कदाचिदस्ति
दुःखादिकं पुरुषगं यदि चेत्तदाऽस्य ॥
मुक्तावपि प्रकटनञ्च भवेत् स्वभावात्
तस्मात् सुखादिगुणतो वियुताः पुमांसः ॥७१२॥
एकाश्रितत्वमिह कर्तृतया सुखादेः
प्रत्यक्षतः प्रथत एव न कर्तृताऽपि ॥
युक्ता तथाऽऽत्मनि सुखादिगुणैर्विहीने
इत्येतदप्यनुचितं कपिलानुगानाम् ॥७१३॥
दुःखादि तस्य खलु कार्म्मणदेहयोगा-
ज्जैनैर्मतं भवति तद्विगमेऽस्य नाशः ॥

मुक्तौ सुखादि निजरूपमबाधमस्य
स्वाभाविकस्य नहि तैरपि नाश इष्टः ॥७१४॥
बुद्धिस्सती तव मते न विनाशमेति
आत्यन्तिकं भवति किन्न कदाचिदस्याः ॥
मुक्तावपि प्रथमवन्निजकार्ययोगः
स्वाभाविकस्सकल एव सुखादिभावः ॥७१५॥
तस्माद् यथा तव मते महतां प्रवृत्ति-
र्मुक्तात्मनः प्रति सतामपि नो तथा मः ॥
देहादियोगविगमात्पुरुषेषु सत्सु
मुक्तौ स्वभावबलतोऽपि न दुखभीतिः ॥७१६॥
किञ्च त्वयाऽपि किमु नो जिनसम्प्रदायो-
ऽभीष्टोऽत्र लिङ्गतनुकल्पनया प्रमातुः ॥
यत्कार्म्मणं जिनमते प्रथितन्तदेव
भङ्गयन्तरेण कपिलेन प्रदर्शितं यत् ॥७१८॥
तद्बुद्ध्यहंकृतिमनो नियतं शरीरं
तन्मात्रभूतघटितं दशभिस्तथाक्षैः ॥
लिङ्गम्मतन्तव जिनागमतस्तु सिद्धं
तद्पुद्गलात्मकमिति प्रविचारयान्तः ॥७१९॥
यच्च त्रयात्मकतया प्रथितं प्रधानं
तज्जैनतत्त्वसरणौ निखिलेषु सत्त्वम् ॥
उत्पत्त्यवस्थितिलयेषु गुणत्रयस्या-
न्तर्भावनञ्च बुध केवलमत्र कार्यम् ॥७२१

वृत्तिक्रमोऽपि तव तत्वत एव नास्ति
भिन्नो जिनोक्त्यवगतान् मतिधीक्रमाच्च ॥
आलोचनन्तव मते बहिरिन्द्रियाद्यज्-
जैनैर्मतश्च तदवग्रहनामधेयम् ॥७२१॥
यन्मानसन्तव मतेऽर्थविशेषधर्म्म-
संस्पर्शि निर्णयमतेः प्रथमं विवेकात् ॥
सम्भावनन्तदपि जैनमते प्रसिद्ध-
मीहाख्यकं परमसौ बहिरिन्द्रियाच्च ॥७२२॥
या निर्णयात्मकमतिर्म्मनसा तवास्ति
या वास्त्यहंकृतिवशादभिमानरूपा ॥
बुद्ध्युद्भवाध्यवसितिश्च मताऽथ या सा
सर्वाऽप्यवायमतिभेदतया जिनेष्टा ॥७२३॥
शक्त्यात्मना स्मृतिभवानुगुणाऽथ वृत्ति-
र्बुद्धौ तवास्त्यभिमता ननु याऽर्हतानाम् ॥
सा धारणाऽऽवृत्तिलयक्रमतः परन्तु
तेषां क्रमो जिनमतः करणक्रमान्नो ॥७२४॥
यत्र द्वयोर्भवति भिन्नसमाश्रितत्व-
मव्यापिता तदुभयोः प्रतिबिम्बनं स्यात् ॥
अन्योन्यमत्र न विभोः पुरुषस्य युक्तो
बुद्ध्या तु बिम्बप्रतिबिम्बनभावबन्धः ॥७२५॥
कूटस्थनित्यपुरुषस्य कदाचिदस्ति
मुक्तिर्न्न ते भवति सा प्रकृतेः परन्तु ॥

एवं स्थिते तु पुरुषा बहवः किमर्थ-
मिष्टास्त्वया प्रकृतिवत्किमु नैक एव ॥७२६॥
एकोऽप्युपाधिविगमात् क्वचिदेव मुक्तो
दुःखादियोगविगमोपि तथा क्वचित्तु ॥
बिम्बादिकल्पनमपि प्रतिदेहमेव
भिन्नं भविष्यति विभोः पुरुषस्य यस्मात् ७२७
किञ्च स्वतोऽस्य विषयेण न चास्ति सङ्गो
बुद्ध्यादिकल्पनमतो भवता न्यगादि ॥
मुक्तौ तु बुद्धिविगमाज्जडतैव तस्य
ह्यर्थप्रबोधविरहे न निजप्रकाशः ॥७२८॥
सङ्घातरूपमखिलञ्च परार्थमेव
दृष्टं यतश्शयनभोजनचन्दनादि ॥
तस्मात्प्रधानमहदादि तदात्मकं स-
दात्मानमन्यमनुमापयतीति तत्र ॥७२९॥
आत्मा परस्तव मतो विभुतादिधर्म्मा-
ऽनेकात्मको भवतु तेन परस्ततोऽपि ॥
पूर्वप्रदर्शितदिशा स्वपरस्तथा च
नेवानवस्थितिभयात्पुरुषप्रसिद्धिः ॥७३०॥
त्रैगुण्यमेव यदि हेतुतया मतन्ते
तन्नात्मवृत्ति तत एव परो न तस्मात् ॥
आत्माऽपि तर्हि तव नैव परः प्रसिद्ध्येत् ॥
त्रैगुण्यशून्य इह योऽभिमतस्ततः सः ॥७३१॥

देहार्थमेव शयनाद्युपभोग्यमिष्टं
देहो न किन्तव मतस्त्रिगुणस्वरूपः
तद्वत्पुमानपि परस्त्रिगुणस्वरूप-
स्सिद्ध्येत्ततो भवति हेत्वप्रसिद्धिरेवम् ॥७३२॥

त्रैगुण्ययोग्यपि यथा न तव प्रधानं
कार्यम्मतं जनककोटयनवस्थयैवम् ॥
तस्यार्थमेव सकलं प्रकरोति वस्तु
नोकस्य चित्तदिति किन्न मतन्तवाभूत् ॥७३३॥

किञ्चाप्रयोजकमिदं व्यभिचारशङ्का-
नाशोद्यतोऽस्ति न हि तर्क इह प्रगल्भः ॥
पङ्ग्वन्धयोरिव तदा न प्रवृत्तिबोधौ
संयोगकल्पनवशादुभयोस्तु युक्तौ ॥७३४॥

चैतन्यतापरिगतौ पुरुषौ मिथोऽभि-
प्रायार्थबोधकुशलावलमर्थसिद्धौ ॥
अन्यादृशेतु प्रकृते पुरुषप्रधाने
दृष्टान्तमात्रत उपेयगतिन्न यातः ॥७३५॥

कूटस्थतापरिगते पुरुषे न युक्तं
भोक्तृत्वमन्यसहकारिवशात्तथैव ॥
साक्षित्वमप्यविकृतस्य न लोकसिद्ध-
दृष्टान्तमात्रबलतोऽस्य बुधैरुपेयम् ॥७३६॥

साक्षित्वमस्य विभुताऽथ च चेतनत्वं
कूटस्थताऽत्रिगुणतादि मिथो विविक्तम्

व्यावृत्तिभेदबलतो न विभिन्नतां किं
शास्त्येकतो वद मतन्न मतन्त्वया नः ॥७३७॥
प्रेक्षावतान्न विफलाऽत्र प्रवृत्तिरस्तो-
त्येतावतैव भवतेशनिराक्रियेष्टा ॥
सैषा तथा सति भवेत्प्रकृतेर्न्न भोगा-
र्था निष्फला पुरुषतो फलसिद्ध्यभावात् ॥७३८॥
जाड्यात् प्रवृत्तिरफलाऽपि मता त्वयाऽस्या
युज्येत सा यदि भवेत्सफलाऽत्र पुंसः ॥
किन्तु प्रवृत्तिरखिला जड एव तेऽतः
सामान्यतस्सफलता नियता प्रवृत्तौ ॥७३९॥
अन्यप्रसिद्धिमवलम्ब्य निराक्रिया चे-
दीशस्य तर्हि तत एव प्रधानभङ्गः ॥
नैयायिकैरिह यतो न जडस्य वृत्ति-
र्यत्नात्मिकाऽभ्युपगता प्रकृतौ कुतस्सा ॥७४०॥
वत्सस्य वृद्धिरिह वास्तविकी स्वहेतोः
क्षीरादतीन्द्रियप्रयत्नबलप्रवृत्तात् ॥
युक्ता तथा न पुरुषस्य स्मृतेरभावे
मुक्तिस्समस्ति तव या प्रकृतेस्तु जन्या ॥७४१
यत्तत्त्वदृष्टिमवलम्ब्य न तत्त्वतोऽस्ति
बन्धो न मुक्तिरपि बोधमयस्य पुंसः ॥
किन्तु प्रधानगतमेव पुमान् द्वयन्तद् ।
भ्रान्त्याभिमन्यत इति प्रथितन्न सत्यम्॥७४२

बोधस्सदैव पुरुषस्य निजं स्वरूपं
तं चान्यथा न प्रकृतिः कुरुते कदाचित् ॥
भ्रान्तिर्न बिम्बप्रतिबिम्बनतोऽतिरिक्ता
सा नात्मनो भवितुमर्हति पूर्वनीत्या ॥७४३॥
बुद्धौ भवेदपि च सा न तया तु बद्धो
ह्यात्मोपचारबलतोऽपि परेण वाच्यः ॥
स्यादन्यथा किमु परोऽपि तया न बद्धो
मुक्तः पुमान्स इव सर्वगतोऽविशेषात् ॥७४४॥
सर्वस्य सर्वगतता तव सम्प्रदाये
पुंसो मता युगपदेव ततोऽस्तु बन्धः ॥
मुक्तिश्च बुद्धिप्रतिबिम्बनताऽविशेषा-
दन्यस्ततो न च यतोऽभिमतो विशेषः ॥७४५॥
स्वस्वामिभावचनन्नहि युज्यते तेऽ-
सङ्गित्वमस्य कपिलेन यतो निरुक्तम् ॥
तत्रापि किञ्च न नियामकमस्ति किञ्चित्
कूटस्थता निखिलपुन्नियताऽविशिष्टा ॥७४६॥
दृष्टा मयेति पुरुषः प्रकृतेरुपेक्षा-
कारी तथोपरमति प्रकृतिस्तु दृष्टा ॥
इत्यादिकं मननमीश्वरकृष्णवाचो
लब्धं न मुक्तिफललाभनिदानभूतम् ॥७४७॥
यस्मात्समानविषयाः पुरुषास्तु सर्वे
सन्त्येव बुद्धिनिकरेषु समस्वभावाः ॥

व्यापि प्रधानमपि सर्वसमानमेव
किङ्कारणं युगपदेव न ते विमुक्ताः ॥७४८॥
मालिन्यमस्य नितरां तव मुक्तिकाले
छिन्नं ततोऽम्भसि शशीव न किम्प्रसन्ने ॥
तस्मिन् प्रधानममलं प्रतिबिम्बनादि
बुद्ध्यादिकञ्च विदधातु सुबन्धनाय ॥७४९॥
बुद्धिर्न चास्ति तत एव न बद्धयतेऽसौ
यस्मात्प्रधानमपि बुद्धिबलेन तस्मिन् ॥
बिम्बादिकल्पनमुखेन करोति बन्ध-
मित्यादि शून्यवचनं कपिलानुगानाम्॥७५०
सत्कार्यमेव कपिलेन निरूपितं य-
न्नाशो न कस्यचिदपि तस्य मतेऽस्ति तत्त्वात्॥
बुद्ध्यादिकं न विलयं तत एव तस्मिन्
यातीत्यतो भवतु बन्धनमेव पुंसः ॥७५१॥
नाशस्तिरोभवननामक इष्यते चेत्
तत्सर्वदास्ति किमु वा क्वचिदेव काले ॥
आद्ये सदैव विलयान्महतस्सदैव
मुक्तिर्भवेत्पुरुषगा न तु भेदबोधात् ॥७५२॥
अन्त्ये त्वसज्जननमेव मते तवापि
प्राप्तं तथा सति घटाद्यपि किं तथा नो ॥
पूर्वं तिरोहिततया यदि तस्य सत्त्वं
नित्यैव सा तव तदा किमुवाऽस्त्यनित्या ॥७५३

आद्ये तिरोभवनमेव तिरोहितं ते
यत्सर्वदा भवतु तेन सदैव बन्धः
बुद्धेः सदा स्फुरणतः पुरुषस्य यस्माद्
बिम्बादिकल्पनघटा त्वनपायिनी ते॥७५४॥

अन्त्ये तिरोभवनमेव पुनस्त्वयाऽस्या
वाच्यं विनाशघटनानुपगन्तृणाङ्ग ॥
तत्रानवस्थितिकृतान्तमुखप्रवेशो
दुर्वार एव तव तत्त्वरसप्रहाणेः ॥७५५॥

उत्पद्यते तव मतेऽथ तथा विनाशो
बुद्धेस्तिरोभवननामक इष्यते यः ॥
नोत्पादवानुत मतो यदि पूर्वकल्प-
स्तत्रानवस्थितिघटा त्वपरोदिता तत् ॥७५६॥

प्राकट्यमेव कपिलेन तवोक्तमावि-
र्भावाख्यया जनितमत्र न चात्मलाभः ॥
तत्सर्वदा प्रकटमेव मतं त्वया चे-
न्मुक्तिस्सदैव पुरुषस्य तदा मते ते ॥७५७॥

तत्सर्वदाऽप्रकटमेव मतं त्वया चेद्
बन्धस्सदैव पुरुषस्य तदा मते ते ॥
प्राकट्यमस्य प्रकटं क्वचिदेव काले ॥
चेत्सम्मतं तव तदा ननु तत्र वाच्यः ॥७५८॥

प्राकट्यगा प्रकटता तव सर्वदावि-
र्भावात्मना परिणता क्वचिदेव वा स्यात् ॥

आद्ये पुनर्भवतु मुक्तिरनर्गलैव
पुंसस्सदैव हि तिरोभवनाच्च बुद्धेः ॥७५९॥
अन्त्ये तु सा प्रथममस्ति नवेति तत्र
पक्षोऽन्तिमो यदि तदा स्वमतप्रकोपः ॥
किं वा तथैव न घटादिपदार्थसार्थः
पूर्वं ह्यसन्नपि मतो जनिमान् बुधाऽय ॥७६०॥
आद्ये तिरोहिततयैव तु तस्य सत्त्वं
मुक्तिप्रसङ्गभयतो भवताऽनुमोद्यम् ॥
तत्रापि किं प्रकटमस्ति तिरोहितत्वं
किं वा न तत्प्रकटमित्यपि चोद्यमेव ॥७६१॥
नोत्पादवान्यदि मतस्तव बुद्धिनाशो
व्योमादिवद् भवतु तर्हि स नित्यमेव ॥
तत्त्वे सदैव पुरुषस्य न बन्धलेशो,
मुक्तिः परन्तु गृहिणीव समीपगा स्यात्॥७६२॥
व्योमोत्पलादिवदसावथ वा ह्यसन् स्या-
द्धेत्वन्तरानुदयतो न तु सन्कदाचित् ॥
एवञ्च शाश्वतिकबुद्धिनियोगतोऽस्य
बन्धस्सदैव पुरुषस्य भवेन्मते ते ॥७६३॥
इत्यादिदोषघटना स्वयमेव बुद्धौ
बुद्ध्यादिभावमधिकृत्य च तेऽप्रयत्नात् ॥
पूर्वोक्तयुक्तिमननादनसूययावि-
भूता कुतर्कबलतो न विघट्टनीया ॥७६४॥

यत्पञ्चविंशतिमितं भवतान्यदर्शि
तत्त्वं न तत्त्वमिदमप्यविचारितं यत् ॥
सत्त्वादिकं त्रितयमत्र प्रधानमिष्टं
प्रत्यकेशः किमु मिथो घटनात्मकं वा ॥७६५॥
आद्ये प्रधानमपि नैकमनेकरूपं
तत्त्वत्रयं भवतु किन्तु ततो द्वयं वै ॥
तत्त्वं त्वदुक्तगणनादधिकं प्रविष्टं
न्यूनत्वनिग्रहभवं न च किं भयन्ते ॥७६६॥
अन्त्ये समष्टिपरिणामतयैव तेषां
तत्त्वस्वभाव उररीक्रियते त्वया किम् ॥
प्रत्येकशोऽथ परमस्य न वै विवक्षा
कार्याक्षमत्वत इह प्रथमो न युक्तः ॥७६७॥
यस्मात् पृथक्समुदयस्समुदायिनो नो
मान्योऽतिरिक्तकलसादिनिराकरिष्णोः ॥
एकान्तवादलयभीतिमता न शक्यं
वक्तुं कथञ्चिदतिरिक्तपदार्थजातम् ॥७६८॥
एवञ्च तद्यदि पृथङ्न च तत्स्वरूपं
सत्त्वादिकं समुदयात्मनि तत्त्वतैषाम् ॥
नो युज्यते भवतु वा खसुमाद्यलीक-
पुञ्जे न किन्तव मता बुध तत्त्वताऽन्या ॥७६९॥
पक्षोऽन्तिमो यदि तवाभिमतस्तदाऽत्र
वाच्यस्तया न जनकं किमु कार्यमात्रे ॥

तत्त्वान्तरे न जनकं किमु वा न तत्र
कल्पस्तवाभिलषितः प्रथमस्तु युक्तः ॥७७०॥
यस्मात्सदेव भवतोऽभिमतोऽत्र भावः
स्वस्वस्वभावसमभावतयाऽन्यथा वा ॥
पुंसो विनाऽपरिणतो व्यवतिष्ठते नो
तत्त्वत्रयश्च जनकं समभावकार्ये ॥७७१॥
तत्त्वान्तराजननतो यदि तत्त्वता नो
स्यात्तर्हि ते चरमपक्ष इहास्त्वविघ्नः ॥
तत्स्वीकृतौ कथय किन्न महत्सु भूते-
ष्वस्तङ्गताऽभ्युपगता बुध तत्त्वता ते ॥७७२॥
यत्सङ्गतो भवति कार्यमसौ यदि स्यात्
तत्सन्निविष्टजनकाजनितं तदा तु ॥
न स्यान्महागुणसमूहभवोऽसमूहात्
सत्त्वादिकान्न तु तथोपगमोऽप्यभीष्टः ॥७७३॥
सामाग्र्यतो भवति कार्यजनिर्न्न चैक-
हेतोस्ततस्तव मते नयनादयोऽपि ॥
तत्त्वस्वभावममलं न पृथक्त्वतो वै
गच्छेयुरित्यपि महाँस्त्वयि दोषदण्डः ॥७७४॥
अर्थक्रियाजनकतैव न तत्त्वताया
नैयत्यतस्तव मता बुध येन तस्याः ॥
प्रत्येकशो विगमतस्त्रिषु तत्त्वताया
राहित्यतो विभजनन्न भवेद्धि हीनम् ॥७७५॥

कूटस्थनित्यपुरुषस्य यतस्त्वयैवा
किञ्चित्करस्य गणना खलु तत्त्वमध्ये ॥
स्पष्टीकृता शपथमात्रत एव तस्मा-
त्सत्त्वत्रिकस्य तव तत्त्वगणेऽनिवेशः ॥७७६॥

सत्त्वादिकं निखिलवस्त्वनुगन्तृकत्वा-
दन्योन्यसंश्रयसमुद्भवरोधनाच्च ॥
तुल्यान्वयित्वविरहान्वयतश्च भेदे-
ऽप्येकं मतं यदि तदास्त्वविचारितन्तत् ॥७७७

अर्थक्रियाजनकता सुगतेन सत्ता
नैयायिकैरभिमता परजातिरेषा ॥
उत्पत्त्यवस्थितिलयान्वयिता तु जैनै-
र्वेदान्तिनाऽप्यभिमता त्रिविधा विचित्रा ॥७७८

तद्वत्त्वयाऽप्यनुगता निखिलेषु तत्त्वे-
ष्वेका सदादिमतितोऽभ्युगन्तुमिष्टा ॥
उक्तेषु तत्त्वनिकरेष्वनिवेशनेन
तत्त्वान्तरं भवतु सा न च किम्मते ते ॥७७९॥

ज्ञानादयस्तव मता ननु बुद्धिधर्मा-
स्तेषां न तत्त्वत इहाभिमतं पृथक्त्वम् ॥
तत्त्वान्तरत्वमत एव निरुक्ततत्त्वे-
ष्वप्राप्तितो न च कथन्तव सम्मतञ्च ॥७८०॥

तादात्म्यतो यदि मते तव धर्म्मितत्त्वे
तेषां निवेश इति न व्यतिरेकिणस्ते ॥

व्यक्तं प्रधानजनितं महदाद्यभिन्नं
कस्मात्त्वयैव पृथगत्र निरूपितं तत् ॥७८१॥
चेत्तत्त्वता तव मते यदि धर्म्मिमात्रे
धर्म्मा तदा तव मतः किमु धर्मभिन्नः॥
धर्म्मत्वयोग्यपि च वा प्रथमे प्रधानाद्
भिन्नन्न किञ्चिदपि तत्त्वमनिन्दितं स्यात्॥७८२
किं वा प्रधानमपि नैव भवेच्च तत्त्वं
धर्म्मादभिन्नतनुतोपगताऽस्य यस्मात् ॥
तादात्म्यमेव च तवाऽपि कथञ्चिदिष्टं
यद्धर्म्मधर्म्मिघटनानिपुणं न चान्यत् ॥७८३॥
ज्ञानादयोऽपि किमु नैव मते तवान्य-
पक्षे भवन्तु बुध तत्त्वतया प्रसिद्धाः ॥
को वाऽपराध इह धर्म्मगणस्य येन
द्वेषश्च तेषु कपिलेन प्रकाशितोऽभूत् ॥७८४॥
मोक्षोपयोगि यदि तत्त्वतया तवेष्टं
तत्त्वं तदापि मतिरेव निरूपणीया ॥
ग्राह्यं विना मतिनिरूपणमेव नो चे-
दिच्छादयोऽपि धियया समुपासनीयाः ॥७८५॥
बुद्ध्यात्मभेदमतिरेव हि मुक्तिहेतु-
र्बुद्ध्यात्मनोर्भवतु भेदमतावपेक्षा ॥
अन्यन्न किञ्चिदपि तज्जननेऽत्र साक्षा-
द्धेतुः किमर्थमथ तस्य निरूपणं च ॥७८६॥

मोक्षोऽपि मानविषयस्समभीप्स्यते जै-
र्मानं विना न प्रकृतिर्महदादयो वा ॥
आत्माऽथवाऽत्र विबुधैरुपगन्तुमिष्टा
मानं पृथग्भवतु तत्त्वत एव तत्त्वम् ॥७८७॥
सामान्यमेव भवतोऽभिमतश्च शक्तं
शक्यं विधेयमपि किन्न पृथक्च तत्त्वम् ॥
तादात्म्यतो यदि विशेषत एव तस्य
नो वा पृथक्कथनमस्ति तदाज्ञतैव ॥७८८॥
सामान्यमेव प्रथमं सकलानुगामि
वाच्यं विशेषमननं तत एव यस्मात् ॥
तादात्म्यतो भवति लाघवमत्र पक्षे
सामान्यतोऽनुगमने सुलभाऽवबोधः ॥७८९॥
आलोचनात्मकधियो जनकानि यानि
ज्ञानेन्द्रियाणि तव पञ्च मतानि तानि ॥
सामान्यतत्त्वमनने तु न भेदभाञ्जि
ज्ञानेन्द्रियत्वमखिलेषु यतस्समानम् ॥७९०॥
कर्म्मेन्द्रियत्वमपि तत्त्वमथैकमेव
कर्म्मेन्द्रियेषु न च भिन्नतयाऽभ्युपेयम् ॥
भूतत्वमेकमथ भूतगणेषु तत्त्व-
मित्यादि लाघवमवेहि समानभावे ॥७९१॥
त्वत्प्रक्रिया हि निखिलैव निरङ्कुशाऽऽवि-
र्भावात्तिरोभवनतश्च प्रसिद्धिमेति ॥

तस्माद्द्वयं तदपि तत्त्वतयैव वाच्यं
नातत्त्वतो भवति तत्त्वनिरूपणं यत् ॥७१२॥
उक्तेषु तत्त्वनिवहेषु निवेशनं न
यस्मात्तयोर्भवति तद्व्यतिरिक्ततैव ॥
जिज्ञासितस्य च निरूपणमिष्टमिष्ट-
स्तत्तद्द्वयोर्यदि तदा चतुरस्रमत्र ॥७१३॥
कार्य्यात्मकं द्वयमिदं यदि तत्समग्र-
कार्य्यस्वरूपमुत वाऽभिमतन्तु किञ्चित् ॥
आद्ये भवेत्किमु पृथग् प्रतिकार्यमेव
किं वैकमेव निखिलात्मकमाद्यपक्षे। ॥७१४॥
किं सर्वथैक्यमनयोर्न्ननु कार्यतस्ते
किं वा कथञ्चिदिति कल्प इहादिमश्चेत् ॥
सत्कार्यवादपरिनिष्ठिततत्त्वबुद्धे-
रुत्पत्तिनाशघटना तव सर्वदा तत् ॥७१५॥
अन्त्ये न किञ्चिनमतन्तव सम्मतं यत्
स्याद्वाद एव शरणं तव तत्त्वसिद्धौ ॥
किञ्चान्यभावमवलम्ब्य तथा पृथक्त्वं
प्राप्तं द्वयं भवति तेन पृथक्च तत्त्वम् ॥७१६॥
एकस्समग्रजनिमन्नियतस्तदात्मो-
त्पादो विनाश इति तेऽभिमतो द्वितीये ॥
तत्किं प्रधानमिव तत्त्वतया न मान्यौ
तावप्यभेद इह भेदसमन्वितो यत् ॥७१७॥

नो वास्ति ते विनिगमो ननु येन किञ्चित्
कार्य्यात्मकत्वमुभयोरुपपद्यतेऽन्स्ये ॥
उत्पत्तिनाशघटना क्वचिदेव किञ्च
कार्ये भवेत्तदुभयोश्च तदात्मतातः ॥७९८॥
स्यात्कारणात्मकतयोपगमोऽनयोस्ते
तत्किं प्रधानमुत वा निजहेतवस्स्युः ॥
प्रत्येकशो यदि मतः प्रथमोऽत्र पक्षो
नो सर्वदोदयविनाशप्रसञ्जनं किम् ॥७९९॥
किञ्च प्रधानमनुमाविषयस्तवैकं
तत्तद्द्वयं यदि तदा न तयोर्विशेषः ॥
उत्पद्यते घट इति प्रथते यदा धीः
कुम्भो विनश्यति मतिश्च तदा न किं स्यात्८००
किं वा यदैव तव कश्चिदपीह भाव
उत्पद्यते विलयमेत्यथ वा तदैव ॥
किं कार्यमात्रमपि नो जनिमद्विनाशि
वेत्यत्र को नियमकृद्वद सांख्यविज्ञ ॥८०१॥
किञ्च त्वया त्रिगुणसाम्यमकार्ययोग-
मिष्टं प्रधानमनयोस्तु तदात्मतायाम् ॥
न स्यात्तयोः सकलकार्यलयं विहाय,
प्रत्यक्षसिद्धिघटना ननु लौकिकानाम् ॥८०२॥
यद्वत्प्रधानमनुमानमतिं विना नो
लोकस्य सिद्धिपदवीमुपयाति तद्वत् ॥

नाशोद्भवावपि तदात्मतयाऽक्षबोधे
स्यातां न चैव त्रिषयाविति तर्कपन्थाः ॥८०३॥
किञ्च प्रधानमपि नैक्यविभुत्वयोगि
तत्त्वे भवेद् विविधरूपसमन्वयेन ॥
पादप्रसारणमबाध्यकथञ्चिदुक्त्या
स्यात्ते तदा यदि जिनागमतत्त्वनिष्ठा ॥८०४॥
उत्पद्यते ननु यदैव कटादिभावो
हेम्नि स्थिते भवति कुण्डलभावनाशः ॥
किन्नो तदैव विबुधैकपदार्थचिन्ता-
यामप्यभेद इह तत्प्रकृतेर्न्न युक्तः ॥८०५॥
पक्षोऽन्तिमो यदि मतस्तव तर्हि सोऽपि
युक्त्या न सिद्धिमुपगच्छति बाध्यमानः ॥
हेतुर्मतस्तव यतो न च कार्यकाले
स्वस्वस्वभावसहितोऽचलितस्वभावः ॥८०६॥
किञ्च द्वयं जनिमतां प्रथमं तव स्या-
द्धेतोस्तदैव नियमेन यतोऽस्ति वृत्तिः ॥
नाशक्षणे स्वसमये च न हेतुसत्ता-
स्वस्वस्वरूपनियताऽस्ति विभिन्निभावात् ८०७
इत्यादिदोषघटना कपिलानुगानां
नो केवलं भवति किन्तु समानतन्त्रे ॥
पातञ्जलेऽपि च तथैव सुबुद्धिभाजां
स्पष्टीभविष्यति किमत्र प्रयत्नतो नः ॥८०८॥

तेनापि तत्त्वमननं कपिलानुसारि
यस्मात्कृतं परमनेन महेश्वरोऽपि ॥
कर्त्ता मतो भवति तस्य निराक्रिया तु
पूर्वप्रदर्शितदिशेशनिराक्रियातः ॥८०९॥

नन्वस्तु लक्षणमिदं निरूपद्रवं व-
स्तादात्म्यमस्य च पुनर्न्नहि भेदमिश्रम् ॥
मात्रा सहोपगतमस्ति कथंश्चिदुक्ति-
व्याजात्प्रकाशिततनु प्रमया प्रसिद्धम् ॥८१०॥

अग्निर्जलेन रविणा सह चन्द्रबिम्बं
नक्तं दिवा हिमगिरिर्मलयाचलेन ॥
काकः पिकेन विरहः प्रतियोगिना चे-
द्वर्त्तेत ते ननु तदेदमपि प्रसिद्ध्येत् ॥८११॥

जैनोऽस्म्यहं प्रतिपदं प्रतिवादियुक्ति-
व्रातं कथञ्चिदिति मन्त्रवरेण कामम् ॥
हन्तुं प्रभुः किमिह युक्तिगवेषणेन
गर्वस्त्वयन्तव विरोधभयेन भग्नः ॥८१२॥

नो चेद्विरोधहरिभीतिरलं कथञ्चिद्
वादं कलङ्कमिव चेतसि वाक्प्रपञ्चैः ॥
त्वं स्वीकरोषि बुध केवलमात्ममात्रं
दुर्म्मत्तदन्तिवरमाश्रय निर्विकारम् ॥८१३॥

विज्ञानतां जडगतामुपगम्य योगा-
चारेण सख्यमपि किन्न कृतं त्वयाऽभूत् ॥

शून्यत्वमप्रतिहतं निखिलेषु सत्त्वा-
बाध्यं वदन् कुरु गुरुं बुध बुद्धपुत्रम् ॥८१४॥
स्थैर्ये स्थितेऽपि च विरोधविलोपकर्त्राऽ-
नित्यत्वमस्य जगतो बुध बोद्धनोत्या ॥
स्वीकृत्य किन्न भवता व्यवहारलोपि
सौत्रान्तिकेन सह सख्यमकारि नव्यम८१५
भावोऽप्यभाव इति तेऽभिमतो विरोधा-
भावावगाहिनयसूत्रणतत्परस्य ॥
तत्त्वे सुखं न किमु दुःखविनाशरूपं
स्वीकृत्य तार्किकमताऽभिमतास्तु मुक्तिः॥८१६॥
भूतत्वतोऽप्यभिमतन्न च चेतनत्वं
यत्सर्वथा तव विरुद्धमतो निबोध ॥
चार्वाकबाललपितं हृदि बुद्धिशालिन्
कृत्वा गुरुं गुरुतया स्मर तत्त्वदृष्ट्या ॥८१७॥
स्याद्वादिनस्तव मते ननु मुक्तिदेवी
किं बन्धतां शिरसि नैव दधात्यनिष्टाम् ॥
कस्तां बुधो विहतमोहनरेन्द्रदर्प-
स्सेवेत तत्त्वरसिको हितमात्रकामः ॥८१८॥
ज्ञानं तथा सकलवस्त्ववगाहि मान्यं
नोसर्वथाऽभ्रमतयैव तवात्र विद्वन् ॥
किन्तु भ्रमत्वमपि तत्र तथा च तेऽर्हन्
भ्रान्तः कथं विशदयत्विह तत्त्वराशिम् ॥८१९॥

वस्त्वंशमात्रविषयोऽपि मतो नयस्ते
मानत्वयोग्यपि भवेदविरोदवादे ॥
तत्खण्डनं स्वमतखण्डनमेव तस्मा-
न्नैयायिकादिमतखण्डनमप्ययुक्तम् ॥८२०॥
रागादिदोषरहितोऽपि च सर्वदृश्वा
तीर्थङ्करो भवतु रागयुतो मते ते ॥
सिद्धोऽप्यसिद्ध इह बद्धजनोऽपि मुक्तो
दोषान्वितोऽपि तव किन्न च दोषमुक्तः ॥८२१॥
मानं तवाभिलषितं परिपूर्णवस्तु-
प्रद्योतकं तदपि संशयरूपमेव ॥
यस्माद्विरुद्धघटनाविषयैव बुद्धि-
रेकत्र धर्म्मिणि मता बुध संशयाख्या ॥८२२॥
ये चावनस्थितिमुखास्तव दोषसङ्घा-
स्ते सर्वथा न खलु दोषतयैव मान्याः ॥
इत्थञ्च वादिनिवहान् वद कैः प्रकारै-
र्वादे प्रजेष्यसि परोक्तिविभेददक्षैः ॥८२३॥
एकान्तवादभयतो न च सर्वथा ते
दोषाः परोक्तमतखण्डन एव दक्षाः ॥
तत्स्थापका अपि न किं भवितार एते
साधु त्वयाऽभिनव एव प्रकार इष्टः ॥८२४॥
ये वा स्वपक्षमननोद्भवतत्परास्ते
लिङ्गादयो गुणतया प्रतितन्त्रसिद्धाः ॥

ते किं स्वपक्षदलना अपि नो भवेयु-
र्लब्धो विपक्षगणतोषकरो गुणोऽपि ॥८२५॥
स्याद्वाद एव तव किञ्च न सर्वथा स्यात्
स्याद्वादताश्रय इह स्वमतप्रकोपात् ॥
एकान्तवादघटनापि च पाक्षिकी किं
मान्या ततो न च यतो न नयाङ्घ्रिसेवा ८२६॥
वादे पराभवघटा सुलभा तथा ते
एकान्ततो हि जय एव न चास्ति विद्वन् ॥
स्याद्वादिनः परपराभवमिश्रितस्स
स्वीकारयोग्य इति किन्न करोषि चित्ते ८२७
इत्थञ्च वादिनिवहैरुपगीयमानो
दोषप्रपञ्च इह जैनमते न दोषः ॥
एकान्ततत्त्वमननव्यतिरिक्तपक्षे
स्याद्वादिनां क्व नु भवेद्गुणदोषचर्चा ॥४२८॥
स्याद्वादतत्त्वमननश्रमपूर्विका नो
दोषांशमात्रघटनाऽपि समस्ति किञ्च ॥
स्याद्वादतत्त्वमननाश्रमपूर्वकास्तु
दोषाः प्रसिद्धिपदवीमपि नैव यान्ति ॥८२९॥
एकाश्रितत्वविरहः किमु वो विरोध-
स्सामान्यतोऽस्ति किमु वा सविशेष एषः ॥
नैयायिकैर्न्न प्रथमो विरहेण साक-
मव्याप्यवृत्तिप्रतियोगिन इष्यते सः ॥८३०॥

पक्षोऽन्तिमो यदि तदा ननु देशकाला-
वच्छेदकेन घटितोऽभिमतस्स ते स्यात् ॥
धर्मादयोऽप्यभिमता मम विज्ञ तत्रा-
वच्छेदकांशविधयेति न दत्तदोषः ॥ ८३१ ॥

धर्मादिसङ्घटनमत्र न केवलन्नो
नैयायिकस्य च मतेऽनुमतं यतस्तत् ॥
संयोग इष्ट इह तेन गुणत्वसत्त्व-
मेयत्वधर्म्ममुखतो न च देशवृत्तिः ॥ ८३२ ॥

संयोगतो भवति देशगतोऽथ वह्नि-
स्स्याद्व्याप्यवृत्तिरपि यत्समवायतस्सः ॥
संसर्गभेदघटनाऽपि विरोधकोटौ
नैयायिकैरनुमतैव विरोधसिद्ध्यै ॥ ८३३ ॥

काले विशेषणतया ननु कालवे-
रव्याप्यवृत्तिरपि वाच्यप्रमेयतादेः ॥
यद्व्याप्यवृत्तिरिह तार्किकसम्मतोऽस्ति
तज्जैनतत्त्वसरणौ न विरोधभङ्गः ॥ ८३४ ॥

वैशेषिकस्य च मतेऽभिमताः पदार्थाः
सप्तैव तेष्वनुमताः प्रतियोगिताद्याः ॥
ते स्वाश्रयान्नहि भवन्ति पृथक्त्ववन्त
एकत्र धर्म्मिणि तथाऽऽश्रयधर्म्मभावः ॥८३५॥

अव्याप्यवृत्तिरिह किञ्च मतोऽपि भेदो
न्याये शिरोमणिमुखैर्बहुभिस्तु नव्यैः ॥

वाच्यो विरोध इह तैरपि कोऽप्यपूर्वो
भेदस्थलेऽपि स च किन्न भवेन्मते नः ॥८३६॥
एतेन गीतमितरैरिह यद्विरोध-
मात्रस्य नैकमपि लक्षणमस्ति किञ्चित् ॥
किन्तु पृथग्भवति लक्षणमत्र लक्ष्य-
भेदात् तथा च न जिनानुमतप्रसिद्धिः ॥८३७॥

भेदो यतो न च बुधैरिह देशकाला-
वच्छेदकानुसरणेन मतोऽर्थनिष्ठः ॥
स व्याप्यवृत्तिरपि तु प्रथितस्ततश्चा-
वच्छेदको न च तदीयविरोधकुक्षौ ॥ ८३८ ॥
अस्तङ्गतन्तदिह तार्किकभूषणैर्हि
नव्यैश्शिरोमणिमुखैरपि युक्तिजालैः ॥
स्याद्वादतत्त्वरसलेशभवप्रयत्नै-
र्न्याये निरुपितमिदन्न च किं यथार्थम् ॥८३९ ॥
किं वा यथा तव मते ननु लक्ष्यभेदात्
तल्लक्षणं पृथगिह व्यवहारहेतुः ॥
तद्वत्कथन्नयप्रमाणविभेदतो न
लक्ष्यस्वरूपमपि भिन्नमिहार्हतानाम् ॥ ८४० ॥

तत्त्वे नयैकवलतो न च लक्षणेऽस्त्व-
वच्छेदकस्य घटना प्रमितेः कथन्नो ॥
दुर्नीतिमात्रपरिकल्पितमर्थशून्य-
मेतत्परन्तु न च तत्त्वदृशां मनोज्ञम् ॥ ८४१ ॥

एकान्ततत्त्वघटना ननु यस्य पक्षे
 भेदो विरुद्धबलतोऽभिनवस्तु तस्य ॥
भेदस्सदैव परिपन्थिदलेन येषां
 तेषां समग्रनययोगवतां क भीतिः ॥८४२॥
भेदे स्थिते तु निजधर्म्मिषु धर्म्मयोः स्याद्-
 भिन्नाश्रितत्वबलतस्तु विरोधसिद्धिः ॥
तस्माच्च भेदघटना निजधर्म्मिषु स्या-
 दन्योन्यसंश्रयघटा कथमत्र न स्यात् ॥८४३॥
आधारभेदमननाच्च विनैव मानात्
 तद्ग्राहकाद् यदि विरोधघटा प्रसिद्धा ॥
मानात्तदाऽनुभवतो न कथं विरुद्ध-
 धर्माश्रयोऽस्त्विह कथञ्चिदनन्यतावान् ॥८४४॥
एषैव युक्तिरिह बौद्धनिराक्रियायां
 नैयायिकैरपि मता स्थिरपक्षहेतुः ॥
नो चेद्विरोधहतिरेव भवेद्घटादौ
 सामर्थ्यतद्विरहयोः स्थिरताप्रथायाम् ॥८४५॥
किञ्चापरस्सुगतशिष्यप्रदर्शितोऽस्य
 दोषो महान् भवति तत्त्वत ऐक्यवादे ॥
यस्मात् स्थितेऽपि किमु धर्म्मिणि कालभेदा-
 देकत्र भिन्नपरिणामसमन्वयो नो ॥८४६॥
द्रव्यस्य नाशजनितो यदि तस्य नाशो
 रूपस्य किन्नहि तथैव विनाश इष्टः ॥

पूर्वापरैक्यविषयावगतेस्तु तत्र
नो द्रव्यनाश इति चेत्प्रकृतेऽपि तुल्यम् ॥८४७
द्रव्यान्तरोपजननादथ वा तु पूर्व-
द्रव्येऽविनाशिनि भवेत्पृथगेव मानम् ॥
साजात्यदोषबलतो न पृथग्प्रतीतिः
पूर्वस्य तेन न विनाशप्रकल्पनाऽपि ॥८४८॥
तेनैकदीर्घतरतन्तुवितानताना-
भ्यां यत्र वस्त्रजनिरंशुप्रयोगतोऽस्ति ॥
नो खण्डतन्तुभवनं न च पूर्वतन्तु-
नाशोऽपि तत्र कणभक्षसुतैरुपेयम् ॥८४९॥
तन्त्वंशुयोगजनकादुभयत्र वस्त्रं
सञ्जायतां किमपि नात्र च दूषणं वः ॥
यस्माद्विरोधनियमोपगमे न मूर्त्ता-
नां मूर्त्तयोरथ च मानमिहास्ति किञ्चित्॥८५०॥
किञ्चावगाहनविशेषवशाच्च पूर्व-
मानं द्वितीयपरिमाणतयाऽविनाशे ॥
द्रव्यस्य किम्परिणतं न भवेत्ततश्च
द्रव्यान्तरोपजननं न पृथक्प्रकल्प्यम् ॥८५१॥
दृष्टोऽवगाहनविशेषबलाच्च लोष्ठः
कार्पासकादित इहाल्पतनुर्गरिष्ठः ॥
आरम्भकावयवगा तु बहुत्वसङ्ख्या
तत्र स्थिताऽपि न विलक्षणमानहेतुः ॥८५२॥

संयोगिपुद्गलबलादवगाहनस्य
वैशिष्ट्यतोऽपि परिमाणविशेष इष्टः ॥
दुग्धं हि पारदविनिर्म्मितपात्रपीतं
वान्तं मितन्त्वितरथाधिकमानमेव ॥८५३॥

एतेन योऽप्यवयवान्यजलादिवस्तु-
संसर्गतोऽवयविनो न हि मानभेदः ॥
स्वारम्भकावयवयोगभवे तु तस्मिन्-
नाशो नवीनजननात्प्रथमस्य युक्तः ॥८५४॥

व्यासज्यवृत्तिरिह वस्त्रघटादिभावो
नैकत्र तिष्ठति परन्तु समग्र एव ॥
स्वारम्भके यत इति प्रथितो निरस्तो
मार्गोऽक्षपादसुतकल्पित एष कष्टः ॥८५५॥

रक्तं यदेव प्रथमन्ननु रूपमासीत्
पाकेन रक्ततरमत्र तदेव जातम् ॥
इत्यादिसर्वजनसिद्धप्रतीतितो हि
रूपादयोऽपि परिणामितयाऽभ्युपेयाः ॥८५६॥

उच्छेद एव यदि रक्तगुणस्य पाकात्
पूर्वस्य तर्हि वद कोऽत्र भवेद् विशेषः ॥
रक्तस्तु रक्ततरतां समुपैति नान्य-
च्छ्यामादिकं परमसौ बुध रक्तिमानम् ॥८५७

तस्मात्कथञ्चिदिह भिन्नमभिन्नमर्थं
रूपादिकं यदि करिष्यसि बोधनिष्ठम् ॥

स्थैर्यं भविष्यति तदैव तव प्रसिद्धं
बुद्धान्वयादविहतं न तु सर्वथैकधे ॥८५८॥
मानैकदृष्टिरपि किन्न विरोधरक्षां
कुर्वन्नयानुसरणेन विभज्य धर्मान् ॥
स्याद्वादमन्त्रशरणोऽर्हति विज्ञ वक्तु-
मेकत्र धर्म्मिणि निरस्तसमस्तदोषान् ॥८५९॥
स्याद्वाद एष सकलागमतो विशिष्ट-
स्सर्वे नया इह यतोऽभिमता निविष्टाः ॥
तेषां न खण्डनमिहार्हततत्त्वविज्ञै-
स्स्यान्मण्डनं परमसौ नयमेत्यनेन ॥८६०॥
वेदान्तिकापिलमुखाः परवादिनोऽन्ये
एकान्ततत्त्वममुमाश्रिता भवेयुः ॥
स्याद्वादिनां किमिति नो सुहृदस्तदा ते
मोक्षानुसारिसरणौ क्व विरोधचर्चा ॥८६१॥
इष्टस्तु सङ्ग्रहनयो मम तेन युक्तो
ब्रह्मात्मवादिभिरपीह सखित्वमद्यम् ॥
किं पुद्गले न ममताविरतिर्जिनानां
स्वात्मन्यनन्यसुखसिद्धिमुपागतानाम् ॥८६२॥
आत्मप्रदेशघटनावशतो न किन्नो
ज्ञानान्वयित्ववशतोऽथ च पुद्गलादेः ॥
चैतन्यमिष्टमत एव भवेच्च योगा-
चारेण सख्यमपि विज्ञ कथञ्चिदत्र ॥८६३॥

रागो न पुत्रकनकादिषु नश्वरेषु
योग्योऽविनश्वरनिजात्मसुखे प्रशस्ते ॥
इत्येतदर्थमिह शून्यतयैव नेष्टं
विश्वं किमङ्ग न च माध्यमिकेन सख्यम् ॥८६४

इष्टो न किं बुध जिनैर्ऋजुसूत्रनामा
विज्ञैर्नयः क्षणिकता न कथञ्चिदिष्टा ॥
सौत्रान्तिकोऽपि मम किन्न सुहृद्भवेत्स
एकान्तवादकलुषावृत एव नो चेत् ॥८६५॥

किं तार्किक त्वमिह तर्कपरायणोऽपि
स्याद्वादमाश्रयसि चेन्नयसङ्गमिश्रम् ॥
नो नः सुहृद् भवसि येन न चाश्रयामो
मुक्तिं तवाभिलषितां हितसिद्धिरूपाम् ॥८६६॥

किन्नास्तिकोऽपि गुरुदोषकलङ्कितोऽपि
चार्वाकबाल इह चेदधमो नयेषु ॥
स्याद्वाददत्तहृदयो न सुहृद्यतो नो
किं व्यवहाराकिनयोऽपि मतो जिनानाम् ॥८६७

स्याद्वादवाच्यपि हि सर्वमनन्तधर्मा-
धारं वदन्नियतधर्म्मसमाश्रयेण ॥
स्पष्टीकरोति पृथगेव निरूपकस्या-
वच्छेदकस्य भजनात इह स्वरूपम् ॥८६८॥

मुक्त्यात्मना परिणतोऽपि य एव जीवो
बन्धात्मना परिणतोऽभवदेष पूर्वम् ॥

पूर्वापरादिसमयादिप्रवेशतः किं
नो मुक्तिरप्यनुमता मम बन्धमिश्रा ॥८६९॥
कर्म्मावृतत्वविगमेऽवितथावभासा-
ज्ज्ञानं भ्रमात्मकमिहाभिमतं यदेव ॥
कर्म्मावृतत्वविगमेऽवितथावभासा-
ज्ज्ञानं प्रमात्मकमथाभिमतन्तदेव ॥८७०॥
कैवल्यजन्मसमयात् प्रथमं जिनोऽपि ॥
भ्रान्तो मयाऽभ्युपगतोऽखिलतत्त्ववेत्ता ॥
तीर्थङ्करस्स तु यदा प्रमया तदानी-
मालिङ्गितो न च किमत्र यथार्थवक्ता ॥८७१॥
देशेन देशदलनं ननु सम्मतं नोऽ-
नेकान्तवादघटनाविरहित्वकाले ॥
स्याद्वादतैव बुध सर्वनयेषु यत्र
तत्रार्थतत्त्वमननार्थक एव यत्नः ॥८७२॥
रागादयोऽपि च विरुद्धगुणन्वितो नो
नो सम्मतास्समनिरूपकधर्म्मतोऽत्र ॥
पूर्वोक्तदोषघटना मम येन किन्त्व-
वच्छेदकादिभजनानुगताश्च ते तु ॥८७३॥
मानं ममाभिलपितं परिपूर्णवस्तु-
प्रद्योतकं भवति निर्णयरूपमेव ॥
यस्मादनन्तघटनाविषयैव बुद्धि-
रेकत्र धर्म्मिणि प्रमाभिमतार्थवत्त्वात् ॥८७४॥

नानन्तधर्मविषयत्वत एवमस्य
सन्देहता भवितुमर्हति निर्णयस्य ॥
दोलायमानतनुरेव तु बोध इष्टो
यत्संशयो बुधवरैर्न्न तु निर्णयात्मा ॥८७५॥
दोलायमानतनुता तु विरोधभाना-
ज्ज्ञाने भवेन्न तु विभिन्नप्रकाशकत्वात् ॥
माने तु नास्ति नियतस्य च देशकाला-
वच्छेदकस्य मननेन विरोधभानम् ॥८७६॥
यस्मात् समुच्चयमतिर्भवताम्मतेऽपि
नो संशयात्मकतया प्रथिताऽविरोधे ॥
अव्याप्यवृत्तिमतिरत्र विरोधभान-
स्यैतावता बुध मता प्रतिबन्धिकाऽपि ॥८७७॥
शब्दो नियन्त्रिततया तत एव विद्वन्
नो संशयात्मकमतिप्रगुणो मतस्ते ॥
किञ्चात एव न च सत्प्रतिपक्षतोऽपी-
ष्टस्संशयोऽनुमितिरूपतया बुधाग्र्य ॥८७८॥
चेद्रत्नकोशकृदनिश्चयरूपशाब्द-
लिङ्गोत्थधीमननतत्पर आप्त इष्टः ॥
तर्ह्यस्तु संशयमतिर्न्ननु शब्दलिङ्ग-
जन्या परन्न भजनाङ्कितशब्दतस्सा ॥८८९॥
नो संशयत्वमिह तेन मतं हि कार्या-
वच्छेदकं भवति चार्थसमाजतस्तत् ॥

सन्देहताघटकधर्म्मसमाजहेतु-
सामग्र्यकूटघटनार्थसमाजवाच्या ॥८८०॥
अव्याप्यवृत्तिमतिशून्यतयैव सार्द्धं
कोटिद्वयावगमको निपुणोऽन्यथा नो ॥
सन्देहबुद्धिजनने न कथञ्चिदुक्ता-
वव्याप्यवृत्तिमतिसन्निधितोऽस्ति सा तु ॥८८१॥
किञ्च प्रमाणमतिगा न विशेष्यतैकै-
कत्रास्त्यनेकगप्रकारतया निरूप्या ॥
भिन्ना परन्तु तत एव न संशयत्व-
मापाद्यमानमिह युज्यत आक्षपादैः ॥८८२॥
ये चानवस्थितिमुखा मम दोषसङ्घाः
स्याद्वादतत्त्वविषये नहि ते तु दोषाः ॥
एकान्ततत्त्वमनने तु कथन्न दोषा
जय्या मयैव प्रतिपक्षिजना हि दोषैः ॥८८३॥
सर्वे नया जिननयेऽभिमताः कथञ्चित्
तत्त्वप्रवेशबलतो न च किन्तथा च ॥
तत्स्थापका अपि भवन्ति त एव दोषा
एकान्ततैव परमेष्वपि तैर्निवार्य्या ॥८८४॥
प्राधान्यगौणविधया द्विविधोऽत्र मार्ग-
स्स्याद्वादिनां सकलवस्तुगतः प्रसिद्धः ॥
एकत्र चैकसमये नियतैकहेतो-
रेको द्वयं न पुरुषः प्रथितुं समर्थः ॥८८५॥

एवं स्थिते भवति यस्य प्रधानभावात्
संस्थापना ननु यतो गुणतस्ततो ना ॥
एतावता भवति खण्डकताऽपि तस्य
स्याद्वादिनामनुगुणैव प्रमाणभाजाम् ॥८८६॥

किं विस्मृतं च भवता जिनतन्त्रविज्ञै-
स्सन्दर्शितं हि शतशोऽत्र प्रकारभेदात् ॥
एकत्र धर्म्मिणि विरुद्धपदार्थसार्थ-
संयोजनं न च निरूपकतोऽद्वितीयात् ॥८८७॥

यस्यैव यो भवति साधक आर्हतानां
तस्यैव बाधकतयाऽभिमतस्स किन्तु ॥
स्याद्वादनीतिशबलां भजनां विना नो
क्वैकान्तवादिगणतोषकरोऽयमर्थः ॥८८८॥

स्याद्वादसिद्धिप्रवणे नयसिद्धिभाजां
द्वेषो नयैकशरणे न च मुक्तिभाजाम् ॥
स्याद्वादपक्षविमुखो नय एव नास्ति
येन प्रसक्तिरपि तस्य भवेच्च तेषाम् ॥८८९॥

वादे पराभवघटा सुलभा तु ते स्या-
देकान्ततोऽत्र जय एव न चास्ति यस्मात् ॥
स्याद्वादिनां स तु पराभवमिश्रितोऽस्ति
स्वीकारयोग्य इति किन्न करोषि चित्ते ॥८९०

तस्मात् प्रमाणमनवद्यमिह प्रमातृ-
रूपं प्रमाऽपि च भवेन्नयभेदतस्तत् ॥

द्रव्यावगाहिनयतो हि प्रमात्रभिन्नं
पर्यायगोचरनयात्तु प्रमास्वरूपम् ॥८९१॥
किञ्चार्थगोचरतया प्रमितौ प्रमात्वं
स्वात्मप्रकाशकतया तु प्रमाणभावः ॥
अर्थावगाहनघटा परतो विभिन्ना-
ऽभिन्नात्मबोधरचना स्वत एव यस्मात् ॥८९२॥
बोधः स्वपूर्वमतितो जननात्प्रमात्मा
स्वोदीच्यबोधफलतोऽथ प्रमाणरूपः ॥
बोधात्मनाऽऽत्मनियतश्च प्रमातृरूपो
ह्यन्वर्थता भवति तेन प्रमाणतादेः ॥८९३॥
अर्थैकदेश इह नार्थतया प्रसिद्धो
ह्यर्थांश एव स तु विज्ञजनैर्निरुक्तः ॥
तद्गोचरोऽर्थविषयत्ववियोगतस्तु
प्रोक्तो नयो बुधवरैरधिकः प्रमाणात् ॥८९४॥
एवञ्च लक्षणगतोऽभिमतोऽर्थब्द-
स्स्याद्वादलाञ्छितपदार्थपरो नयज्ञैः ॥
नातिप्रसञ्जनमतोऽस्य भवेन्नयेषु
वस्त्वंशमात्रविषयेषु मते जिनानाम् ॥८९५॥
मुख्यं प्रमाणमिह केवलबोध एव
सैव प्रमा भवति वस्तुप्रकाशकत्वात् ॥
यः सर्वविद् भवति सैव पदार्थमेकं
वेत्तीति यन्नयविदां प्रथितोऽत्र पन्थाः ॥८९६॥

एकत्र धर्म्मिणि यतो निखिलस्य बन्धः
साक्षात्परम्परतया च मतो बुधानाम् ॥
युक्तस्ततो निखिलवस्तुमतौ घटादे-
स्संसर्गिणोऽवितथबोध इमां विना नो ॥८९७॥

मत्यादयस्त्विह तु यद्यपि मानमध्ये
प्रोक्तास्तथाऽपि गुणतः प्रमितित्वभाजः ॥
यस्मादसर्वविषयाः प्रथिता मतेऽस्मि-
न्नक्षायिकत्वत इमे जिनतन्त्रविज्ञैः ॥८९८

भेदस्त्वभेदसहितः प्रथमन्निरुक्त-
स्संसर्ग आर्हतमते निखिलेषु यस्मात् ॥
तस्माद् घटादिमतयोऽपि प्रमा अभेदां-
शालम्बनात् खलु भवन्ति प्रधानभावात्॥८९९॥

कुम्भोऽयमित्यवगतिस्तु घटत्वमेकं
कुम्भेऽवभासयतु मात्वमथापि तस्याः ॥
सत्त्वादयोऽप्यवगतास्तदभिन्नतादा-
रम्यादेकताश्रयतयाऽऽश्रयतो यतोऽस्याम् ॥९००।

भेदांशगोचरतया तु नयत्वमस्यां
सुस्पष्टमर्थविषयत्वलयाद् विभाव्यम् ॥
यत्सर्वथा विबुध मानविभिन्नरूपे
नो सम्मता सुनयता नयकोविदानाम् ॥९०१।

मानं च यैर्न्नयसमूहतया निरुक्तं,
तेषामपि प्रथमदर्शित एव भावः ॥

नो चेन्नया इह प्रमामतितो विभिन्ना,
दुर्नीतितोऽथ च कथन्न विवेचनीयाः ॥१०२॥
एवञ्च नान्धसमुदायवदस्य वस्त्व-
द्रष्टृत्वमज्ञजनसञ्जितमस्ति किञ्च ॥
नो योगपद्यत इहाघटनान्नयानां,
मानापलापघटना जिनदेवतानाम् ॥१०३॥
अस्त्येव कुम्भ इति दुर्नयवाग्विलास-
स्स्याच्छब्दयोजनबलात्स च मानशब्दः ॥
अस्तीति नीतिवचनं पुनरत्र विज्ञै-
र्भेदेन तद्विभजनं कृतमेव शब्दे ॥१०४॥
प्रत्यक्षमेव गुरुसम्मतमत्र मानं,
बौद्धोऽनुमानसहितं तदवैति मानम् ॥
वैशेषिकोऽपि च तदेव करोति चित्ते,
साङ्ख्यस्तु शब्दसहितं तदुरीकरोति ॥१०५॥
तच्चोपमानसहितं ननु गौतमीयाः
प्राभाकरास्तदपि कल्पनतो विमिश्रम् ॥
भाट्टास्त्वभावसहितं ब्रुवते तदेव,
वेदान्ततत्त्वविदुषामपि मान्यमस्ति ॥१०६॥
सङ्क्षेपतो भवति तद्द्विविधं जिनानां,
प्रत्यक्षमेकमपरञ्च परोक्षमिष्टम् ॥
यत्रानुमादिमतितोऽधिकधर्मभानं,
स्पष्टं तदार्हतमतं प्रथमं प्रमाणम् ॥१०७॥

द्वैविध्यमस्य पुनरार्हतसम्प्रदाये ॥
तत्रादिमं भवति सांव्यवहारकाख्यम् ॥
स्यात्पारमार्थिकमनन्यसहायजीवा-
पेक्षान्निजावरणकर्म्मलयादितोऽन्यत् ॥१०८॥
साकल्यवद्विकलतावदिति द्विधाऽन्त्यं,
स्यान्निर्निजावरककर्म्मलयात्तु तत्र ॥
यद्द्रव्यपर्ययसमग्रप्रकाशशालि-
तत्केवलं प्रथममादिमदक्षयञ्च ॥१०९॥
तज्ज्ञानदर्शनभिदा द्विविधं बुधेन्द्रै-
रुक्तं समग्रनिजगोचरभाजि पूज्यैः ॥
स्वस्वस्वभावबलतो व्यवधान-
शून्यमुत्पत्तिमभ्रवति तत्परहेतुशून्यम् ॥११०॥
ग्राह्यक्षयोदयवशात्तु कथञ्चिदस्य
नाशोदयावपि मतौ जिनसम्प्रदाये ॥
उत्पत्त्यवस्थितिलयान्वयितापि सत्ता
युज्येत तेन ननु तत्र न चान्यथा सा ॥१११॥
तच्च द्वयं युगपदेव समामनन्ति
श्रीमल्लवादिप्रमुखा व्यवहारमात्ताः ॥
शुद्धर्जुसूत्रमुपगम्य द्वयं क्रमोत्थं
प्राहुश्श्रुतैकरसिका जिनभद्रमुख्याः ॥११२॥
एकन्तु सङ्ग्रहनयस्य समाश्रयेण
वादी समादिशति यौक्तिकसिद्धसेनः ॥

इत्थं विरोधविमुखा ननु सूरिपक्षा
नो ज्ञस्य मोदमिह कस्य ददत्यनल्पम् ॥११३॥
यद्यस्य कार्यमिह तत्तत इष्टमन्य-
च्छाद्मस्थिकं भवतु तच्च तदन्यकालम् ।
ज्ञानेन तुल्यसमयं त्विह दर्शनं स्यात्
स्वाभाव्यतो रविगताविव तापदीप्ती ॥११४॥
नैवेह जं समयमित्यपि सूत्रमन्यै-
र्वाच्यं विघातकतया समयस्य यस्मात् ॥
तुल्यार्थतैव प्रमिता समयार्थता नो
तत्त्वेऽर्हतो नहि भवेदुभयस्य योगः ॥११५॥
हेत्वोस्तदावरणकर्मविनाशयोश्च
स्याद्यौगपद्यबलतोऽपि च यौगपद्यम् ॥
नात्रानयोर्मिथ उपैमि च हेतुभावं
छद्मस्थवद्भवतु येन न यौगपद्यम् ॥ ११६॥
यत्साद्यपर्यवसितत्वविधायि सूत्रं
तद्यौगपद्यमत एव भवेद्यथार्थम्
द्रव्यादिगोचरतयाऽस्य गतिर्न युक्ता-
प्रश्नोत्तरे अपि यतो न तथा प्रतीते ॥ ११७ ॥
इत्थं प्ररूपयति युक्तिकदम्बमत्र
वादी विपक्षमतखण्डनमल्लमल्लः ।
तत्पक्षमागमविरोधमहाप्रचण्ड-
वातैः क्षिपन्ति जिनभद्रमुखाश्श्रुतज्ञाः ॥११८॥

तद्भाष्य एव मतमस्य तु सप्रपञ्च-
मालोकनीयमनवद्यमकुण्ठबोधैः ॥
दृश्याऽत्र तन्मतरहस्यविदोऽपि सूरेः
श्रीहेमचन्द्रविबुधस्य प्रगल्भवृत्तिः ॥११९॥

सामान्यगोचरतया खलु दर्शनं त-
ज्ज्ञानन्तदेव तु विशेषप्रकाशकत्वात् ॥
अस्पृष्टगोचरतयाऽथ च दर्शनं स्या-
न्नेत्रादिधीवदिति वक्ति च सिद्धसेनः ॥१२०॥

एकक्षणे तदुभयावृत्तिकर्मनाशा-
देकं द्विधर्मकमिदं भवदर्थतस्स्यात् ॥
सामग्र्यभाजि जनके न जनेर्विलम्बो
दृष्टो यतो भवति तत्क्रमिकं द्वयन्नो ॥१२१॥

नो यौगपद्यमपि तत्र ततो नयज्ञै-
र्वाच्यं तथानुपगमागमभङ्गभीत्या ॥
पार्थक्यतः कथनमप्यनयाश्श्रुते तु
धर्मद्वयावगतये न पृथक्त्वसिद्ध्यै ॥१२२॥

इत्यादितन्मतरहस्यमखण्ड्यमन्यै-
र्विस्तारतस्त्वभयदेवकृतेस्सुवृत्तेः ॥
ज्ञेयं बुधैरमलबोधविधानदक्षै-
र्भाव्या परस्परविरोधहतिश्च बुद्ध्या ॥१२३॥

ज्ञानं द्विधा विकलमार्हतसम्प्रदाये
तत्पारमार्थिकतयाऽभिमतं यदन्त्यम् ॥

नो क्षायिकं भवति तेन समग्रता नो
स्यात् पारमार्थमवहिःकरणोद्भवत्वात् ॥१२४॥
ज्ञानं भवेद्भवगुणोद्भवमत्र रूपि-
द्रव्यार्थमावरणकर्मलयोपशान्तेः ॥
यत्तद्बुधैरवधिबोध इति प्रतीतं
भ्रान्तिर्विभङ्ग इति तस्य च कीर्त्यतेऽत्र ॥१२५॥
उत्पत्तिमात्रत इदं खलु नारकेषु
देवेषु चेति भवहेतुतया प्रसिद्धम् ॥
सद्दर्शनात्मगुणतो भवतीह नृणां
यस्माद् गुणोद्भवमिदन्तु तथा तिरश्चाम् ॥१२६
छायातमःक्षितिजलानलवायुचित्त-
द्रव्याणि पुद्गलभवान्यथ रूपवन्ति ॥
क्रोधादिकर्मपटलश्च तथाऽऽगमज्ञै-
रिष्टं त्वनुद्भवरसाद्यणुबन्धजन्यम् ॥१२७॥
यद्वन्न गौतमनये कठिनादिभिन्न-
स्पर्शोऽपि पाकवशतः पृथिवीविकारः ॥
भिन्नः परन्तु पृथिवीत्वसमानभाव-
स्तद्वन्न किं भवतु पुद्गल एकजातिः ॥१२८॥
स्पर्शान्त इष्ट इह यः खलु गौतमेन
भूमौ स एव च जलाद्यणुपुद्गलेषु ॥
उद्भूतमेव सकलं न च तत्समुत्थे
कार्येऽखिलेऽप्यभिमतं परतैर्थिकानाम् ॥ १२९ ॥

वैशेषिकस्य च मते परमाणुमात्र-
पाके घटादिपिठरस्य यथैव नाशे ॥
जातेऽपि सृष्टिरपरा परमाणुमात्रा-
च्चित्रा तथैव न च पुद्गलतोऽपि किं सा ॥९३०॥
पाकप्रभेदघटना यदि तत्र तेषां
शक्तिप्रभेदभजना न च तत्र किन्नः ॥
शक्त्यैकजातिरपि पुद्गल एव भिन्नान्
भूम्यादिकान् सृजति नात्र कुतर्कबाधः ॥९३१॥
मीमांसको विहतशक्तिरबाध्यमानां
शक्तिं परैर्यदि न साधयितुं समर्थः ॥
किं तावता जिनमताखिलतत्त्वविज्ञाः
स्याद्वादशक्तिशरणा न च शक्तिमन्तः ॥९३२॥
वह्नौ स्थितेऽपि मणिसन्निधितो न दाहो
यज्जायते भवति तद्विगमे च दाहः ॥
सत्त्वेऽपि सूर्यमणिसन्निधितो मणेर्वा
वह्नौ ततश्श्रुतिविदा ननु शक्तिरिष्टा ॥९३३॥
नैयायिकैः पुनरिहानुभवापलाप-
दोषाङ्कुरैरधिककल्पनभीतिमद्भिः ॥
स्याद्वादमुद्रितपदार्थविवेकशून्यै-
स्सा लाघवोहबलशालिभिरिष्यते नो ॥९३४॥
दाहे मणेस्तु प्रतिबन्धकता तथा त-
द्राहित्यमस्य जनकं द्वयमेव कल्प्यम् ॥

नैयायिकस्य रविकान्तमणेस्तु तस्मिन्
उत्तेजकत्वमत एव न शक्तिचर्चा ॥१३५॥
मीमांसकस्य तु भवेद् व्यतिरिक्तशक्ति-
पक्षे गुरुत्वमपरापरशक्तियोगात् ॥
तज्जन्मनाशपरिकल्पनतो गुरुत्व-
मेकान्ततत्त्वमननानिपुणस्य किञ्च ॥ १३६ ॥
वह्नौ तृणादिजनिते पृथगेव किञ्च
वैजात्यमक्षचरणानुगतैः प्रकल्प्य ॥
हेतुत्वमभ्युपगतं नियतं तृणादे-
स्तत्तद्विलक्षणहुताशनजातिमत्सु ॥१३७॥
वह्नित्वजातिमति नो व्यभिचारतस्स्या-
द्धेतुत्वमस्य तु तृणत्वमणित्वधर्म्मैः ॥
शक्त्यैव किन्तु दहनार्जिकया ततो नो
वैजात्यकल्पनमिह श्रुतिपाठकानाम् ॥१३८॥
फूत्कार एव सहकृत्तृणतोऽग्निभावे
नो मन्थनादि नियमो न समानशक्तौ ॥
शक्त्याऽन्यया तदुपपादनयत्नवत्सु
वैजात्यमेव वरमित्यपि यौगपन्थाः ॥१३९॥
नो हेतुता भवति जातिरखण्डधर्म्मो
ना वा सखण्ड इह किन्तु भवेत्तथा च ॥
नास्यास्स्वतो भवति धीरत एव साव-
च्छिन्नत्वमभ्युपगतन्नियमेन तस्याम् ॥ १४० ॥

एवं स्थिते यदि भवेदिह शक्तिरेवा-
वच्छेदिका जनकताग्रहणात्तदाऽस्याः ॥
पूर्वं ग्रहोऽभिमत एव सखण्डबोधोऽ-
वच्छेदकावगमनन्न यदन्तरेण ॥९४१॥

शक्तिस्त्वतीन्द्रियतयाऽक्षभवावबोध-
ग्राह्या भवेन्नहि परन्त्वनुमानवेद्या ।
सा चानुमा जनकतामतिमन्तरा नोऽ-
न्योन्याश्रयः स्फुटमिहेति च गौतमीयाः॥९४२

शक्तिस्तथा भवति किं स्वत एव किं वा
स्वाधारकारणबलादथ वाऽन्यहेतोः ॥
स्वस्मात्स्वजन्म नहि युज्यत एव नैकं
यत्कार्यकारणतयाऽभिमतं जनानाम् ॥९४३॥

आद्ये न चेदभिमतो जनकं विनैव
शक्तेर्भवस्तव तदा नियता न सा स्यात् ।
स्वाधारकारणगता त्वपरा द्वितीये
शक्तिर्म्मता यदि तदा त्वनवस्थितिर्वः ॥९४४॥

शक्तिं विनैव यदि शक्तिरुपेयतेऽस्मात्
किन्नो भवेत्त्वदुपदर्शित एव दोषः ॥
नाधारदेशनियमो भवितान्तिमे ते
शक्तेर्यतोऽन्यजनकादुपपत्तिरस्याः ॥९४५॥

यद्वद् गुणादि समवायिषु वस्तु विद्वन्
सञ्जायते न जनकव्यतिरिक्तभावे ॥

शक्तिस्तथैव भवता समुपासनीयाऽऽ-
धारस्ततो जनक एव तवापि मान्यः ॥१४६॥
शक्तिं विना भवति नैव स चापि शक्त-
श्शक्तौ त्वदुक्तनयतो ह्यनवस्थितिस्ते ॥
इत्यादिदोषभयतो न च शक्तिसिद्धि-
र्वेदान्तिनामपि मते भवितेति योगाः ॥१४७॥
नैतेऽक्षपादसुततोऽभिमतास्तु दोषा
जैनोक्तशक्तिविषये प्रभवन्ति तत्त्वे ॥
शक्तिस्स्वरूपसहकारिविभेदतो य-
ज्जैनैर्द्विधा प्रकटिता ननु तैरबाध्या ॥१४८॥
या हेतुता जनकगा ननु सैव शक्ति-
र्जात्यादिवद् भवति साऽनुगता कथञ्चित् ॥
साधारकारणबलाच्च तदात्मभूतो-
त्पन्ना स्वरूपनियता निजशक्तिरिष्टा ॥१४९॥
या स्वान्यकारणसमग्रसमन्वयोत्था
स्वस्मिन् स्वभिन्नजनकेषु च कार्यतः प्राक् ॥
यामन्तरेण नहि कार्यभवे समर्थो
वह्न्यादिको भवति सा सहकारिशक्तिः ॥१५०
एषा द्विधाऽपि वचनान्तरतोन्यतन्त्रे-
ष्वप्यस्ति सिद्धिविषया न जिनैकल्प्या ॥
यद्योग्यतात्मकफलोपहितत्वभेदा-
द्धेतुत्वमत्र कथितं द्विविधश्च हेतौ ॥१५१॥

हेतौ यथा जनकशक्तिरनन्यरूपा
शक्तिस्तथैव प्रतिबन्धकतास्वरूपा ॥
दाहादिकार्यजननाक्षमतानुकूला
मण्यादिभावनियता तदनन्यरूपा ॥९५२॥

सापि स्वरूपसहकारिविभेदतोऽत्र
द्वेधाऽऽश्रयस्य जनकात् प्रथमा तु तत्र ॥
उत्तेजकापगमसन्निधितो द्वितीया
सोत्तेजके सति न जायत एव यस्मात् ॥९५३॥

मण्यादिभावसहचारबलाद्विनाशः
किं वाऽस्तु दाहजनकानलहेतुतायाः ॥
शक्तेस्तदुद्भवफला स्वपरापि शक्ति-
र्वह्नौ समस्ति तत एव पुनर्भवोऽस्याः ॥९५४

मण्यादिकेऽग्निनिकटेऽपिच दाहशक्ति-
श्शक्त्या स्वजन्मफलया मुहुरेव जाता ॥
मण्यादिनाशदकवशावतिष्ठ तेनो
नो तावता भवति दाहभवोऽपि तस्याः ॥९५५॥

मण्यादिकेष्वपगतेषु तु सैव दाहं
वह्निनस्थिता ननु करोति मते जिनानाम् ॥
उत्तेजकाननुगतः पुनरत्र शक्ते-
र्म्मण्यादिको भवति नाशकृदन्यथा नो ॥९५६

शक्त्यात्मिका जनकताऽभिमता यतो ना-
वच्छेदकस्य तत एव भवेद्व्यपेक्षा ॥

नो जात्यखण्डनियताऽभिमतस्त्वयाऽन्य-
वच्छेद्यतानियम इत्यवधारयान्तः ॥१५७॥
हेतुत्वमत्र यदि शक्तिपदाभिलप्यं
नो तर्हि दुर्वचतया तदलीकमेव ॥
नैयत्यतो जनिमतां व्यवधानशून्य-
पूर्वक्षणानुगतता नहि हेतुता ते ॥१५८॥
तत्त्वे न किं गगनमप्यनुमोदितं स्या-
द्धेतुत्वतस्तव बुधाग्र्य घटादिकार्ये ॥
दण्डत्वदण्डपरिणामकुलालहेतु-
वैशाखनन्दनमुखाः किमु हेतवो नो ॥१५९॥
सङ्केततोऽभिनवतो ऽभिनवाऽन्यथासि-
द्धत्वं स्वलक्षणबलादुपगम्य तेषाम् ॥
तद्भिन्नतां जनकलक्षणसन्निविष्टां
स्वीकुर्वतोऽपि तव विज्ञ न दोषमुक्तिः ॥१६०॥
यस्माद् विभाग इह तेऽभिमतो न हेतु-
स्संयोगकार्यजनने खलु तादृशोऽपि ॥
नो तत्र पञ्चविधमस्ति तवान्यथासि-
द्धत्वञ्च नव्यमपि कार्यमपेक्ष्य तत्तु ॥१६१॥
यद्यन्न यं प्रति जनेष्विह सम्प्रसिद्धं
हेतुत्वतो जनकलक्षणगास्तु तेषाम ॥
भेदा मता यदि तदा निखिलज्ञभिन्न-
दुर्बोधता भवतु लक्षणगोऽत्र दोषः ॥१६२॥

वैजात्यकल्पनकथाऽपि न चात्र वह्नौ,
नो वा तृणारणिमणित्वमुखैश्च धर्म्मैः ॥
शक्तिस्वरूपजनकत्वमुपेयतेऽव
च्छेद्यं न जैमिनिनयादविशेषताऽपि ॥१६३॥

शक्तिग्रहोऽन्वयविलोकनसव्यपेक्षात्,
सञ्जायते च जनके व्यतिरेकबोधात् ॥
ऊहाख्यबोध इति सोऽभिमतो जिनानां,
व्याप्तिग्रहात्मकतयाऽपि स एव सिद्धः ॥१६४॥

तद्व्यञ्जकास्तृणमणित्वमुखास्तु धर्म्मा,
नो व्यञ्जकेषु नियमोऽस्ति तवाप्यभेदात् ॥
यद्व्यञ्जकत्वमिह लिङ्गतयाहतोऽस्ति,
नानाविधेषु च विशेषगुणेषु पुंसः ॥१६५॥

वैकल्पिकी भवति यत्र तु हेतुता वो,
वेदप्रमाणविषयो व्यतिरेकतो न ॥
तत्रास्ति किञ्च जनकत्वमतिस्तथैव,
किन्नान्वयैकमतितो ननु साऽपि लोके ॥१६६॥

एवं स्थिते दहनहेतुतया प्रसिद्धा,
ये वै तृणारणिमणिप्रमुखाः पदार्थाः ॥
तेषां भवेज्जनकताऽन्वयमात्रबोधा
दित्यादयोऽननुगुणा न जिनानुगानाम् ॥१६७॥

मीमांसकोपरि पतेदपि दोष एषोऽ-
वच्छेद्यता नियमतो जनकत्व इष्टा ॥

शक्तिस्तृणादिषु वयं प्रतिपादयामोऽ-
खण्डां तु तां जनकतात्मतयैव तेषु ॥१६८॥
अन्योन्यसंश्रयघटा तत एव नो नो,
मीमांसकस्य तु भवेदपि सोक्तनीत्या ॥
नैवानवस्थितिघटापि च हेतुतात्म-
शक्तौ तु गौतमसुतैरुपगीयमाना ॥१६९॥
वह्नित्वतो यदि तु कारणताऽनलस्य,
दाहं प्रति प्रतिभया ननु गौतमानाम् ॥
वह्नित्वमस्य सकलं प्रति निर्विशेषं,
किन्तर्हि शान्तिरनलान्न:पिपासितानाम्॥१७०॥
साधारणो भवतु वह्निगता तु जातिः,
किन्त्वन्न्त्रयादिमतितोऽत्रगता विशेषात् ॥
दाहं प्रतीत्य जनकत्वनिरूपकत्व-
वत्त्वेन नो तृडुपशान्तिमुखेऽपि कार्ये ॥१७१॥
इत्याक्षपादवचनं वचनीयमेव,
मण्यादिकेऽपि सति यन्न च वह्नितस्तत् ॥
दूरं प्रयाति वद कस्य लयेन दाहो,
ना जायते हुतभुजोऽविचलात्तदानीम्॥१७२॥
मण्याद्यभाव इह तु प्रतिबन्धकाभा-
वत्त्वेन हेतुरत एव न चाग्निमात्रात् ॥
दाहो न वा भवति तद्गतशक्तिसिद्धि-
रित्येतदप्यनुचितं वचनञ्च तेषाम् ॥१७३॥

भावात् पृथङ् नहि यतोऽस्ति प्रमाणसिद्धोऽ-
भावो नृशृङ्गवदसौ न च कारणं स्यात् ॥
आधार एव विरहो जिनसम्प्रदाये
मण्यादिकस्य हुतभुग्गतशक्तिरूपः ॥ १७४॥
किञ्चाक्षपादमतदर्शित एव भिन्नोऽ-
भावोऽस्त्वसौ नहि भवेज्जनकस्तु दाहे ॥
तत्त्वे मणौ सति न किं प्रतिबन्धकस्य
मन्त्रादिकस्य विरहादनलेन दाहः ॥१७५॥
यत्कारणं भवति तत्समजातिकस्य
सर्वस्य कार्यजननात् प्रथमन्न सत्त्वम् ॥
इष्टं यतो न भुवनत्रयवर्त्तिदण्ड-
मात्रस्य कुम्भजननात् प्रथमं ह्यपेक्षा ॥१७६॥
मण्यादिकस्य विरहो निखिलोऽथ हेतु-
स्तद्धेतुता नियमिताऽनुगतनेन केन ।
कूटत्वतोऽथ प्रतिबन्धकमात्रशून्य-
त्वस्थेन चेत्क्वचिदपीह तदा न दाहः ॥१७७॥
सर्वस्य किञ्चिदपि कार्यमपेक्ष्य यस्मात्
प्रत्येकशोऽस्ति प्रतिबन्धकतैव लोके ॥
दाहोपघातनिपुणप्रतिबन्धकानां
राहित्यकूटमिह चेज्जनकन्तदा तु ॥१७८॥
भङ्ग्यन्तरेण भवताऽपि च शक्तिरिष्टा
नैपुण्यमर्थबलतो हि न शक्तिभिन्नम् ॥

शक्तिं विना निपुणता प्रतिबन्धकेषु
दाहोपघातफलिका न च काचिदेका ॥१७९॥

यद्यन्य एव ननु कोऽपि तवात्र मान्यो
नैपुण्यताश्रयतया बुध तर्हि वाच्यः ॥
किं कारणं स मणिमन्त्रमुखेषु येन
नान्यत्र नैव हि विशेष इहान्यभावात् ॥१८०॥

कूटत्वमत्र गुणरूपतया न तेष्व-
भीष्टं यतस्स नियमेन च द्रव्यवृत्तिः ॥
किन्त्वन्यदेव मतिगोचरताविशेष-
रूपं भवेन्न तु भवेत्प्रकृतोपयोगि ॥१८१॥

हेतुत्वबोधजननाय यतस्त्वयैवा-
वच्छेदकोऽप्यभिमतो मतिगोचरोऽत्र ॥
नैवान्तरेश्वरमतिं प्रकृतस्य तस्या-
वच्छेदकस्य तु भविष्यति रूपसिद्धिः ॥१८२॥

दूरेऽस्तु बोधघटना ननु रूपमेव
नो यस्य किञ्च प्रतिबन्धकशून्यताऽपि ॥
संसर्गतो नियमिताऽभिमताऽन्यथा वा
नान्यस्तु कल्प इह तेऽपि मतो बुधाग्रय ॥१८३

सत्वे मणेरपि यतो विरहोऽस्य भिन्न
सम्बन्धतोऽस्ति न च दाहभवस्ततस्तु ॥
आद्यः परन्त्वभिमतो न च सोऽपि युक्त-
स्संसर्ग इष्ट इह नोऽनियतस्तु कश्चित् ॥१८४॥

यस्मान्न कश्चिदपि तस्य समाश्रये स्व-
सम्बन्धपक्षत इहापि भवेद्विशेषः ॥
स्यात्त्वन्मतस्स नियतो ननु तर्हि वाच्य-
स्तादात्म्यमेष उत वा व्यतिरिक्त एव ॥१८५
भेदो भवेच्च प्रतिबन्धकशून्यताऽऽद्ये
नो वै विरोधघटना प्रतियोगिनाऽस्य ॥
एवञ्च किं भवति सप्रतिबन्धकेऽपि
देशे न दाहघटना बुध तेऽविशेषात् ॥१८६॥
अन्त्ये तु येन प्रतिबन्धकता भवेत् स
संसर्ग एव नियतो ननु सन्निविष्टः ॥
तद्भेदतोऽपि प्रतिबन्धकशून्यतास्तु,
भिन्नाः कथं स्युरिह तेऽनुगतेन वाच्याः॥१८७॥
किञ्चोभयादिप्रतियोगिकशून्यताऽपि
मण्यादिकस्य च भवेज्जनिका तथा च ॥
सत्त्वे मणेरपि न किं तव दाहभावोऽ-
वच्छेदको निविशते यदि तत्र धर्म्मः ॥१८८॥
ध्वंसो भवेन्न जनको न च प्रागभावो
मण्यादिकस्य बुध तर्हि तवैव शास्त्रे ॥
यस्मात्तयोर्न्नहि मता प्रतियोगितायां
संसर्गधर्म्मघटना फलशून्यतातः ॥१८९॥
एवञ्च सिद्ध इह ते प्रतिबन्धकात्य-
न्ताभाव एव जनकस्स तु नैव युक्तः ॥

प्राचीनपद्धतिविलोपभयाद्यतस्तै-
स्ताभ्यां च तस्य नहि देशसमानतेष्टा ॥११०॥
ध्वंसोऽपि यत्र प्रतिबन्धकभावराशेः
कार्योद्भवो विबुध तत्र जनप्रसिद्धः ॥
चेन्नव्यतार्किकनयाश्रयणेन सोऽन्त्य--
न्ताभावतो ननु भवेत्प्रतिबन्धकानाम् ॥१११॥
नित्यस्त्वया स तु मतो विभुरेकरूप-
स्सत्त्वे मणेरपि तथैव च तत्र देशे ॥
वह्न्यादिहेतुसहितः किमु नैव दाह-
कार्यं करोति मणिशून्य इव प्रदेशे ॥११२॥
मण्यादिसत्त्वबलतो यदि तत्र दाह-
सामर्थ्यमेव विहतन्ननु शक्तिसिद्धिः ॥
किञ्च स्वभावविगमेन विनाशिताऽपि
स्यात्तस्य तेन न भवेत्स च नित्यरूपः ॥११३॥
संसर्गतो भवति कार्यजनो समर्थो
हेतुस्स्वयन्न तु तथा च भवेन्न तत्र ॥
दाहो मणौ सति यतो विरहस्य नैव
संसर्ग इष्यत इति प्रलपन्ति योगाः ॥११४॥
संसर्ग इष्ट इह नो व्यतिरिक्तरूपः
किन्तु स्वरूपमिदमप्युभयस्वरूपम् ॥
नित्यत्वतो न मणिताविरहो विनष्टो
नाधार एवमथ किन्न च तस्य सस्स्यात् ११५

संसर्गता न यदि तस्य तदा त्वयेष्टा
रूपद्वयस्य च विशिष्टमतेरभावात् ॥
कस्माद् विशिष्टमतिरेव तदा ततो नो
तद्योग्यताविगमतो यदि शक्तिसिद्धिः ॥९९६॥

अन्योन्यसंश्रयघटाऽपि विलोक्यतेऽत्र
योग्यत्वतो भवति धीरनया च तद्यत् ॥
भ्राम्यात्मबुद्धिजननाय च योग्यतापि
सत्त्वे मणेरपि कथन्न भवेत्त्वयेष्टा ॥९९७॥

बुद्धौ प्रमात्वमपि तत्र निवेश्यते चेत्
सम्बन्धसत्त्वबलतस्तदपीह तर्हि ॥
किञ्चैतदेव भवतो हृदयं विचिन्त्या-
न्योन्याश्रयः प्रथममेव प्रदर्शितोऽत्र ॥९९८॥

एतादृशस्य विरहस्य न युक्तमत्य-
न्ताभावता कथनमप्यविशेषतो वः ॥
भेदादितो भवति नो खलु रूढमेव
योगेऽपि सम्भवति तद्वचनं बुधाग्र्य ॥९९९॥

तादात्म्यता परिणतिर्न्न कदापि यत्र
यस्यास्त्यसौ भवति तद्विगमः परन्तु ॥
अत्यन्ततापरिगतः प्रतिबन्धकस्य
नैतादृशोऽस्ति स तु दाहभवेऽपि काले॥१०००॥

उत्तेजकस्य विरहोऽपि मणौ निवेश्यः
कूटत्वतो भवति नात्र गतिर्द्वितीया ॥

पूर्वप्रदर्शितदिशा सकलोऽपि दोष-
स्तत्रापि तार्किकमते विनिभावनीयः ॥१००१॥
स्वातन्त्र्यतोऽथ प्रतिबन्धकशून्यतानां
हेतुत्वमभ्युपगतं मम दाहकार्ये ॥
उत्तेजका अपि तथैव च कारणानि
पूर्वोक्तदोषघटना न च विद्यतेऽत्र ॥१००२॥
युक्तन्न चैतदपि दाहसमानता नो
तत्त्वे यतो नियतकारणतो मता सा ॥
नो वृश्चिकेऽस्ति नियमोऽयमवाच्यमेत-
च्छक्त्याऽर्हतानुमतया ननु सोऽस्ति यस्मात्१००३
आधेयशक्तिरधिकाऽन्यमतप्रसिद्धा
नो नो मताऽस्ति नहि सा सहकारिशक्तिः ॥
शब्देऽपि बोधफलिकाऽभिमतार्थबन्ध-
स्तद्व्यञ्जकस्तु समयोऽभिमतो जिनानाम्१००४
तस्मादशक्त इह शक्तिनिराक्रियायां
नैयायिकस्यजतु पुद्गलजातिभेदान् ॥
स्याद्वादवाच्यवधिबोधमपेतदोषं
ज्ञो रूपिमात्रविषयं प्रकटीकरोतु ॥१००५॥
चारित्रशुद्धिजनितात्क्षयशान्तितो यो
हृत्पर्ययावरणकर्मण आविरस्ति ॥
बोधो हृदिस्थपरिणामकदम्बनिष्ठो
हृत्पर्ययोऽत्र विकलोऽभिमतो द्वितीयः ॥१००६॥

यच्चिन्त्यते मनसि किञ्चिदपीह वस्तु
येस्तन्मनो भवति तत्परिणामशालि ॥
द्रव्यात्मकं तदपि वेत्ति पुमान्विशिष्टो
हृत्पर्ययाख्यमतिभृद्विषयस्तथाऽस्य ॥७॥
साक्षात्स यद्यपि मनोगतभावमेव
जानाति नो विषयमस्य तथापि वेत्ति ॥
लिङ्गान्मनोगतविकल्पभरात्तु तत्त-
दाकारतोऽनुमितितस्तमपि प्रमाणात् ॥८॥
स्याद्व्यावहारिकमथापरसव्यपेक्ष-
जीवान्निजावरणकर्म्मलयोपशान्तेः ॥
तस्येन्द्रियोद्भवमनिन्द्रियजन्यमेवं
द्वैविध्यमत्र कथितं जिनतन्त्रविज्ञैः ॥९॥
तत्रेन्द्रियाण्यभिमतानि नयेऽत्र पञ्च
ज्ञानं ततो भवति सद्विषयावभासि ॥
ज्ञानं मनोद्भवमनिन्द्रियजन्यमत्र
यस्मादनिन्द्रियतया मन इष्यते ज्ञैः ॥१०१०॥
न प्राप्यकार्यभिमतं नयनं मनश्चा-
धिष्ठानभिन्नगतवस्तुप्रकाशकत्वात् ॥
श्रोत्रादिकन्त्वभिमतन्ननु प्राप्यकार्य-
धिष्ठानदेशगतवस्तुप्रकाशकत्वात् ॥११॥
नात्राणुमानमपि जैनपदार्थविज्ञै-
रिष्टं मनो महदिदं प्रतिपादितन्तु ॥

ज्ञानक्रमोवरणकर्म्मलयोपशान्ति-
भेदक्रमादुपगतो न मनोऽणुभावात् ॥१२॥
एतद्द्वयन्त्वथ चतुर्विधमार्हतानामेकैकशो मतमवग्रहनामधेयम् ॥
ज्ञानं भवेत्प्रथममक्षघटादियोग्या-
वस्थानसञ्जनितदर्शनजन्यमत्र ॥१३॥
सन्मात्रगोचरमवग्रहपूर्ववर्त्ति
यद्दर्शनं तदिह नेव मतं नवीनैः
किन्त्वक्षपातसमनन्तरमेव सत्त्व-
व्याप्यप्रकारकमवग्रहज्ञानमिष्टम् ॥१४॥
यच्चेन्द्रियस्य विषयेण समं नयज्ञै-
स्संयोजनं मतमवग्रहभेदरूपम् ॥
तद्व्यञ्जनं न मनसो नयनस्य चास्ति
योगस्तयोर्न्नहि मतो विषयेण यस्मात् ॥१५॥
यस्स्यादवग्रहधियाऽवगतो विशेष
ईहाख्यबोध इह तस्य विशेषधर्म्मैः ॥
सम्भावनात्मकतया स च संशयात् स्याद्-
भिन्नस्त्ववग्रहभवान्नियमेन पश्चात् ॥१६॥
ईहाग्रहावगतवस्तुविनिर्णयात्मा
बोधस्त्ववाय इति जैनमतप्रसिद्धः ॥
तिष्ठन्स एव समयं ननु कश्चिदत्र
स्याद्धारणा स्मृतिपटुर्न्निजशक्तियोगात् ॥१७॥

एवं क्रमोत्थनिजकर्मलयोपशान्ते-
स्तेषां क्रमो भवति किञ्च तथोपलब्धेः ॥
स्यात्पूर्वपूर्वमथवोत्तरबुद्धिहेतु-
र्नो सांख्यवत्तु करणक्रमतः क्रमोऽत्र ॥१८॥

तस्मात् स्थितं सदवगाहिमतिस्तु पूर्वं
तस्मान्मनुष्य इति वृक्ष इति प्रकारा ॥
प्रायो ह्यनेन मिथिलास्थजनेन भाव्यं
सैवायमित्यवगतिक्रम आर्हतानाम् ॥१९॥

यत्रापि न क्रमतयाऽवगतिर्जिनाना-
मभ्यासगोचरपदार्थप्रकाशकेषु ॥
बोधेषु तत्र शतपत्रविभेदवत्स्या-
च्छीघ्रोद्भवत्वबलतोऽनुपलक्षणन्तु ॥१०२०॥

मानं परोक्षमथ पञ्चप्रकारमिष्ट-
मस्पष्टता भवति लक्षणमस्य युक्तम् ॥
संस्कारजन्यमनुभूतचरन्तदित्या-
कारं मतं स्मरणमत्र प्रमाणमाद्यम् ॥२१॥

ज्ञातार्थभासकतया यदि मानताऽस्य
नेष्टाऽनुमापि तत एव तदा न मानम् ॥
व्याप्तिग्रहो निखिलदेशगसाध्यहेतु-
ग्राही यतः प्रथमतो नियमेन तस्याः ॥२२॥

तन्न्यूनगोचरतया यदि मानताऽस्या-
स्तद्वत्स्मृतेरपि भवेन्नहि मानता किम् ॥

यस्मान्न चानुभवगोचरमात्रभास-
स्तस्यां समस्ति परमर्थविशेषभानम् ॥२३॥
यद्वत्प्रमात्वमनुमानमतो स्वतन्त्रं
तद्वत्स्मृतेरपि न चात्र विशेषलेशः ॥
किञ्च स्मृतिर्यदि प्रमा न भवेत्तदा नो
व्याप्तिस्मृतेरप्रमितेरनुमा प्रमा ते ॥२४॥
धारावगाहिप्रमितौ न यतोऽस्ति वृत्ति-
रज्ञातगोचरमतिरेवम लक्षणन्तत् ॥
मीमांसकाभिमतमस्य परन्तु पूर्व-
संदर्शिताद्भवति लक्षणतः प्रमात्वम् ॥२५॥
भूयः स्मृतेर्भवति किञ्च गुरौ च देवे
भक्तिर्दृढा भवति मित्रगणेषु मैत्र्यम् ॥
स्नेहस्सुतादिषु महानधिकस्तु शत्रौ
द्वेषोऽनुभूतिमतितोऽस्य फलं विविक्तम् ॥२६॥
ज्ञानं भवेदनुभवस्मृतिहेतुकं सा-
मान्यादिगोचरकसङ्कलनास्वरूपम् ॥
यत्रोपमादिघटनाऽप्यथ प्रत्यभिज्ञा
नन्तत्प्रमाणमपरं जिनतन्त्रसिद्धम् ॥२७॥
सादृश्यबुद्धिरिह जैमिनितन्त्रसिद्धा-
शक्तिप्रमाऽक्षचरणानुमतोपमा या ॥
सान्तर्गताऽत्र न भवेदधिकं प्रमाणं
तेनोपमानमिति जैनमतप्रसिद्धिः ॥२८॥

तस्मादयं विसदृशो गवयस्य शक्यो
नायं स एव स च दीर्घतरस्तथास्मात् ॥
ह्रस्वो लघुर्गुरुरयं स च तस्य पुत्र-
इत्यादिका भवति सङ्कलनैव बुद्धिः ॥२९॥

न ज्ञानलक्षणमतोऽभिमतो जिनानां
संसर्ग इन्द्रियगणस्य तु गौतमोक्तम् ॥
ज्ञानं यतस्सुरभिचन्दनमित्यभिज्ञा-
रूपं परोक्षमिह न त्वपरोक्षरूपम् ॥ १०३० ॥

वेदान्तिभिस्सुरभिचन्दनबोध इष्टोऽ-
वच्छेदवृत्तिवशतो द्विविधस्वरूपः ॥
प्रत्यक्षता भवति चन्दनवृत्तियोगात्
सौरभ्यवृत्तिघटनाच्च परोक्षतापि ॥३१॥

सौरभ्यवृत्तिरपि तैः स्मरणस्वरूपाऽ-
भ्यस्तस्थलेऽभ्युपगताऽनुमितिः क्वचित्तु ॥
चैतन्यमेकमथ तद्द्वययोगशालि-
ज्ञानं प्रमेत्यभिमतं तदवश्यमेव ॥३२॥

पूर्वक्रमेण तदभाववगत्य लोकः
पश्चाद्विशिष्टमवगच्छति धीविशेषात् ॥
यस्मात्ततो भवति तद्व्यतिरिक्तमेव
ज्ञानं परोक्षमथ तद्द्वयतस्तु जन्यम् ॥ ३३ ॥

सामान्यधर्म्मविरहात् स्थिरवस्त्वभावा-
न्नेदं प्रमाणमिति बुद्धसुता वदन्ति ॥

सामान्यसिद्धिबलतः स्थिरसाधनाच्चा-
भिज्ञा प्रमाणमिति जैनकुलोद्भवास्तु ॥३४॥
किञ्चैकताभ्रमनिमित्तमवश्यमेभि-
स्साहश्यमभ्युपगतं क्षणिकेषु तत्र ॥
साहश्यमस्ति यदि तर्हि प्रमाणमेवा-
भिज्ञा भवेत् सहशवस्त्ववगाहिनी यत् ॥३५॥
साहश्यमेषु यदि नैव विलक्षणेषु
भावेषु तेऽभिमतमस्ति तदाऽप्यभिज्ञा ॥
मानं विलक्षणतयाऽणुसमूहमेव
यस्मात्प्रकाशयति तेऽपि मते बुधाग्र्य ॥३६॥
नो वै विलक्षणतयाऽप्यणवो मतास्ते
ते सम्मताः प्रचयमात्रतयैव विद्वन् ॥
मानन्तथापि प्रचयाल्पमहत्त्वभासा-
भिज्ञा कथन्न तव सङ्कलनास्वरूपा ॥३७॥
नीलादिरूपमणुमात्रमथाभिधत्से
तद्रूपताप्यणुगतोपगता किमर्थम् ॥
वैचित्र्यतो मतिगताद्यदि वा मता सा
पूर्वोक्तधर्म्मघटनाऽपि न किन्तथैव ॥३८॥
स्याद्वासनैव सहशादिधियोऽनुकूला
नीलादिबुद्धिरपि किन्न तथैव ते स्यात् ॥
चित्रा तु सा विषयमन्तरतो मता चेत्
सर्वाऽपि धर्म्मघटना तव तर्हि मान्या ॥३९॥

केशादिवस्तुविषया यदि न प्रमाणं
नैतावता भ्रममतिस्सकलाऽप्यभिज्ञा ॥
अध्यक्षमेकमनृतं द्विशुधांशुभासं
दृष्टं समग्रमपि तन्न तथैव सिद्धम् ॥१०४०॥

यद्दृष्टदृष्टिजनितं नियमस्य साध्य-
हेत्वोस्त्रिकालगतयोरवगाहि तत्स्यात् ॥
तर्कप्रमाणमिदमत्र न तम्विना स्या-
दित्यादिरूपमनुमाप्रमितौ समर्थम् ॥४१॥

शब्दार्थयोरपि भवेदत एव मानात्
सामस्त्यतोऽवगत आर्हतसम्प्रदाये ॥
संसर्ग आप्तवचनोद्भवबोधहेतु-
स्स्यात्कार्यताद्यवगमोऽप्यत एव मानात्॥४२॥

सामान्यलक्षणमलौकिकसन्निकर्षं
नैवामनन्ति चरितार्थमनेन जैनाः ॥
बौद्धाः कुतर्करसिका हतबुद्धयस्तु
नेच्छन्ति तर्कमिह मानतया प्रसिद्धम् ॥४३॥

तेषां मते घटपटाद्यपि नैव सिद्ध्ये-
न्मानं विना नहि प्रमेयगतिः प्रसिद्धा ॥
संवादलिङ्गजनितानुमितिं विना नोऽ-
ध्यक्षोऽपि सिद्ध्यति प्रमाणतयाऽत्र बोधः ॥४४॥

नैवानुमा नियतलिङ्गमतिं विना स्यात्
तर्कं विना न नियमग्रह एव कोऽपि ॥

अध्यक्षबोध इह तद्विषयो न यस्मान्-
नैवानवस्थितिभयादनुमाऽपि तत्र ॥१०४५॥

शून्यत्वपक्षमपि माध्यमिकप्रदिष्टं-
मानं विना न च तथैति प्रसिद्धिमार्गम् ॥
सामान्यगोचरतया यदि मानता नो,
किन्नानुमानमपि तर्हि निरस्तमेभिः ॥४६॥
या चात्र दोषघटना ननु तैरभीष्टा
सर्वाऽपि साऽनुमितिबोधगताऽपि तेषाम्, ॥
तद्दोषखण्डनप्रकारगतेस्तु तत्रा-
दिष्टोहगापि सकला परिभावनीया ॥४७॥
स्याल्लिङ्गबुद्धिनियमस्मृतितोऽनुमानं
साध्यावभासकमिदं द्विविधं च तत्र ॥
स्वार्थं स्वतो भवति यद्वचनं परार्थं
लिङ्गादिकस्य तु भवेदुपचारतस्तत् ॥४८॥
लिङ्गस्य लक्षणमिहानुपपत्तिरेव
साध्यं विना न तु पराभिमतं त्रिकादि ॥
यस्मात्त्रिलक्षणयुतोऽपि भवेन्न हेतु-
स्तामन्तरेण गमकस्तु गतानुगानाम् ॥४९॥
साध्यन्त्वबाधितमभीप्सितमप्रतीत-
मिष्टं न चान्यदिह लक्षणमस्य युक्तम् ॥
धूमादिना भवति यत्र तु वह्निसिद्धि-
र्धर्म्मी स एव ननु पक्षपदाभिलप्यः ॥१०५०॥

नो गौतमानुमतमत्र मतं च साध्य-
व्याप्यस्य पक्षघटनामननं तृतीयम् ॥
हेतुत्वतो भवति किन्तु विनापि तेन
द्वाभ्यां प्रदर्शितदिशाऽनुमितेर्हि जन्म ॥५१॥
धर्म्मिप्रसिद्धिरिह जैनमतानुगानां
मानाद्यथा खलु विकल्पमतेस्तथैव ॥
धर्म्म्यप्रसिद्धिरत एव जिनागमज्ञै-
र्दोषत्वतो नहि मता परतन्त्रसिद्धा ॥५२॥
ये न्यायशब्दत इहाभिमता प्रतिज्ञा-
हेत्वादयस्त्ववयवाः परबुद्धिहेतुः ॥
उद्भावनं जिनमते प्रथितश्च तेषां
सामस्त्यतः क्वचिदिह क्वचिदन्यथापि ॥५३॥
विज्ञः परो यदि तदा ननु हेतुरेव
वाच्यो यतोऽनुमितिरस्य तु तावतैव ॥
व्याप्तिस्मृतेर्ज्जडमतिस्तु परो यदि स्यात्
सर्वेऽपि तर्ह्यवयवाः प्रतिपादनीयाः ॥५४॥
एतेन बुद्धकपिलादिसुतोपगीत-
मेकान्ततोऽत्र नियतावयवात्मकस्य ॥
न्यायस्य वाद उपदर्शनमस्तमेषु
न्यूनादिनिग्रहभवोऽपि महाननर्थः ॥५५॥
गौणं परार्थमनुमानमवैति विद्वाँ-
ल्लिङ्गादिकावयवकीर्त्तनमत्र तद्वत् ॥

स्वाध्यक्षगोचरपदार्थमतिप्रवीणं
प्रत्यक्षमप्यथ परार्थमवैति वाक्यम् ॥५६॥
पश्योदयाचलगतं रविबिम्बमङ्ग
पश्यास्तपर्वतगतं शशिबिम्बमेवम् ॥
वाक्यं परार्थमुदितं जिनतन्त्रविज्ञा
अध्यक्षमेव गुणतः समुदाहरन्ति ॥५७॥
पूर्वन्निजस्मृतिपथं समुपागतेऽथ,
मेये परस्मृतिकृते वचनं परार्थम् ॥
उक्तं बुधैः स्मरणमेव तु गौणवृत्त्या
मानान्तरेष्वपि च तत्स्वयमूहनीयम् ॥५८॥
वस्त्वागमे सदसदंशतया जिनानां
सिद्धं द्विरूपमनुमाजनकश्च तस्य ॥
लिङ्गं द्विधा विधिनिषेधप्रथाप्रवीण-
मुक्तं बुधैस्तदुपलम्भतदन्यभेदात् ॥५९॥
तत्रासदंशवचनेन च तार्किकाणां
भावातिरिक्तविषये विरहादिवाणी ॥
एकान्तवादपरिनिष्ठितबुद्धिभाजां
क्षिप्ता नृशृङ्गवचनादिसहोदराऽभूत् ॥१०६०॥
इष्टश्चतुर्विधतया स जिनानुगानां
यः कार्यपूर्वसमये स च प्रागभावः ॥
मृत्पिण्डमेव कलसात्प्रथमश्च तत्र
तिष्ठत्तदात्मकतयाऽभिमतन्न चान्यत् ॥६१॥

यन्नाशतो भवति यस्य जनिस्स
एव सामान्यतो नियमतस्स च प्रागभावः ॥
यस्मान्मतः क इह पिण्डविभिन्नरूपो
दृष्टो मृदो भवतु गौतमसम्मतो यः ॥६२॥
यज्जन्मतो भवति यस्य निवृत्तिरेव
ध्वंसस्स एव ननु तस्य मतो जिनानाम् ॥
ध्वंसो घटस्य च कपालकदम्बरूपा-
दन्यस्ततोऽक्षचरणानुमतो न युक्तः ॥६३॥
रूपान्तराद् भवति यस्तु विलक्षणस्स
आत्मा निजस्य कथितो ननु भेदनामा ॥
नाधारतः परमयं पृथगेव युक्तो यो
गौतमैरभिहितोऽनुपलभ्यमानः ॥६४॥
कालत्रयेऽपि च जडे ननु चेतनाया
याऽयोग्यता चिति जडस्य च तत्स्वरूपा ॥
तादात्म्यतापरिणतेर्विनिवृत्तिरत्य-
न्ताभाव इष्ट इह नाश्रयतोऽतिरिक्तः ॥६५॥
संयोगिनो भवति यो विरहोऽथ यस्य
नात्यन्तिकस्स तु भवेदिह तस्य किन्तु ॥
संयुक्ततापरिणतेः खलु नाशप्राग-
भावादिकस्स प्रथमोत्तरकालिकायाः ॥६६॥
संयोग एव नहि कस्य कदापि यत्र
स्यात्तत्र तस्य विरहो ननु दर्शितोऽपि ॥

संयोगसङ्घटितमर्त्तिरयं परन्तु
प्राप्तेस्तु वा भवति सोऽस्खलितप्रचारः ॥६७॥
किं वा घटादिप्रतियोगिकता जलाद्या-
धारानुयोगिकतया सहिता यतो नो ॥
प्राप्तौ ततस्तदुभयोर्विरहस्त्वभाव-
स्तत्तत्प्रतीतिविषयोऽस्त्विह नव्यनीत्या ॥६८॥
बोधानतिक्रमणतो विरहस्तु सोऽपि
ज्ञेयो बुधैरपरथा न च वस्तुसिद्धिः ॥
स्याद्वादिनः सकलमेव हि वस्त्वनेक-
रूपं ततोऽत्र कथमैकिकवादयोगः ॥१०७०॥
हेतुर्बुधैर्य उपलब्धितया प्रदिष्टो
द्वैविध्यमस्य गदितं प्रथमोऽविरुद्धः ॥
षोढा विधौ जनकजन्यनियम्यपूर्व-
पश्चात्स्वकालचरमुख्यप्रभेदतोऽलम ॥ ७१ ॥
एतेन सौगतमतं विधिसाधकन्तु
कार्यस्वभावभजनाद्द्विविधं निरस्तम ॥
यस्मादिह प्रथमदर्शितलक्षणस्य
सद्भावतोऽन्यदपि लिङ्गतयैव भाति ॥७२॥
तत्रान्यकारणसमग्रसमन्वितस्सन्
हेतुर्न्न कार्यजननेऽनियतोऽत्र यस्मात् ॥
तत्कारणं भवति कार्यमतिप्रवीणं
बौद्धैर्न्न किं तदपि दर्शितमस्ति शास्त्रे ॥७२॥

रात्रौ रसादनुमितिर्न्ननु तैर्निरुक्ता
रूपस्य सा भवति हेत्वनुमाप्रणाल्या ॥
यस्मात्तयोस्समसमहसमन्वयेन
तैरेव तुल्यजनकोद्भवता मता च ॥७३॥
धूमाद्धुताशनमतिस्त्विह कार्यलिङ्गाद्
व्याप्यात्तथा भवति सत्त्वमतिर्गुणादेः ॥
छायादितोवगतिरेवमनोकहादे-
र्नो तुल्यकालगतयोरिह कार्यतादिः ॥७४॥
या कृत्तिकोदयबलाच्छकटानुमाऽस्ति
पूर्वाच्च सा सहचरान्न च बौद्धहेतोः ॥
या चानुमा शकटतो ननु कृत्तिकाया-
स्साऽप्युत्तरात् सहचरान्न तु कार्यलिङ्गात् ॥७५
या निश्चितात्सहचरादनुमा रसादे·
रूपान्न सा सुगतनिश्चितहेतुमात्रात् ॥
तस्माद्विधिप्रवण उक्तदिशा निरुक्तः
सर्वोऽविरुद्ध इह नो ऽयमेव बौद्ध ॥७६॥
अन्त्यो विरुद्ध इह सप्तप्रकारकोऽस्ति
तैस्स्यान्निषेधविषयाऽनुमितिस्ततश्च ॥
बौद्धैस्स्वभावविषयानुपलब्धिमात्रा-
द्या सम्मताऽनुमितिरत्र न सैव मान्या ॥७७॥
साक्षाद्विरुद्ध इह चाद्यप्रकार इष्ट-
स्स्याद्वाद आर्हतमतो ननु दुर्नयानाम् ॥

एकान्तवादनिकरप्रतिषेधबोधो
यस्मात्ततो भवति तत्त्वप्रबोधहेतुः ॥१०७८॥
अन्ये विरुद्धजनकादिविभेदतस्स्युः
पूर्वप्रदर्शितदिशा षडिति प्रधार्यम् ॥
हेतुस्तथार्हतमतेऽनुपलब्धिरूपो
द्वैविध्यवान् विधिनिषेधमतिप्रवीणः ॥७९॥
तत्राविरुद्धविषयानुपलब्धिहेतु-
स्स्याद्यस्य तस्य स निषेधमतौ समर्थः ॥
अन्यो विरुद्धविषयानुपलब्धिरूपो
हेतुर्विधायकतयाऽभिमतो जिनानाम् ॥१०८०॥
ज्ञेयस्स्वभावसहकालिकपूर्वकाल-
पाश्चात्यकार्यजनकाधिकवृत्त्यभावैः ॥
आद्यो निषेध्यविषयस्य तु सप्तभेदो
हेतुर्निषेधगमको मत आर्हतेऽस्मिन् ॥८१॥
इष्टस्स्वभावसहकालिकहेतुकार्य-
न्यूनाश्रयापगमभेदत आर्हतानाम् ॥
अन्यो विरुद्धविषयस्य तु पञ्चभेदो
विध्यङ्गतापरिगतोऽनुपलब्धिहेतुः ॥८२॥
दृष्टान्ततस्स्वयमिहाकलयन्तु विज्ञाः
भेदान् विशेषविषयान्ननु किञ्च वादे ॥
बौद्धान्स्वभावनियतानुपलब्धिहेतु-
प्रोक्तृञ्जयन्तु भजनानियतप्रकारैः ॥८३॥

स्यादाप्तवाक्यजनितोऽन्वयबोधनामा
 व्याप्त्यादिबोधविरहेऽपि च जायमानः ॥
मानान्तरत्वनियतोऽननुमादिधीत्वात्
 वैशेषिकाविहत आगम आर्हतानाम् ॥८४॥

शब्दे तु मानवचनं नहि मुख्यवृत्त्या
 किन्तूपचारबलतो जनताप्रसिद्धम् ॥
यस्मादनिन्द्यमुपयोगगतं प्रमाण-
 त्वन्नान्यनिष्ठमिति जैनमतप्रसिद्धम् ॥८५॥

वाच्यं यथास्थितमबाधितमेव बुद्ध्वा
 ज्ञानानुसारिवचनं य इहाभिधत्त ॥
आप्तस्स एव वचनञ्च तदुक्तमेवा-
 संवादिताविरहतो भवति प्रमाणम् ॥८६॥

आप्तो द्विधा भवति लौकिकतद्विभिन्न-
 भेदादलौकिक इहाभिमतो जिनादिः ॥
पित्रादिको भवति लौकिक आप्तवाक्यो-
 क्त्या नित्यशब्दमतखण्डनमिष्टमत्र ॥८७॥

तत्खण्डनं प्रथममेव तु मानसामा-
 न्यस्याभिधानसमये कृतमत्र युक्त्या ॥
जन्योऽपि वर्ण इह पौद्गलिको जिनाना-
 मिष्टो न गौतमसुताभिमतो गुणात्मा ॥८८॥

निःस्पर्शतानिविडदेशप्रवेशितादेः,
 पूर्वोत्तरावयवदर्शनशून्यतातः ॥

चेत्सूक्ष्ममूर्त्तचलनाननुकूलतातः
शब्दो न पौद्गलिक इत्यतिमन्दमेव ॥८९॥

आद्ये ह्यसिद्धिघटनामल एव हेतौ
वाग्वर्गणाऽधिकरणं न तु खं च कादेः ॥
स्पर्शाश्रयाश्रिततया तदभावरूपो
निःस्पर्शतापदमतो न च हेतुरत्र॥१०९०॥

स्पर्शाश्रयत्वमनुमामतितः प्रसिद्धं
शब्दाश्रयेऽनुपवनप्रतिकूलवातैः ॥
दूरस्थसन्निहितदेह्युपलम्भभावा-
भावाश्रयाश्रयतया तु मृगाण्डवद्वः ॥९१॥

अर्हद्वचःप्रमितमेव जिनानुगानां
स्पर्शाश्रयत्वमिह नानुमया प्रसाध्यम् ॥
आप्तागमे स्फुरति को जडबुद्धिभिन्नो
मानान्तराश्रयणतत्पर ईक्षितो ज्ञैः ॥९२॥

हेतुर्द्वितीय इह नाव्यभिचारिरूपो
गन्धाश्रयेण ननु यद्व्यभिचारिताऽस्य ॥
सौदामिनीप्रभृतिभिश्च तथा तृतीयो
धूमेन तुर्य्य इह किन्न तथैव दृष्टः ॥ ९३ ॥

शब्दे भवेत् खगुणता यदि तर्हि तेन
स्यात्तस्य पौद्गलिकताविरहप्रसिद्धिः ॥
रूपादिवन्न खगुणो बहिरिन्द्रियेण
ग्राह्यत्वतो भवति चर्म्मदृशां तु शब्दः ॥९४॥

रूपादिवद् भवति पौद्गलिकस्तु शब्दो
बाह्येन्द्रियग्रहणता न तमन्तरेण ॥
आकाशसिद्धिरवगाहनहेतुभावा-
ज्जैनागमे न तु तदाश्रिततादिसिद्ध्या ॥९५॥
स्वाभाविकार्थगमिका ननु शक्तिरर्थे
शब्दस्य सा समयतोऽवगताऽत्र हेतुः ॥
शङ्केतमात्रबलतोऽर्थप्रकाशको न
शब्दो नवार्थरहितस्तुगतप्रसिद्ध्या ॥१०९६॥
इच्छैव तार्किकमता समयाभिधाना
नेशस्य सा त्विह हि जैमिनिसंश्रितानाम् ॥
शब्दात्तथा सति भवेन्नहि शाब्दबोधः
किन्त्वस्मदादिसदृशस्य भवेत्तथा च ॥९७॥
शब्दोऽर्थबोधकतया पुरुषेण यद्व-
च्छङ्कितितस्तदिव तद्गमकत्वतश्चेत् ॥
शङ्कितितोऽर्थ इह तर्हि विपर्ययेण
स्याद् वाच्यवाचकघटा न तयोर्म्मता किम् ॥९८
नास्मन्मते भवति पर्य्यनुयोगयोग-
श्शक्त्या व्यवस्थितिघटाप्रसरोऽस्ति यस्मात् ॥
शब्दार्थहेतुबलतो जननश्च तस्या-
श्शक्तिद्वयात्मकतया न विरोधमेति ॥९९॥
प्रत्येकशोऽपि पटकुम्भमठादिशब्दा-
श्शक्ता घटादिषु पदार्थकदम्बकेषु ॥

स्वव्यञ्जकैस्तु समयैर्नियतार्थनिष्ठै-
स्स्युस्तेऽपि तन्नियतबोधविधानदक्षाः ॥ ११०० ॥
एतेन शक्तिरिह वास्तविकी घटादि-
शब्दस्य ते यदि घटादिषु तर्हि न स्यात् ॥
एकस्य भिन्नसमयेन विभिन्नदेश-
माश्रित्य भिन्नविषयत्वमिति प्रभग्नम् ॥१०१॥
सामान्यमात्रमथ जैनमते न शक्यं
नो वा विशेष उभयात्मकमेव वस्तु ॥
स्याद्वादतश्च शबलात्मकमेकतादे-
र्नो तत्र दोषघटना सुगतानुगानाम् ॥१०२॥
शब्दा विकल्पजनने निपुणा न चात्र
वस्तुस्वलक्षणमपि प्रभवोऽभिधातुम् ॥
दृश्यं स्वलक्षणमतो न विकल्पभास्यं
शक्तिग्रहोऽपि न च तत्र भवेद्विकल्पात् ॥१०३॥
किञ्चानुगाम्यपि न तत्तत एव तत्र
सङ्केतसंस्करणमप्यफलं प्रतीमः ॥
एवं क्षणैकनियते ग्रहसव्यपेक्षो
दुश्शक्य एव समयः स्थिरपक्षबाधात् ॥१०४॥
सामान्यमेकमपि न प्रमितं विकल्प-
ग्रासान्न वृत्तिरपि तस्य भवेत् क्वचित्तु ॥
अर्थक्रियापि मतितो न भवेद्विभिन्ना
किञ्चास्य तेन समयः फलवान्न चात्र ॥१०५॥

प्रत्येकपक्षपरिदर्शितदोषजालो
  यस्माद् भवेदुभयपक्षगतस्ततो न ॥
स्यात्तद्द्वयं च निरुपद्रवमत्र वाच्यं
  नो वाचकं भवति वस्तु तथैव नीत्या ॥१०६॥
शब्दार्थयोर्भवति कोऽपि न तात्त्विकस्सं-
  सर्गो यतो भवतु तेन मतिश्च तस्य ॥
इष्टस्स चेद् भवति तर्हि स अन्यभाव-
  स्तादात्म्यरूप उत वा नहि तात्त्विकोऽन्यः १०७
अन्त्येऽर्थरूप इह ते यदि शब्द इष्टः
  कण्ठादितो नहि तदास्य भवेत्प्रवृत्तिः ॥
किञ्चार्थपूरितमिदं भुवनत्रयं स्या-
  च्छब्दप्रपूरितमहर्निशमेव तस्मिन् ॥१०८॥
प्रत्यक्षबाध इह दुर्धर एव दोषो
  दण्डादितो घट इवात्र न तस्य शब्दः ॥
नो चक्षुषा घटविलोकनकाल एव
  तद्वाचकं च ननु पश्यति कोऽपि जन्तुः ॥१०९॥
शब्दात्मकोऽपि न भवेदत एव चार्थो
  वैरूप्यदर्शनभयो ह्युभयत्र तुल्यः ॥
किञ्चाग्निदुग्धतुरगादिपदप्रवृत्तौ
  दाहादिकं मुखगतं तदभेदतस्स्यात् ॥११०॥
दोषादतो भवति नैव च शब्दतोऽर्थो
  नार्थाच्च शब्दघटना तत एव दोषात् ॥

आद्योऽपि पक्ष इह तेन भवेद्व्युदस्त-
श्शब्दार्थयोर्जननमन्यत एव यस्मात् ॥१११॥
अर्थोद्भवो यदि तु शब्दत आदृतस्स्या-
द्दारिद्र्यशून्यमखिलं जगदेव तर्हि ॥
शब्दस्य चार्थबलतो यदि जन्म मान्यं
कादम्बरीप्रभृतिकाव्यभवो न तर्हि ॥११२॥
तस्मादपोहविषयैव च शब्दतो धी-
रर्थक्षयाद् भवति नैव प्रमाणमेषा ॥
नापोह इष्ट इह बाह्यपदार्थरूप-
स्स्यात्कल्पनात्मकतया प्रतिबिम्बनात्मा ॥११३॥
शब्दस्य तेन सह कारणभाव एव
संसर्ग इष्ट इह सौगतसम्प्रदाये ॥
जन्यत्वपर्यवसितैव तु वाच्यताऽत्र
हेतुत्वपर्यवसितं ननु वाचकत्वम् ॥११४॥
वाच्यत्ववद्भवति वाचकताऽप्यपोहे
शब्दे स्वलक्षणतया न च सोक्तनीत्या ॥
तादात्म्यविभ्रमवशादुभयोस्त्वपोहात्
स्याद्वाच्यवाचकतयाऽवगतिश्च लोके ॥११५॥
इत्यादिकं जिनमतेऽप्यनुकूलमेव
एकान्तवादमतखण्डनयुक्तिजालम् ॥
बौद्धप्रदर्शितमतो न च शाब्दबोधोऽ-
नेकान्ततत्त्वविषयेष्वपि नैव मानम् ॥११६॥

एकान्तवस्तुनि भवेद्यदि शक्तियोगो
नो तावता भवतु तस्य निराक्रियाऽत्र ॥
स्याद्वादभूषितपदार्थकदम्बकेषु
नो कश्चिदप्यनुपपन्नतयाऽस्ति भावः ॥११७॥
अर्थप्रकाशजनकत्वमनन्यलभ्यं
स्वाभाविकं भवति दीपवदस्य किन्तु ॥
याथार्थ्यतादिघटना गुणदोषजन्या
स्याच्च प्रणेतृपुरुषादिपरव्यपेक्षा ॥११८॥
एकान्तवादिवचनं तत एव सप्त-
भङ्गात्मकत्वविरहान्न यथार्थरूपम् ॥
स्याद्वादलाञ्छितपदार्थमतिप्रवीणा
मोनात्मना परिणता त्विह सप्तभङ्गी ॥११९॥
सा प्रश्नतो विधिनिषेधनयोर्विवेक-
सामस्त्यतो विविधकल्पनयाऽविरोधात् ॥
स्यात्कारलाञ्छितवचोघटनाऽत्र यस्मात्
स्यात्सप्तधैकविषये प्रतिधर्ममेव ॥१२०॥
वाक्येऽवधारणमनुक्तमपीष्यते ज्ञै-
रस्यादन्यथाऽनभिमतार्थनिवारणं नो ॥
तत्त्वे निरर्थकतया जलताडनादि-
तुल्यं बुधः क इह तन्तु वदेत्परार्थम् ॥१२१॥
कुम्भोऽस्ति नास्त्युत किमित्यपरेण पृष्टो
वाऽप्यस्ति नाऽस्त्युभयमेव वदन् प्रमाता ॥

स्याद्वादतो भवति सप्तनयावलम्बी
नैकान्ततो भवति नीतिपथावलम्बी ॥१२२॥
स्यादस्ति कुम्भ इति यः प्रथमोऽत्र भङ्ग-
स्स्वद्रव्यभावसमयाश्रययोगतस्सः ॥
स्यान्नास्ति कुम्भ इति योऽभिमतो द्वितीयो-
ऽन्यद्रव्यभावसमयाश्रयसंश्रयात्सः ॥१२३॥
स्यादस्ति नास्ति च घटोऽभिमतस्तृतीयो
भङ्गः क्रमादुभययोगनिरूपकाभ्याम ॥
तद्धर्म्मयोर्विधिनिषेधनयोर्विवक्षा-
वैचित्र्यतोऽत्र परप्रश्नवशाच्च युक्तः ॥१२४॥
यत्रोभयोर्युगपदेव भवेद् विवक्षा-
ऽवक्तव्य एव घटइत्यपरानुयोगात् ॥
भङ्गश्चतुर्थ उभयोश्च निरूपकाभ्यां
स्यात्कारलाञ्छिततनुर्ननु तत्र बोध्यः ॥१२५॥
भङ्गत्रयेण सह प्रश्नविशेषतस्तु
तुर्यस्य सङ्घटनतोऽत्र भवन्ति भङ्गाः ॥
अन्त्ये त्रयो निजनिरूपकभेदयोगैः
प्रत्येकशो जिनसुताभिमता विविक्ताः ॥१२६॥
तुर्यस्य चाद्यघटनान्ननु पञ्चमस्स्यात्
षष्ठो द्वितीयघटनान्मतो जिनानाम्
भङ्गो मतस्त्विह तृतीयविमिश्रणेन
जैस्सप्तमो न च ततोऽप्यधिकोऽस्ति भङ्गः १२७

यस्माद् द्वितीयघटनात् प्रथमस्य सिद्धो
भङ्गस्तृतीय इति तेन भवेन्न भिन्नः ॥
अन्यस्य सङ्घटनतः पुनरुक्तता स्यात्
सिद्धोऽथवा भवति भङ्ग इतीष्यते नो ॥१२८॥
स्यादव्ययं पदमतो यदि नोक्तिरस्या-
नेकान्ततावगमकस्य तदोक्तभङ्गाः ॥
सत्त्वादिकं घटपटादिगतं यथा स्वै-
र्द्रव्यादिभिः परगतैश्च तथा वदेयुः १२९॥
कुम्भादिकस्य निजरूपहतिश्च तत्त्वे
सर्वात्मता भवतु वा न ततो व्यवस्था ॥
स्याच्छब्दसंघटनतस्तु कथञ्चिदेव
सत्त्वादिकावगमका न तु सर्वथा ते ॥१३०॥
यत्सत्त्वमत्र निजधर्म्मवशात्तदेवा-
सत्त्वं परैरिति भवेत्प्रथमान्न भिन्नः ॥
भङ्गो द्वितीय इति तन्नियता न चान्ये
भङ्गा इहेति सुगतानुगताः पठन्ति ॥१३१॥
तेषां कथन्निजमतक्षतितो न भीती-
रूपत्रयं भवति लिङ्गगतन्न यस्मात् ॥
तत्रापि साध्यवति यद्गमकस्य सत्त्वं
तत्स्याद्विपक्षगणतो नियमादसत्त्वम् ॥१३२॥
किञ्चैकता यदि तु भावनिषेधयोस्स्या-
न्न स्यात् प्रवृत्तिरिह नैव निवर्त्तनन्तत् ॥

भावो यतो न च निषेधविभिन्नरूपो
नो वा निषेध इह भावविभिन्नरूपः ॥१३३॥
कुम्भोऽयमित्यवगतेस्तु प्रवृत्तिरिष्टा
सत्त्वे तु सा भवितुमर्हति न त्वसत्त्वे ॥
कुम्भो न चायमिति बुद्धिबलान्निवृत्ति-
रेकान्तसत्त्वमनने न भवेच्च तद्वत् ॥१३४॥
अव्याप्यवृत्तिविषयोपगमे तु युक्ताऽ-
वच्छेदकस्य नियतस्य सदादिभावे ॥
संयोजना विधिनिषेधनयोर्विरोध-
रक्षार्थमत्र न तु तद्विपरीतपक्षे ॥११३५॥
सत्त्वन्तथा च सुगतादिमते घटादे-
रेकान्ततस्सकलधर्म्मबलात्प्रसक्तम् ॥
किं वाह्यसत्त्वमनयोर्न्नहि पक्षयोस्तु
वृत्तिर्न्निवृत्तिरुत वा विषयापहारात् ॥ १३६ ॥
नन्वस्तिता यदि तु तार्किकगोत्रसिद्धा
सत्तात्मिका तव मता परजातिरत्र ॥
सा व्याप्यवृत्तिकतयैव कथं करोत्व-
वच्छेदकस्य नियतस्य तदा व्यपेक्षाम् ॥१३७॥
स्वस्मिन्न सा न च तथाऽन्यसमानभावे-
ष्वस्तित्वबुद्धिरपि तत्र कथं घटेत ॥
उत्पत्त्यवस्थितिलयत्रितयस्वरूप-
मस्तित्वमिष्टमथ चेत्स्वमतावलम्बात् ॥१३८॥

नो तर्हि युज्यत इदं त्रितयं घटत्वा-
द्येकैकधर्म्मबलतो न मतं यतस्ते ॥
यस्मात्त्रयोऽपि मिथ एव विरोधशीला
एकत्र धर्म्मिणि विना न विभिन्नधर्म्मैः ॥१३९॥

वृत्तित्वमिष्टमथ कालनिरूपितन्तेऽ-
स्तित्वं तदा स यदि तार्किकगोत्रमान्यः ॥
सिद्धान्तभङ्ग इह तर्हि महाननर्थो
दोषः पतेत्त्वयि भवेच्च न कालगन्तत् ॥१४०॥

स्याद्वर्त्तनात्मकतया निजतन्त्रसिद्धः
कालस्तथापि न च स व्यतिरिक्तरूपः ॥
किन्त्विष्यते नवपुराणतयोपलभ्य-
मानो घटादिरिति ते न निजात्मनिष्ठाः ॥१४१॥

सा वृत्तिताऽधिकरणात्मकदेशतोऽथा-
भीष्टास्तिता तव बुधाग्रय निरूपिता या ॥
द्रव्येष्वनंशिषु तदा न च तस्य योगो
यस्मादनाश्रिततया प्रमितानि तानि ॥१४२॥

स्वक्षेत्रतोऽपि तव किञ्च घटादिभावे-
ष्वस्तित्वमिष्टमिह तन्न भवेच्च युक्तम् ॥
क्षेत्रं यतोऽधिकरणापरनामधेयं
स्वापेक्षमेव न भवेन्निजवृत्तितायाम् ॥१४३॥

अस्तित्ववान् घट इहाभिमतो घटत्वा-
द्यैस्तेऽक्षपादमतदर्शित एव मार्गः ॥

स्यात्कारशब्दबलतोऽपि न चाद्यभङ्गे
एकान्ततत्त्वमननादधिकं प्रविष्टम् ॥१४४॥
यश्च द्वितीय इह तेऽभिमतोऽस्ति भङ्गो
वेदान्तिदर्शनमतादधिको न सोऽपि ॥
वेदान्तिभिर्न्ननु पटादिसमानधर्म्मैः
कुम्भाश्रयत्वविरहो घटवत्त्यपीष्टः ॥१४५॥
भङ्गद्वये प्रतिहते न भवन्ति चान्ये
भङ्गा यतस्तदुभयाश्रयणात्प्रवृत्ताः ॥
इत्यादिकं जिनमतानवबोधलब्धं
ध्यान्ध्यं परे प्रकटयन्ति कुमार्गगत्या ॥१४६॥
पूर्वप्रदर्शितविकल्पभरैः किमिष्टं
सत्त्वादिकं घटगतं न प्रतीयते वा ॥
नाव्याप्यवृत्ति किमु वा न च दर्शितार्थ-
भिन्नस्वरूपमथवा तदवाच्यमेव ॥१४७॥
आद्यस्समस्तजनसिद्धप्रतीतिलोप-
भीत्यैव नो बुधवरैस्समुपासनीयः ॥
आदानहानविषयौ भवतो न यत्ना-
वेकान्ततत्त्वमनने न ततो द्वितीयः ॥१४८॥
बाधां विनैव न च सत्त्वमतिर्न्नयज्ञै-
र्भ्रान्तेति बोधविषयोऽभ्युपगन्तुमिष्टा ॥
तस्मादवश्यमवलम्ब्य यथार्थमर्थ-
मेषोद्गतेति सकलप्रतिपन्नमेतत् ॥१४९॥

उक्तेषु सत्त्वनिकरेषु यदास्ति दोष-
स्सत्त्वन्तदा भवतु किन्न च तैर्विभिन्नम् ॥
स्यादस्तिभङ्गविषयो न ततस्तृतीयः
पक्षोऽपि मान्य इह तत्त्वपरीक्षकाणाम् ॥११५०॥

पक्षश्चतुर्थ इह चेद्यदि बाध्यभीष्ट-
स्सामान्यतो भवति किन्तदवाच्यमत्र ॥
किं वा विशेषत इति प्रथमो न युक्त-
स्सत्त्वादिशब्द इह तत्प्रतिपादको यत् ॥१५१॥

अन्त्ये विशेषवचनाप्रतिपादनेऽपि
क्षीरादिगा मधुरतेव न तस्य लोपः
विध्यात्मता घटपटादिकवस्तुरूप-
मग्नाऽस्तिशब्दत इहाभिमता जिनानाम्॥१५२॥

वस्तूच्यते विधिनिषेधकरम्बितं तै-
रंशाविमौ तु भवतोऽस्य निजस्वरूपौ ॥
स्यात्कारयोजनबलादविरोधतस्तौ
भङ्गद्वयेन प्रथितौ भवतो नयज्ञैः ॥१५३॥

वस्त्वंशबोधकतयाऽभिमतास्तु भङ्गा
अन्येऽपि वस्त्ववगतिस्त्विह सप्तभङ्ग्या ॥
नो गौतमादिमततोऽप्यविशेषताऽत्र
वस्त्वंश एव ननु वस्तुतया मतस्तैः ॥१५४॥

आपेक्षिके यदि तु वस्तुगतेंऽशमात्रेऽ-
वच्छेदकत्वमपि तस्य तदा त्वपूर्वम् ॥

द्रव्यादिगं प्रमितितोऽवगतं तदेव
नो तार्किकादिभिरभीष्टमनन्यसिद्धम् ॥१५५॥
तैर्जात्यखण्डसमभावविभिन्नमात्रेऽ-
वच्छिन्नतानियममात्रबलाद् घटादौ ॥
सामान्यमभ्युपगतं ननु वृत्तिताद्य-
वच्छेदकं न तु जिनाभिमतं तदेव ॥१५६॥
अव्याप्यवृत्तिघटना ननु यादृशस्या-
वच्छेदकस्य मननादभिमन्यते तैः ॥
अस्तित्वधर्म्मभजनापि च तादृशेना-
वच्छेदकेन प्रमिता जिनसम्प्रदाये ॥१५७॥
तैः किन्तु देशसमयद्वयमात्रमेवा-
वच्छेदकं प्रथितमीदृशमार्हतैस्तु ॥
धर्मादयोऽप्यभिमता अनुभूतिसिद्धा
एतादृशा इति कथं मतयोर्न्न भेदः ॥१५८॥
वृत्तित्वरूपमपि तेन यदीष्यतेऽत्रा-
स्तित्वन्तदापि न च दोषगणप्रचारः ॥
तद्वृत्तिता भवति तेन निरूपिताप्य-
वच्छेद्यभावनियताऽनुमता परैस्तु ॥१५९॥
व्याप्तिस्वरूपमननावसरे हि सार्व-
भौमैः प्रदर्शितमिदं वचनान्तरेण ॥
तद्युक्तितो भवति देश इव स्वकाले
वृत्तित्वमस्तिपदवाच्यमदुष्टमेव ॥१६०॥

उत्पत्त्यवस्थितिलयात्मकतापि सत्ता
 स्यादस्तिता यदि तदापि न दोषपङ्कः ॥
एकक्षणे त्रितयमस्ति विभिन्नधर्म्मैः
 प्रत्येकशस्समुदयात्तु निरुक्तरूपैः ॥१६१॥
यद्वर्त्तनात्मकतया निजसंश्रयेण
 कालास्तिता नहि घटादिषु तन्न युक्तम् ॥
नो सर्वथा जिनमतेऽनुमतो ह्यभेदो
 भेदोऽपि किन्तु तत एव कथन्न सा स्यात् १६२
स्यादस्ति भङ्ग उपपद्यत एव तस्मा-
 द्वस्त्वंशबोधकतया प्रथमो जिनानाम् ॥
नैव द्वितीय इह वेदमतप्रवेशाद्
 भङ्गोऽप्यसिद्धिकवलायत आर्हतानाम् ॥१६३॥
यद्यप्यभावघटना प्रतियोग्यवृत्ति-
 धर्म्मेण तैरपि मता व्यवहारकाले ॥
मिथ्यात्वमप्यखिलगं तत एव तेषां
 सिद्धिं प्रयाति विरहय्य न तं यतस्तत् ॥१६४॥
स्वाधारनिष्ठविरहप्रतियोगितैव
 मिथ्यात्वमिष्टमखिलानुगतञ्च तेषाम् ॥
तत्पारमार्थिकतया विरहं घटादे-
 रादाय सिद्ध्यति सतो व्यवहारकाले ॥१६५॥
अद्वैतहानिभयतस्स च केवलात्मा-
 ऽऽधारस्वरूप उपदर्शित एभिरत्र ॥

एवञ्च जैनमततुल्यतया प्रतीति-
रस्त्येव तस्य विबुधाग्र्य तथापि नैवम् ॥१६६॥
यस्मादभाव इह तैर्द्विविधः प्रदिष्ट
एकस्तु तत्र चितिरूपतयैव सिद्धः ॥
अन्यो घटादिविरहो व्यवहारतो य-
स्तत्साम्यता भवति जैनमते न चैव ॥१६७॥
यस्मादयं घटपटादिवदेव माया-
जन्यो मतोऽधिकरणाद्व्यतिरिक्तरूपः ॥
प्राचीनपद्धतिसमाश्रयणेऽप्यभेदै-
कान्तस्ततो भवति कल्पितभेदमूर्त्तिः॥१६८॥
जैनैर्म्मतोऽधिकरणेन समं तु तस्य
भेदोऽप्यभेद इव तुल्यतयाऽविशेषात् ॥
द्रव्यादिनाऽपि च तथैव गुणादिकस्य
भेदो न कल्पिततया श्रुतिवादिवत्तु ॥१६९॥
वस्त्वंशता विधिनिषेधनयोर्न्न तेषा-
मिष्टा परन्तु तदुभाववपि वस्तुभूतौ ॥
एवञ्च धर्म्मविधयैव मतश्च धर्म्मेऽ-
वच्छेदकत्वमपि तैः प्रतियोग्यवृत्तौ ॥११७०॥
तस्मिन् द्विधा भवति जैनमते तु धर्म्मे-
ऽवच्छेदकत्वमविगानतया प्रसिद्धम् ॥
एकन्तु धर्म्मविधयोभयसिद्धमन्य-
दव्याप्यवृत्तिघटनाभजनानिमित्तम् ॥१७१॥

यस्मादसत्त्वमिह नैव पटादिभाव-
मात्रेण कुम्भगतमिष्टमितोऽन्यथापि ॥
द्रव्यादिभिस्त्वभिमतं तत एव सप्त-
भङ्गी मता जिननये तु सहस्रभङ्गी ॥१७२॥
एकन्तु धर्म्ममधिकृत्य मताऽत्र सप्त-
भङ्गी बुधैर्विधिनिषेधविवक्षया वै ॥
वस्त्वंशमेकमधिकृत्य हि सप्तधैव
शङ्का तथैव वचनश्च न चान्यथापि ॥१७३॥
यद्धर्मयोर्विधिनिषेधनयोर्विरोधा-
देकत्र वस्तुनि घटा न विना निमित्तैः ॥
भिन्नैस्ततोऽधिकरणादिगमन्यदेवा-
वच्छेदकत्वमिह यन्ननु तच्च धर्मे ॥१७४॥
धर्म्मोऽपि नो नियमतः प्रतियोग्यवृत्ति-
र्नास्तित्वसंघटनतत्पर आर्हतानाम्,
धर्म्मांशमात्रमवलम्ब्य भवेच्च येन
भङ्गे द्वितीय इह वेदनयप्रवेशः ॥१७५॥
सद्द्रव्यतादिषु घटादिगतेषु सत्सु
वक्ता विवक्षति यमेव प्रधानभावात् ॥
तेनास्ति कुम्भ इह न त्वविवक्षितेन
नास्तित्वमिष्टमत एव भवेच्च तेन ॥१७६॥
नो कल्पनारचित एव विवक्षियास्ति
धर्म्मो यतो भवतु संवृतिसत्त्वमत्र ॥

वस्त्वंशताश्रयतया स्थित एव धर्म्मे
स्याद्वादतो विभजना तु विवक्षयैवम् ॥१७७॥

इत्थं व्यवस्थित इहाश्रयकालद्रव्या-
वच्छेदकैरपरवस्तुगतैर्द्वितीयः ॥
भङ्गो न वेदनयसम्मत एवमन्या-
वच्छेदकत्वमननादथ धर्म्मतोऽपि ॥१७८॥

वस्त्वंशगोचरतया तु यदा प्रसिद्धौ
भङ्गौ तदा न कथमत्र तृतीयभङ्गः ॥
पूर्वप्रदर्शितदिशोभययोगसिद्धो
ह्यंशान्तरावगमहेतुरनन्यलभ्यः ॥१७९॥

धर्म्मद्वयस्य युगपत्तु विवक्षितस्य
प्राधान्यतः किमपि नो वचनं यतोऽस्ति ॥
वस्त्वंशतामुपगतस्य चतुर्थभङ्गोऽ-
वक्तव्यरूप इह तत्प्रतिपत्तिभेदात् ॥१८०॥

नन्वत्र वेदनय आगत आर्हतानां
यस्मादनिर्वचनमिष्टमिदन्तु विश्वम् ॥
दृश्यं यथा श्रुतिविदां भवतां तथैव
नो चेद् विशेष इह कोऽपि निरूपणीयः॥१८१

नोच्चैरिदं श्रुतिविदा वचनीयमार्ह-
त्स्याद्वादतत्त्वमनने सकलस्य यस्मात् ॥
इष्टा नयस्य घटना भजनाविदां कि-
न्नैकान्तताऽनभिमता परमत्र तत्त्वात् ॥१८२॥

वस्त्वंश एव वचनाविषयत्वमिष्टं
किञ्चात्र जैननयवर्त्मनि तुर्यभङ्गात् ॥
नो वै तथा श्रुतिविदां मतमीदृशन्त-
न्मिथ्यात्वलक्षणतयाऽनुमतं परन्तु ॥१८३॥
तैस्सर्वथैव सदसत्त्वियोगरूपाऽ
वक्तव्यता स्वभिमता ननु मायिकेषु ॥
जैनैः पुनस्सदसदात्मकवस्तुनिष्ठाऽ-
वक्तव्यता तदतिरिक्ततयैव गीता ॥१८४॥
अंशस्स चापि वचनीयतयाऽभ्युपेतोऽ-
वक्तव्यशब्दरचना ननु तत्र यस्मात् ॥
एकान्तवादमनने तु चतुर्थभङ्गो
व्याघाततो नहि भवेदुपदर्शनीयः ॥१८५॥
भङ्गत्रयन्तदपरन्त्वथ पूर्वयोगात्,
तुर्यस्य यज्जिनमतं तदपि प्रसिद्धम् ॥
पूर्वप्रसिद्धिबलतोऽधिगतांशभिन्नां-
शानां प्रबोधजनकं भजनान्वितश्च ॥१८६॥
वस्त्वंशगोचरतया प्रतिधर्म्ममेषा
वस्तुप्ररूपकतयैव विवक्षया वै ॥
तस्मात्स्थिता विधिनिषेधनयोः परेषां
सन्देहनाशनिपुणा ननु सप्तभङ्गी ॥१८७॥
धर्म्मान्समादिशति वस्तुगतानशेषा-
नैकस्य पर्ययनयादुपचारवृत्त्या ॥

द्रव्यार्थतस्तदपृथक्त्वप्रधानभावा-
देषा नयानुगमना प्रतिभङ्गमेव ॥१८८॥
कालात्मरूपगुणिदेशफलस्वदेश-
संसर्गबन्धवचनैः प्रथिताऽष्टभिस्ता ॥
द्रव्यार्थपर्ययनयार्पणतो ह्यभेद-
भेदौ प्रधानगुणवृत्तित आदिशन्ती ॥१८९॥युग्मम्

कालो य एव खलु वस्तुगतस्य चैक-
धर्म्मस्य सैव तदभिन्नतया परेषाम् ॥
द्रव्यार्थतो भवति तेन समस्तवस्त्वं-
शज्ञापकोंऽशविषयोऽपि सदादिभङ्गः ॥१९०॥
अस्तित्वनिष्ठमिह यत्खलु धर्म्मतादि
तन्नास्तितादिगतमात्मसमानभावात् ॥
द्रव्यार्थतो भवति तद्गुणताऽविशिष्टा
धर्म्मेष्वभेदत इतोऽपि समग्रबोधः ॥१९१॥
एकस्य यस्तु गुणिदेश इह प्रसिद्धोऽ-
न्येषां स एव गुणिदेशसमानभावात् ॥
द्रव्यार्थतो भवति चैकमुखेन भङ्ग
एकोऽप्यशेषघटनावगतिप्रवीणः ॥१९२॥
यत्स्वानुरागकरणं फलमेकधर्म्मा-
दत्रास्ति धर्मिणि तदेव विशेषणत्वात् ॥
धर्म्मान्तराच्च सकलस्य फलैक्यभावा-
द्द्रव्यार्थतोऽवगमकोऽभिदयैकभङ्गः ॥१९३॥

एकस्य देश इह यो निखिलस्य सैव
द्रव्यार्थतो भवति देशसमानभावात् ॥
धर्म्मेषु चैक्यमत एकमुखेन सर्वा-
नेकोऽपि बोधयति भङ्ग इति प्रमाणम् ॥१९४॥
संसर्ग इष्ट इह यो निजदेशतो वै
एकस्य सैव निखिलस्य तदेकभावात् ॥
द्रव्यार्थतो निखिलधर्म्मगतिप्रवीण
एकोऽपि दर्शितदिशाऽभिदयैव भङ्गः ॥१९५॥
सम्बन्ध एवमिह वस्तुगतस्सदादे-
रेकस्य यो भवति सैव परस्य नान्यः ॥
द्रव्यार्थतो जिननयेऽभिदया प्रधाना-
देकोऽपि सर्वघटनागमकोऽत्र भङ्गः ॥ १९६ ॥
संसर्गतो भवति यद्यपि नास्य भेदा-
भेदात्मकत्वसमभावतयाऽत्र भेदः ॥
भेदः प्रधान इह नैव परन्त्वभेदः
किन्तावता भवति नैव तथापि भेदः ॥ १९७ ॥
यश्चास्तिशब्द इह सत्वविशिष्टरूपे
इष्टस्स एव निखिलात्मनि तत्र शक्तः ॥
द्रव्यार्थतो वचनशक्तिसमानभावा-
देकोऽपि चैकमुखतो निखिलेषु भङ्गः ॥१९८॥
पर्यायनीतिबलतोऽप्युपचारतोऽत्र
तैरष्टभिश्च प्रतिभङ्गमनन्तभेदान् ॥

साऽभेदतत्त्वमवलम्ब्य प्रमाणसप्त-
भङ्गी समादिशति चैकमुखेन धर्म्मान् ॥१९९॥
तैरष्टभिर्भवति भेदप्रधानभावात्
पर्यायनीतिबलतो यदि मुख्यवृत्त्या ॥
द्रव्यार्थतस्तदुपचारबलात्तदा तु
सा नीतिजैकमुखतो न समग्रनिष्ठा ॥१२००॥
प्रत्येकमेव प्रतिभङ्गमनन्तधर्मे
सत्त्वादिकं भवति वस्तुनि भिन्नभावात् ॥
एकैकनीतिबलतोऽवगतन्तु सप्त-
भङ्ग्या द्विधा भवति सा निखिलैर्हि भङ्गैः॥२०१॥
स्यादस्ति कुम्भ इति यः प्रथमोऽत्र भङ्गः
स्यान्नास्ति कुम्भ इति योऽभिमतो द्वितीयः॥
स्यात्कारलाञ्छिततनुश्च मतश्चतुर्थोऽ-
वक्तव्यकुम्भ इति तत्त्रितयं प्रमाणम् ॥२०२॥
सर्वान्समादिशति वस्तुगतानखण्ड-
वस्त्वंशबोधनबलादभिदैकमानात् ॥
एतन्त्रयन्न तु सखण्डतदंशबोध-
कार्यन्यभङ्गनिकरो विकलस्वभावः ॥२०३ ॥
इत्यामनन्ति ननु केचिदभङ्गभङ्ग-
रूपार्थतत्त्वमननानिपुणाः परन्ते ॥
सर्वेऽपि धर्म्मविषयांशतया च भिन्ना-
भङ्गेष्वतो न सकलासकलस्वभावौ ॥ २०४ ॥

अंशो ह्यखण्ड इह चेद्यदि सत्त्वरूपः
किन्तावता सकलबोधफलोऽस्य भङ्गः ॥
द्रव्यादभेदघटनाबलतो नयाच्चेत्,
तत्किं सखण्डमुखतो न तथाऽन्यभङ्गः ॥२०५॥
अंशद्वयस्य घटनाच्च सखण्डरूपा
धर्म्मा भिदांशमवलम्ब्य प्रकाशमानाः ॥
नाभेदवृत्तिबलतो मिथ एव भङ्गै-
रन्यैस्समस्तघटनानुगताः स्फुरेयुः ॥२०६॥
अंशस्त्वखण्ड इह तत्र त एव भेदां-
शाभानतोऽभिमुखयत्यखिलांशमेव ॥
स्वात्मन्यभेदमननान्निजरूपमात्र-
भानात् समग्रविषयोऽपि मतोऽस्य भङ्गः॥२०७॥
एतन्न युक्तमविकल्पनबोधरूपोऽ-
खण्डस्य बोध इह तेऽभिमतोऽन्यथा वा ॥
आद्ये न शाब्दमतिता न च मानतास्य
यस्मादुभावपि विकल्पनबोध एव ॥२०८॥
अन्ते विकल्पकतया नियतं प्रकारा-
द्यालम्बनोऽनुमत एव तवापि सोऽपि ॥
भेदांशगोचरतया निखिलांशबोध-
निष्ठो न दर्शितनयादिबलं विना सः ॥२०९॥
वाक्यत्वतो भवति भेदमतिप्रवीणो
नोच्चारणं सफलमस्य विना तथात्वम् ॥

स्यादन्यथैवपदयोजनमर्थवन्नो

भङ्गेऽप्यखण्डविषये ननु भेदभानम् ॥२१०॥

अंशे भवेन्नियमतोऽत्र सखण्डरूपे

ग्राह्यांशयोर्यदि तु भेदमतिस्तदापि ॥

नाखण्डधर्म्मविषयेऽपि निरूपकस्या-

वच्छेदकस्य किमु भेदमतिस्तु भङ्गे ॥२११॥

किञ्चांशयोर्भवतु भेदमतिस्तथापि

भिन्नोंऽश इष्ट इह तद्द्वयमेलने यः ॥

नो तस्य भेदमतिरस्ति विभिन्नतोंऽशा-

त्तस्मादभेदमननं किमु नोंऽशमात्रे ॥२१२॥

किं वा द्वयोरपि प्रतीयत एव भेद-

स्सत्त्वस्वाभिधायकवचःप्रतिपाद्यभावात् ॥

किन्नो तयोरपि परस्परमिष्टवस्त्वं-

शाभेदतो मतिरभिन्नतया सखण्डैः ॥२१३॥

स्याद्वांऽशयोरपि विशिष्टतयाऽत्र भेदा-

भेदात्मबन्धनबलान्मतिरेव शाब्दी ॥

भङ्गात्सखण्डविषयादभिदाप्रधाना

भेदावगाहनपरा निरुपद्रवाऽथ ॥२१४॥

श्रीदेवसूरिप्रभृतेरमुमेव भावं

बोधे फले तु सकलासकलार्थताभ्याम् ॥

भङ्गेषु हेतुषु विभाव्य प्रगल्भ एको

विद्वानुपैति सकलासकलस्वभावौ ॥२१५॥

द्रव्यार्थजात्यभिदया तु समग्रमेकं
 द्रव्यार्थभेदमुपगम्य प्रवृत्त आद्यः ॥
पर्य्यायजात्यभिदया च समग्रमेकं
 पर्यायभेदमुपगम्य तथा द्वितीयः ॥२१६॥

भङ्गश्चतुर्थ इह तद्युगपद्विवक्षा-
 सिद्धैक्यमेकमुपगम्य प्रवृत्त एवम् ॥
इत्थं त्रयोऽपि सकला ननु चाद्वितीयां-
 शं ख्यापयन्त इतरे विकलास्तु भङ्गाः ॥२१७॥

स्यात्संग्रहो व्यवहृतिश्च नयौ समग्रा-
 देशस्य मूलमितरे त्वितरस्य चैवम् ॥
नान्योक्ततत्त्वघटनाघटनत्वतस्स-
 खण्डांशतद्विगमते ननु भङ्गनिष्ठे ॥२१८॥

यद्वन्नरे नरमतौ न सखण्डधीत्वं
 सिंहेऽथवा हरिमतौ ननु तद्वदेव ॥
उक्तन्त्रिभङ्गविषयेऽपि मतिष्वखण्ड-
 बुद्धित्वमर्थत इमेऽपि भवन्त्यखण्डाः ॥२१९॥

यद्वद्भवेन्नरहरौ नरसिंहबुद्धौ
 नाखण्डधीत्वमुभयांशसमन्वयेन ॥
तद्वत्सखण्डमतितेतरभङ्गार्थे
 बोधेष्वतोऽर्थत इमे तु मताः सखण्डाः॥२२०॥

तत्त्वार्थभाष्यविवृतौ बुधसिद्धसेन
 एतन्मतं ननु विचारितवाननिन्द्यम् ॥

सूक्ष्मेक्षिकात इह नैव विरोधलेशोऽ-
प्यस्तोरयकुण्ठयमतयः परिभावयन्तु ॥२२१॥
भङ्गत्रये तु सकला विकलान्यभङ्गे-
ष्वेवेति किञ्च वचनं नयवादतस्स्यात् ॥
स्याद्वादतस्तु प्रतिभङ्गमियं समग्र-
देशाऽथवाऽभ्युपगता विकलस्वभावा ॥२२२॥
पञ्चप्रकारमिह जैनमतं परोक्ष-
मानं व्यवस्थितमनन्यगतेस्ततश्च ॥
यत्कुत्रचित्प्रथितमस्ति चतुर्विधत्वं
मानस्य तत्परनयान्न निजागमात्तु ॥२२३॥
संख्यास्वरूपविषयाश्च प्रयोजनश्च
तेषां जिनागममता विदिता यथार्थाः ॥
ते चान्यतन्त्रगदिताः कथिता नयज्ञै-
राभासतापरिगताः खलु युक्त्ययोगात् ॥२२४॥
द्वित्वं प्रमाणगतमत्र समासतोऽस्ति
व्यासाद्बहुत्वमपि दर्शितमेव पूर्वम् ॥
चार्वाकबौद्धकपिलादिप्रदर्शितो य
आभासरूप इह तत्त्ववियोगतस्सः ॥२२५॥
ज्ञानात्मकं भवति मानमनन्यभास्य-
मर्थावगाहि सविकल्पनरूपमत्र ॥
सन्दिग्धतादिरहितं विपरितमस्मा-
दाभासमन्यनसिद्धमुदा हरन्ति ॥२२६॥

सामान्यमस्य विषयस्सविशेषमिष्ट-
मन्योन्यसंवलितमेव यथार्थभावात् ॥
तद्भिन्नमन्यनयसिद्धमवस्तुभावा-
दाभासमस्य तु वदन्ति जिनागमज्ञाः ॥२२७॥
सामान्यमत्र कथितं द्विविधं तु तिर्य-
गूर्द्धत्वभेदभजनादनुगामि रूपम् ॥
आद्यं समानपरिणामतया प्रसिद्धं
देशानुगाम्यभिमतं घटतादिनाम ॥२२८॥
द्रव्यस्वरूपमिह जैनमतप्रसिद्धं
कालत्रयानुगतमन्त्यसमानभावात् ॥
तच्चोद्ध्वतेति निजपर्ययमात्रकाला-
स्तित्वान्मृदाद्यभिमतं कलसाद्यभिन्नम् ॥२२९॥
द्रव्याणि षड्जिनमते प्रथितानि तत्र
यश्चोपयोगगुणवान् स च जीव इष्टः ॥
यः पुद्गलस्तदितरो ननु सोऽत्र रूपा-
द्यालिङ्गितोऽभिमत आर्हततत्त्वविद्भिः ॥२३०॥
धर्मास्तिकाय इह जैनमतेऽस्ति लोका-
काशस्थितो गमनलिङ्गबलात्प्रसिद्धः ॥
शून्यत्वतो भवति यस्य च नो ह्यलोका-
काशे गतिर्गतिमतोऽपि च पुद्गलादेः ॥२३१॥
मीनादयो जलचरा गतिमन्त एव
नैव स्थले जल इव प्रभवन्ति गन्तुम् ॥

तस्माद्यथा जलसहायवशाच्च गन्तुं
शक्तास्तथाऽन्य इह धर्म्मवशाच्च तेऽपि ॥२३२॥
देशादयस्तु बहवोऽननुगामिभावा-
त्तद्व्यक्तितादित इह प्रभवन्ति नैव ॥
धर्म्मस्तदर्थकतयैव मतोऽनुगामी
एकोऽप्यशेषगतिमत्सहकारिरूपः ॥२३३॥
धर्म्मास्तिकाय इव जैनमते प्रसिद्धोऽ-
धर्म्मास्तिकाय इह तत्समदेशवृत्तिः ॥
स्थित्यर्थता भवति तस्य तदा त्वलोका-
काशेऽस्थितिः स्थितिमतां विरहेऽस्य युक्ता २३४
कोऽप्यस्ति नो विनिगमो यत एव तस्मा-
न्नाशङ्क्यमत्र किमु तद्द्वयकल्पनेन ॥
एकेन सिद्ध्यति फले विबुधेन किञ्च
मानं परोक्षविषये जिनवाक्यमत्र ॥२३५॥
रूपादियोगविरहाद्गगनादिवन्नो
नेत्रादिना तदुभयोर्मतिरस्ति लोके ॥
युक्त्या द्वयं भवति लोकगतं प्रसिद्धं
जैनागमोऽपि ननु तत्र करोति बुद्धिम् ॥२३६॥
यश्चावगाहनफलोऽभिमतस्स एवा-
काशाभिधो विभुरनन्तप्रदेशयुक्तः ।
सर्वाश्रयो भवति साश्रयताबलेन
पक्ष्यादिकेषु निखिलानुगतोऽप्यभिन्नः ॥२३७॥

शब्दो हि पौद्गलिक एव मतो जिनेन
तस्याश्रितत्वबलतो गगनस्य नैव ॥
सिद्धिस्तु गौतमसुतानुमता परन्तु
ज्ञेया प्रदर्शितदिशा गगनप्रसिद्धिः ॥२३८॥

यद्वर्त्तनात्मकतया परिणामि तत्त्वं
कालात्मकं भवति तत्त एव नान्यः ॥
कालोऽत्र गौतमसुतोऽनुमतो विभुस्तु
नित्योऽखिलाधिकरणोऽखिलकार्यहेतुः ॥२३९॥

कालं च केचिदिह जैनमतेऽपि भिन्न-
माहुस्तमक्षचरणानुमतं परन्तो ॥
द्रव्याणि षट् ननु मतानि नयेन तेषां
पञ्चान्यथा त्वभिमतानि भवन्ति विज्ञैः ॥२४०॥

आकाशदेशविषयैव हि दिक्प्रतीति-
र्भिन्ना ततो भवति दिङ्न जिनानुगानाम् ॥
आशा तु गौतमसुतस्य विभिन्नताया-
माशासु नैव सफला तत एव किञ्च ॥२४१॥

द्रव्यं मनो भवति पुद्गलरूपमेव
नो न्यायसम्मतमतोऽधिकता न चास्य
क्षित्यादयोऽप्यभिमता ननु पुद्गलेषु
नो न्यूनता भवति तेन नये जिनानाम् ॥२४२॥

पर्यायसंज्ञक इहाभिमतो विशेषो
द्वैविध्यमस्य गुणपर्ययभेदतस्स्यात्

द्रव्येण तुल्यसमयस्समये गुणोऽत्र
यश्च क्रमाद् भवति पर्ययनामकस्सः ॥२४३॥
रूपादयस्तु सहभावितया गुणास्स्यु-
र्नोलादिपर्ययतयाऽभिमतश्च तेषाम ॥
प्राप्त्यादयोऽप्यसहभावितयैव पर्या-
यास्संमता न च भवन्ति गुणा जिनानाम २४४
उत्क्षेपणादिकमपि प्रमितं परेण
कर्मेति यद् भवति पर्ययभेद एतत् ॥
जातिविशेष इति चाभिमतः पदाथ
भिन्नः परेण ननु यो न च सोऽत्र सिद्धः २४५
तादात्म्यतो भवति तार्किकसम्मताऽत्र
वैशिष्ट्यबुद्धिरपि नो समवायसिद्धिः ॥
तद्बुद्धितो भवति नापि निरुक्तभावा-
दन्यस्स्वभाव उपपद्यत आर्हतानाम् ॥२४६॥
साक्षात्परम्परितभेदत आर्हताना
मिष्टं फलं द्विविधमस्य प्रमाणराशेः ॥
स्वस्वावृतिक्षयशमादिफलं तु साक्षा-
द्धानादिकन्तु गुणतोऽभिमतं द्वितीयम्॥२४७॥
या स्यान्निवृत्तिजनिकाऽभिमता तु सैव
हानात्मिका मतिरियन्तु न केवलोत्था ॥
या च प्रवृत्तिजनिकाऽभिमताऽत्र सा तू-
पादानबुद्धिरपरा न च केवलात्सा ॥२४८॥

माध्यस्थ्यवृत्तिजनिकाभिमता परा या
सोपेक्षिकामति रियं खलु केवलात्स्यात् ॥
मत्यादितस्त्विह चतुर्विधबोधतस्स्या-
देतत्त्रयस्य भजनाऽनियतप्रवृत्त्या॥२४९॥

एतत्फलन्नहि प्रमाणत एव भिन्नं
यद्गौतमानुमतमेकनयावलम्बात् ॥
नाभिन्नमेव सुगतानुमतं च भिन्ना-
भिन्नं परन्तु नययुग्मबलात्प्रसिद्धम् ॥१२५०॥

या व्यावहारिकमतिस्त्विह दोषजन्याऽऽ-
भासात्मिका भवति साऽप्रमितिर्म्मताऽथ ॥
भ्रान्त्यात्मकस्त्ववधिबोध उदाहृतोत्रा-
भासो विभङ्ग इति चार्हततत्त्वविद्भिः ॥२५१॥

भ्रान्त्यात्मको न चरणप्रविशुद्धिजन्यो-
हृत्पर्ययो न सकलावरणक्षयोत्थः ॥
बोधश्च केवलिन इत्यनयोर्न्न चैवा
भासो मतो जिनवचोमृतपूतचित्तैः ॥२५२॥

अन्यानुभूतिजनितोऽननुभूतभावे
या च स्मृतिर्भवति दोषवशाज्जनानाम् ॥
भ्रान्त्यात्मिका ननु मताहततत्त्ववेत्रा
साभासतापरिगताऽन्यसमाश्रितत्वात् ॥२५३॥

अन्यस्मृतौ भवति या ननु प्रत्यभिज्ञा-
ऽध्यक्षादिबोधविषयेऽभिता तु तस्याः॥

आभासता सति च सङ्कलनात्मकत्वे
केशादिगोचरतयाऽप्रमितित्वभावात् ॥२५४॥
यस्साध्यसाधनतया मतयोर्विनापि
व्याप्तिं प्रकाशयति तां विषयापहारात् ॥
तर्को भ्रमात्मकतया स मतो मतज्ञै-
राभासरूप इह जैनमतप्रसिद्धः ॥२५५॥
बाधादिदोषकलुषार्थतयाऽनुमाना-
भासो मतो बहुविधो जिनतत्त्वविद्भिः ॥
दोषत्रयं भवति धर्म्म्यनुसारि पक्षा-
भासस्तदित्यनुमतन्ननु तत्र जैनैः ॥ २५६ ॥
धर्म्म्यप्रसिद्धिरिह नैव मतस्तु दोषो
यस्माद् विकल्पबलतोऽपि च धर्म्मिसिद्धिः ॥
सर्वज्ञधर्म्मिणि ततोऽभिमतोऽस्तितादे-
र्बाधाद्यभावगमकादनुमाऽर्हतानाम् ॥ २५७ ॥
साध्यप्रसिद्धिरिह जैनमतेऽस्ति पक्षा-
भासस्ततो ह्यनुमतेः प्रतिबन्ध इष्टः ॥
अर्थान्तरत्वमपि दोष इहास्ति पक्षा-
भासस्ततो नहि यतोऽभिमतार्थसिद्धिः ॥२५८॥
बाधः परैरपि मतो ननु लिङ्गदोषः
किन्त्वत्र सोऽभिलषितः खलु धर्म्मिदोषः
प्रत्यक्षतोऽनुमितितोऽथ च शब्दतस्स्या-
न्मानान्तरादपि चसोऽभिमतो जिनानाम् २५९

लिङ्गस्य दोष इह जैनमते त्रिधैवा-
नैकान्तिकोऽभिलषितो व्यभिचारनामा ॥
तत्रादिमो भवति साध्यविपर्ययाभ्या-
मेकत्र धर्मिणि घटा गमकस्य हेतोः॥२६०॥

सन्दिग्धनिश्चयप्रभेदत इष्यतेऽसौ
जैनैर्द्विधा भवति तद्द्वयतोऽत्र यस्मात् ॥
तर्काख्यबोधजननप्रतिबन्धतो न
व्याप्तिप्रथा न च तथाऽनुमितिस्तदुत्था ॥२६१॥

सन्देहहेतुरत एव च कीर्त्यतेऽसौ
साधारणात्मकतयोभयबोधकत्वात् ॥
यत्रोभयोस्सहचरप्रतिलम्भमात्रं
तत्रैव संशयमतिः प्रथिता नयज्ञैः ॥ २६२ ॥

सन्दिग्धसंज्ञकतया व्यभिचारिहेतु-
रेतावता जिननयेऽपि मतो नयज्ञैः ॥
एकान्तता नियम एव ततो विरोधेऽ-
नैकान्तिकत्ववचनश्च तथाऽत्र योगात् ॥२६३॥

साध्येन नैव सहवृत्तिरसौ विरुद्धो
हेतुर्द्वितीय इह लिङ्गगतस्तु दोषः ॥
तर्कप्रबोधविगमोऽभिमतस्ततोऽपि
नो संशयात्मकमतिप्रवणो विरुद्धः ॥ २६४ ॥

किन्त्वस्य साध्यविरहेण विनोपपत्ति-
र्नैवास्त्यतो भवति तद्विरहानुमाऽत्र ॥

किञ्चास्य साध्यविरहप्रतिबन्धतो ज्ञै-
रिष्टं विरुद्ध इति नाम निजार्थयुक्तम् ॥ २६५ ॥
अन्यस्त्वसिद्धिरिति हेतुगतस्तृतीयो
दोषो द्विधा जिनमतेऽभिमतो नयज्ञैः ॥
वादिद्वयान्यतरभेदबलात्स्वरूपा-
च्छेत्वप्रसिद्धिरिति सोऽभिमतो न चान्यः २६६
पक्षे तु हेतुविरहोऽभिमतस्स्वरूपा-
सिद्धिर्नयेऽक्षचरणानुमते न जैनैः
यस्मान्न पक्षघटनामतिरार्हतानां
हेतौ मताऽनुमितिहेतुतया तृतीया ॥ २६७ ॥
बाधस्तु दर्शितदिशा ननु पक्षदोषो
नो हेतुदोष इति तद्भजनं यथार्थम्॥
दोषो न चेष्ट इह सत्प्रतिपक्षनामा
नो न्यूनताविभजने तत आर्हतानाम् ॥२६८॥
दृष्टान्तदोषभजना नवधाऽन्वयेन
स्यादत्र तावदथ च व्यतिरेकतोऽपि ॥
दृष्टान्तधर्मिणि मतः प्रथमस्त्वसिद्धि-
रसाध्यस्य सिद्धिजनकस्य तथोभयस्य ॥२६९॥
लिङ्गस्य लिङ्गिन इहाभिमतश्च तत्र
सन्देह एवमुभयोरपि सम्मतस्सः ॥
सोनन्वयश्च कथितोऽकथितान्वयश्च
स्याद्व्यत्ययात्तदुभयान्वयदर्शनश्च ॥ १२७० ॥

अन्यस्तु तत्र विरहाप्रतिपत्तिरेवं
साध्यस्य सिद्धिजनकस्य तथोभयोश्च ॥
सन्दिग्धसाध्यविरहोऽभिमतस्तथाऽत्र
सन्दिग्धलिङ्गविरहो जिनसम्प्रदाये ॥ २७१ ॥
सन्दिग्धसाध्यगमकोभयशून्यताऽथ
व्याप्तेरकीर्त्तनमपि व्यतिरेकयोश्च ॥
तद्दर्शनञ्च विपरीतत एवमत्र
व्याप्तेरभाव उभयोर्व्यतिरेकयोश्च ॥ २७२ ॥
स्यान्न्यायदोष इह चोपनयोपसंहा-
राभासभेदभजनाद्द्विविधो जिनानाम् ॥
दृष्टान्तधर्मिणि वचोगमकस्य पक्षे
साध्यस्य वा यदि तदा प्रथमोऽत्र दोषः ॥२७३॥
साध्योपदर्शनबलाद्गमकोपसंहा-
रस्तु द्वितीय इह जैनमते प्रसिद्धः ॥
एषामुदाहृतिपदं स्वयमेव विज्ञै-
र्भाव्यं स्थलेषु विविधेषु विवेकदृष्ट्या ॥२७४॥
शब्दस्त्वनाप्तपुरुषोच्चरितोऽत्र शब्दा-
भासश्चतुर्विधतयाऽपि मतोऽन्यभेदैः ॥
आकाङ्क्षया विरहितानि पदानि यत्र
वाक्यं बुधैरिह खलु प्रथमं तदिष्टम् ॥२७५॥
यद्बाधितार्थविषयं तदयोग्यशब्द-
सङ्केतगोचर इहाभिमतं द्वितीयम् ॥

आसत्तिशून्यपदसंघटितं तु वाक्य-
मिष्टं तृतीयमिह सन्निधिशून्यनाम ॥२७६॥
अन्येच्छयोच्चरितवाक्यमथान्यबोधे-
च्छोच्चारितत्वमतिगोचर इष्टमन्त्यम् ॥
एतन्नयानुसरणाद्विबुधैर्विचार्य्यं
सर्वे नयो जिनमतानुगता यतो वै ॥२७७॥
प्रक्रान्तमाविषयभागविधिप्रवीणो
ज्ञेयो नयस्तदितरांशनिषेधकुण्ठः ॥
नामानि प्रापकनिवर्त्तकसाधकोप-
पलम्भावभासकमुखानि बहूनि तस्य ॥२७८॥
द्रव्यार्थपर्ययप्रभेदत एष इष्टो
द्वेधा तथाऽर्थमननेन समासतोऽत्र ॥
व्यासात्तु सप्तविध आर्हततत्त्वविद्भि-
रुक्तोऽथ दर्शितनयौ सकलस्य मूलम् ॥२७९॥
द्रव्यं प्रधानत उपैति न पर्ययन्तु
द्रव्यार्थिको गुणतयोपगमोऽस्य तस्मिन् ॥
पर्यायमात्रमुपगच्छति पर्ययोऽपि
प्राधान्यतो न कुनयत्वप्रसक्तिरस्य ॥२८०॥
द्रव्यार्थिकस्य खलु नैगमसंग्रहर्जु-
सूत्रा मता विभजना व्यवहारमिश्राः ॥
शब्दस्तथा समभिरूढसमन्वितैवं-
भूतोऽपरस्य जिनभद्रमते नयस्य ॥२८१॥

श्रीसिद्धसेनकृतिनस्तु मते न चर्जु-
सूत्रस्य सम्मत इहादिनये प्रवेशः ॥
अन्यत्समानमुभयोर्मत एव सप्त
स्युर्वै नया न च विरोधघटाप्रथाऽत्र ॥२८२॥
शब्देन सांप्रतमुखस्य न यन्नयस्यो-
पादानतोऽपि ननु पञ्च नयाः प्रसिद्धाः ॥
ते देशप्रस्थकवसत्युपनीतिभिस्स्युः
शुद्धा यथाक्रममनिन्द्यधिया विभाव्याः ॥२८३
तत्रादिमो भवति सङ्ग्रहनामधेयो
वेदान्तदर्शनभवस्तत उच्यते ज्ञैः ॥
एकान्ततत्त्वमननाश्रयणात्परन्तु
दुर्न्नीतिताऽस्य कथिता नयताऽन्यथा तु ॥२८४
सङ्गृह्णतस्सकलमेव तु भावराशिं
सत्त्वादिना भवति सङ्ग्रहताऽस्य युक्ता ॥
इष्टः परापरतया द्विविधस्स तत्र
सत्त्वादिना सकलगोचर आदिमस्तु ॥२८५॥
शुद्धस्स एव कथितोऽन्यनयाप्रवेशाद्-
द्रव्यार्थिको भवति भेदगुणोऽप्यभेदात् ॥
द्रव्यादिभावमननादपरो निरुक्तो
ऽशुद्धोऽन्यनीतिघटनाश्च तथाविधोऽपि ॥२८६॥
नो सङ्ग्रहे घटपटादिविशेषबुद्धे-
र्लोपो मतोऽनुभवबाधभयाद्बुधानाम् ॥

किन्तु प्रभो भवति सा न विशेषभागे
बाधादिति श्रुतिशिखानुगता वदन्ति ॥२८७॥
अस्तीति सङ्ग्रहनयाभिमतस्तु शब्द-
स्सत्ताभिधायकतया सकलानुगामी ॥
सत्त्यार्थको न तु घटादिविशेषशक्तः
कुम्भादिशब्द इति ते प्रतिपादयन्ति ॥२८८॥
यश्चानुगामि ननु सत्यतया मतन्तत्
सामान्यतोऽत्र नियमो जनताप्रसिद्धः ॥
सर्पादिबोधविषयेऽनुगता त्विदन्ता
रज्ज्वादिधर्म्मिणि यथा स्फुटमैक्षि लोकैः ॥२८९॥
सत्त्वं समग्रविषयानुगतं न चैवे-
दन्त्वादि तेन मतमत्र तदेव सत्यम् ॥
ब्रह्मस्वरूपमिदमिष्टमतो न चास्मा-
ज्ज्ञानं सुखं च प्रविभक्तमनन्यवेद्यम् ॥२९०॥
ज्ञानं घटीयमिति सर्वजनप्रसिद्ध-
स्संसर्गमेकमवगाहत एव बोधः
नो तात्त्विको भवति सोऽथ ततः श्रुतिज्ञै-
राध्यासिकोऽभिमत उक्तनयावलम्बात् ॥२९१॥
संसर्ग इष्ट इह तात्विक आगमज्ञै-
र्यद्भिन्नदेशसमयाश्रितयोर्द्वयोर्न्न ॥
आध्यासिकस्तु स हि कल्पितभेदमिश्रा-
भेदात्मकस्तदुभयोर्न्नहि सत्यतायाम् ॥२९२॥

एकं त्ववश्यमत एव भवेदसत्य-
मारोप्यरूपजड एव तथाऽभ्युपेयः ॥
ज्ञानं समग्रविषयानुगतं तु सत्यं
सत्त्वात्मकं भवति संग्रहगोचरोऽत्र ॥२९३॥

इष्टस्वरूपमपि सर्वपदार्थगामि
तद्वन्मतं श्रुतिनये ननु सत्त्वरूपम् ॥
सत्यं त्रिरूपमत एव वदन्ति तज्ज्ञा
ब्रह्मस्वरूपमखिलार्थगतं स्वसिद्धम् ॥२९४॥

यत्कापिलम्मतमिह प्रथितं प्रधान-
रूपं जगत्तदपि संग्रहमूलमेव ॥
बुद्ध्यादिभेदमननात्मतया परन्तु
शुद्धं भवेन्न खलु तद्व्यवहारमिश्रम् ॥२९५॥

ज्ञानैक्यवादमनन प्रवणोऽपि योगा-
चारो न शुद्धनयदर्शितमार्गगामी ॥
यत्संग्रहो भवति यद्यपि मूलमस्य
किन्नो तथापि ऋजुसूत्रनयव्यपेक्षा ॥२९६॥

चार्वाकदर्शनमथ व्यवहारनाम-
धेयान्नयादभवदेष नयोऽस्य मूलम् ॥
द्रव्यार्थिकः स्थिरपदार्थविधायकत्वात्
सोऽपीष्यतेऽस्य खलु सङ्ग्रहतो विरोधः ॥२९७

सामान्यबुद्धिरिह कल्पितगोचरत्वा-
न्मिथ्यैव नो भवति वस्तव गाहिनी सा ॥

कुम्भादयोऽप्यणुचयान्नहि भेदभाजो
नो भूतभिन्नमिह किञ्चिदपि प्रसिद्धम् ॥२९८॥
लोकव्यवस्थितिरियं सकलापि यस्मा-
न्न स्याद्विशेषमननव्यतिरेकतोऽत्र ॥
तस्माद् विशेष इह तैर्व्यवहारदृष्ट्या
सामान्यतो विरहितोऽनुमतो यथार्थः ॥२९९॥
प्रत्यक्षमेकमिह मानतयाऽभ्युपेतं
लोके यतो भवति तन्नियता व्यवस्था ॥
नो पारलौकिककथापि परोक्षमाना-
भावान्मतेति गुरुदर्शितमार्गकाष्ठा ॥ १३०० ॥
इष्टोऽथ नैगमनयोऽनुगतस्वभाव-
ग्राही विशेषविषयोपि परो नयज्ञैः ॥
पूर्वप्रदर्शितनयद्वयमेलनात्मा
भिन्नो न चायमिति केऽपि वदन्ति विज्ञाः ३०१
काणादगौतमनयावत एव जातौ
मीमांसकस्य च नयोऽपि नयादमुष्मात् ॥
नैके गमा इह भवन्ति यतस्ततोऽस्मिन्
स्यान्नैगमोक्तिघटना ननु योगतोऽपि ॥३०२॥
नो सङ्ग्रहे न च मतो व्यवहारनीतौ
बोधो विशिष्टविषयस्तु प्रमास्वभावः ॥
अस्मिन्नये गुणप्रधानविवक्षया स्या-
द्वैशिष्ट्यधीरवितथा न च किं गुणादेः ॥३०३॥

द्रव्यार्थिको भवति चायमपि स्थिरार्थ-
ग्राहित्वतोऽनुगतभावप्रकारकत्वात् ॥
इष्टा बुधैस्तु ऋजुसूत्रमुखानया प-
र्यायार्थिकाः क्षणिकतोपगमप्रवृत्ताः ॥३०४॥

इष्टो नयो बुधवरै ऋजुसूत्रनामा
सौत्रान्तिकादिनयमूलतया प्रसिद्धः ॥
यद्भूतभाविसमयाननुगामिवर्त्त-
मानं मतं ऋजुतया कुटिलं तदन्यत्॥ ३०५ ॥

तत्सूत्रयत्यनुमितिप्रमितेर्हि सत्त्वात्
सौत्रान्तिको भवति तन्नयमार्गगामी ॥
वैभाषिकोऽपि च तथा क्षणभङ्गपक्ष-
संसूचनेन ऋजुसूत्रनयैकनिष्ठः ॥ ३०६ ॥

ज्ञाने मता कुटिलता स्थिरतेव भिन्ना-
र्थग्राहिता तदुभयान्वयशून्यमत्र ॥
ज्ञानं ऋजु प्रकटयत्यत एव योगा-
चारोऽपि किं न ऋजुसूत्रनयावलम्बी ॥३०७॥

नो सत्यतार्थनियता न च बोधगा त-
न्मिथ्यात्वमेतदुभयानुगतं ऋजुत्वम् ॥
तत्सूत्रयन्किमिह माध्यमिको न शून्य-
वादी भवेच्च ऋजुसूत्रनयोपगन्ता ॥ ३०८ ॥

प्राधान्यतोऽर्थमनन प्रवणा इमे तु
चत्वार आर्हतमतेऽर्थनयाः प्रतीताः ॥

अन्ये तु शब्दमुखतोऽर्थमतिप्रवीणा-
श्शब्दादयोऽत्र ननु शब्दनया मताः ज्ञैः ॥३०९॥
शब्दादयस्तु ऋजुसूत्रनयोद्भवास्स्यु-
रस्थैर्य्यवादघटना तत एव यस्मात् ॥
वैचित्र्यतोऽथ च भवन्ति मिथो विभिन्ना
नैतावता भवति मूलनयेऽपि भेदः ॥ १३१० ॥
एकक्षणेऽपि मनुतेऽर्थगतं पृथक्त्वं
लिङ्गादिभेदबलतो ननु शब्दनाम्ना ॥
इष्टो नयो न च पुनस्स समानलिङ्ग-
पर्यायशब्दवशतोऽर्थगतं पृथक्त्वम् ॥ ३११ ॥
यस्मात्तटोऽथ च तटी तटमित्यशेष-
लिङ्गप्रवृत्तिबलतोऽभिमतो विभिन्नः ॥
शब्दात् तटो न च तथा ऋजुसूत्रतस्स
एकक्षणेऽभिमत इत्यतिरिक्त एषः ॥ ३१२ ॥
दाराः प्रियेति वचनाननुगामिभावा-
द्भार्य्यार्थगोऽप्यभिमतो नयतस्तथाऽस्मात् ॥
भेदः परन्त्विह भवेदपरोऽपि लिङ्ग-
भेदात् प्रभेद इति सूक्ष्मधिया विचार्यम् ३१३
कालाद्बभूव भविता भवतीति भिन्ना-
द्भेदस्तथा भवति मेरुगिरौ च शब्दात् ॥
अस्म्यस्त्यसीतिपुरुषादिविभेदतोऽपि
भेदस्तथैव पुरुषादिगतोऽत्र शब्दात् ॥ ३१४ ॥

एतन्नयप्रकृतिकस्तु भवेन्नयस्स
विज्ञेन भर्तृहरिणा य इहोपदिष्टः ॥
किन्त्वस्य सङ्ग्रहनयप्रकृतित्वमेवं
शब्दात्मविश्वमननप्रगुणत्वयोगात् ॥१३१५॥

ब्रह्मस्वरूपमपि तेन मतश्च शब्द
ओंकाररूपमिति तज्जनितं हि विश्वम् ॥
शब्दात्मकं प्रणवरूपविभुस्वसिद्ध-
ब्रह्मात्मतत्त्वमननेन मतेऽस्य मुक्तिः॥१३१६॥

ज्ञानं तथा किमपि शब्दसमन्वयेन,
नैवान्तरा भवति भ हरेर्म्मते वै
नो निर्विकल्पकमतिस्तत एव तस्मि-
न्नो वा विशेषणमतेस्तु विशिष्टबुद्धिः ॥१३१७॥

सौत्रान्तिकस्य तु मते ऋजुसूत्रमूले,
या निर्विकल्पकमतिः प्रथमाऽक्षमात्रात् ॥
सैव प्रमा भवति शब्दघटाविहीना
तत्खण्डनं भवति भर्तृहरेर्म्मते च ॥१३१८॥

व्युत्पत्तिभेदबलतः खलु शब्दभेदा-
दर्थप्रभेदघटनानिपुणो नयज्ञैः ॥
उक्तो नयस्समभिरूढ इति प्रसिद्धो
रूढिर्न्न शक्तिरिह केवलमत्र योगः॥१३१९॥

पर्यायता भवति तेन नये न चास्मिन्
शब्देषु हस्तिगजकुम्भिमतङ्गजेषु ॥
सर्वत्र नीतिरियमेव मतो नयो ज्ञै-
रेतन्नयप्रकृतिकः खलु शाब्दिकानाम्॥१३२०॥

द्रव्यार्थिको भवति यद्यपि शाब्दिकानां
नित्याक्षरादिमननात्तु नयस्तथापि ॥
शब्दे स्ववाचकतयोपगते निजांशे,
पर्यायताविगमतस्स कथश्चिदस्मात् ॥१३२१॥

व्युत्पत्तिहेतुरिह योऽभिमतस्स एव
शब्दप्रवृत्तिजनको न तु तद्विभिन्नः ॥
व्युत्पन्नधर्म्मघटना तु यदा कदापि
शक्ये स्थिता भवति शब्दप्रवृत्तिहेतुः ॥३२२॥

व्युत्पत्तिगोचरघटासमकाल एव
शब्दप्रवृत्तिरिह वस्तुनि नान्यकाले ॥
एवं प्ररूपयति योऽभिमतस्स एवं-
भूतो नयो बुधवरैरपरोऽन्तिमश्च ॥३२३ ॥

अस्मिन्नये गमनकर्म्मणि वर्त्तमाने
गोशब्दवृत्तिरूपपद्यत एव गोषु ॥
तिष्ठत्सु नैव न च दोहनकर्म्मकाले
तच्छब्दवृत्तिरमला गतिशून्यतातः ॥३२४॥

एवञ्च नो व्यवहृतेर्विलयप्रसङ्ग-
भीतिस्समस्ति वितथार्थवती यतस्सा ॥
किं वोपचारबलतो व्यवहारभावोऽ-
स्मिन् युज्यते न तु स मुख्यतयेति तत्त्वम्॥३२५

निःक्षेपा ये प्रतीता जिनवरतनयै-
र्व्यापकत्वेन विज्ञैः,
चत्वारो द्रव्यभावौ मितिनयनिपुणै-
र्नाम च स्थापना च ॥

ते सर्वे संग्रहस्याभ्युपगविषया
नैगमस्यापि तद्वत्,
नासङ्ग्राह्यास्तथाऽमी व्यवहृतिऋजुसू-
त्रोपगन्त्रोश्च मार्गे ॥३२६॥

शब्दाद्या भावमात्रे त्रय इह तु नयाः
सम्प्रतीता नयज्ञैः,
द्रव्यं नैवर्जुसूत्रो मनुत इति विदु-
स्सिद्धसेनानुगास्तु ॥

नेच्छन्ति स्थापनान्तु व्यवहृतिनिपुणा
आमनन्तीति केचित्,
अन्ये नो संग्रहस्याभ्युपगमविषयो
नामभिन्नेयमाहुः ॥३२७॥

॥ अथ प्रशस्तिः ॥

ये दोषैकविलोकिनोऽपरगुणा-
संस्पृष्टवामाशयाः,
तेषां यद्यपि नैव मोदकणिका-
ऽप्यस्मत्कृतेस्स्यादतः ॥

ऐदम्पर्यविदस्तु ये सुमनसो
धन्या गुणग्राहिणः,
तेषां किं न तथापि तत्त्वमनने
स्यादस्य मुल्लीनता ॥ १३२८ ॥

सिद्धान्ताप्रतिपन्थियुक्तिकलिता
नव्यप्रचारोन्मुखा,
प्राचीनोक्तिकृतादरा नयघटा-
सङ्घट्टजातप्रथा ॥

सङ्कीर्णार्थविवेचनैकरसिका
सद्वृत्तिपक्षोद्धुरा
सिन्धोरस्य ततोक्तिभङ्गलहरी
मोदं विधत्तात्सताम् ॥३२९॥

दुर्बोधागमसूत्रमात्रघटिते
मार्गे दुरूहावधौ
गच्छन्नान्यमनाः स्खलन्नपि
जनो नो हास्यपात्रं विदाम् ॥

श्लाघ्यः किन्तु भवेत्स यावति गतो-
ऽस्यांशेऽखलँस्तावति
प्रायस्तादृगहं भवेयमपि चे-
त्तत्कुण्ठिता हे शठाः ॥३३०॥

ये शब्दार्थगताः प्रमादवशतो
दोषाः प्रमाबाधका
ग्रन्थेऽस्मिन्नयतोऽपि बाधविधुरा
जाता विबोधस्य मे॥
तान्विज्ञाः क्षपयध्वमर्हदनुगा
दोषप्रणाशोद्धुरा
याचे साञ्जलिरेतदेव भवतो-
ऽहं नेमिरिष्टम्मुहुः ॥३३१॥

यस्मिन् साक्षात्करवदरव-
त्सर्वद्रष्टा जिनेन्द्रः
प्राप्तैश्वर्या विभुरपि निजं
स्वत्वमाधत्त वीरः ॥
यत्रोत्कर्षं कमपि गतवान्
श्रीसुधर्माऽऽर्यवर्यो
यत्र प्रापुश्चरणनिरताः सूरयो
ऽन्येऽप्यनल्पाः ॥३३२॥

पारम्पर्यांद्यमुपगतवान् ख्यात-
कीर्त्तिप्रतापः
सूरिर्हीरोऽनघगुरुतपोगच्छ-
पद्मांशुमाली ॥
सूरेस्तस्यानु चरणरतस्सेन-
सूरिः प्रकामं
यत्रोद्योतोऽभवदमितधीस्सद्-
गुणव्रातधाम ॥३३३॥
यत्र प्राप्तस्तदनु विजया-
लिङ्गितो देवसूरिः
सिद्धान्ताम्भोनिधिरधिगता
शेषनीतिप्रपञ्चः ॥
सूरिः सिंहोऽप्यनु तत इह
ख्यातकीर्त्तिर्बुधाऽयो
यम्प्राप्याभूज्जिनवरमतो-
ल्लासविस्तारकर्त्ता ॥३३४॥
पट्टे तस्मिन् समजिनसुत-
ख्यातसाम्राज्ययोगे
सम्यक् सूत्रोक्तविधिचरणा-
वाप्तयोगैकलभ्ये ॥

गीतार्थाग्र्यप्रविततयशो-
वृद्धिचन्द्राङ्घ्रिसेवो-
द्रेकप्राप्तामलशिवपथो
ल्लासिदीक्षाश्रुतस्य ॥ ३३५ ॥

गम्भीराप्तागममतविबाधादिप्रज्ञप्तियोगो
न्नीतेः शास्त्राकलनमहितस्तुत्यहेमादिसूरेः ॥
त्यक्तानार्यप्रथितविविधापातरम्यव्रजस्य
जैनश्रद्धाऽसमफलरसास्वादिनो नेमिसूरेः ३३६

लक्ष्मीचन्द्राश्रयणसुभगेवामितानन्ददात्री
दीपाली यत्प्रथमदिवसे सत्समारम्भवत्याम्
ऋत्वर्त्वङ्कोडुपतिमितसंवत्सरे मासि चोर्जे
सिन्धुस्तस्यां मधुपुरपुरे जन्मतिथ्यां प्रपूर्णः३३७

सन्त्येवेह प्रसिद्धास्सुविहितविषया
माननीतिप्रबन्धा
येषां नो न्यायसिन्धुः कलयति
तुलनामेष नव्यप्रचारः॥
किन्न प्राप्तार्थसिद्धिस्तदपि मितरुचा-
वर्थशब्दान्वयाभ्यां-
मासूर्येन्दुप्रचारं स्थितिमनुभवतु
प्राज्ञपाठ्यस्तथाऽस्तु ॥३३८॥

शुद्धम्	अशुद्धम्	श्लो०
लासम्	लसिम्	४
रि-	रि	५
यो	या	१३
ब्रूते	ते	३७
क्षो	क्षा	४२
विकल्प	विकप	५१
यो	या	५८
शो	शा	७८
बुध जैन	बुधजैन	१०२
दिदो	दि दो	१२२
तेनोऽ-	ते	१८२
नाकार	नोऽनाकार-	१८२
तथैव	तयैव	१८९
मिति	मति	१९३
द्रूय	द्रय	२३०
ङ्नि	ङ्गिनि	२८९
स्था ॥	स्था-	३००
३००	३०००	३००
यै-	ये	३०३
न्तव	न्तिव्र	३२५
दृष्टं	दृष्टः	३६१
सतु	सहि	३६६
त्तकः	त्तिकः	३८१
पूर्वक	पूवक	३९१
सश्च	सच्च	४०९
श्चोऽ-भा	श्चोभा	४१९
ङ्के	ङ्कं	४३४
मो	मा	४३४
तो	ता	४४१
दो	दा	४६६

शुद्धम्	अशुद्धम्	श्लो०
थ्या	ध्या	४६७
त्त	त	४६७
नो तस्य	गोतमसुतस्य कथाऽधिकारइतिवापाठः	४७५
दि वि	दिवि	५२०
नम	तन	५२१
रो	रा	५३३
भो	भा	५३५
र्व्या	व्या	५४३
तृ	तं	५४६
कं	क	५६०
तोत	तात	५९१
योगात्	यागात्	६३२
ना यदि प्रमा	नायदिमा	६३२
तोऽपि	ताऽपि	६३८
६५३	६५१	६५३
६९७	६९६	६९७
श्रित्	श्रितः	७०६
तातः	तात्	७०८
रि	रि-	७०९
कूट	कट	७११
नोनि	नो नि	७१९
शून्य	शन्य	७३१
भोग्य	भाग्य	७३२
नो क	नोक	७३३
न्धयो	न्धन्यो	७३४
शे तु	शेतु	७३५
तः फ	तोफ	७३८
न	न	७५०
वा-	वा	७७६

शुद्धम्	अशुद्धम्	श्लो०
स	ःा	७८१
विष	विय	७८५
भो	भा	७८९
मिष्ठै-	मिष्ठ	७९३
त्-	त्	७९८
रो	रा	८०९
बौ	बो	८१५
ताऽस्तु	तास्तु	८१६
ङ्घ्रि	ङ्घि	८२६
क्किक-	र्कि	८३४
क्किक	र्कि	८३९
रक्तं	दक्तं	८५६
णान्वि	णन्वि	८७३
ब्दैः	ब्दै	९०४
तश्च	तश्च	९१२
नयो	नया	९२२
यो	या	९५१
जिनैक	जिनै	९५१
शकवशाद	शदकवशा	९५५
ष्ठते नो	ष्ठु तेनो	९५५
तो	ता	९५७
व-	व	९६३
घा-	घा	९६७
गतेन	गतनेन	९७७
भिन्न-	भिन्न	९८४
ताप	ता प	१०००
न्धक	न्धःक	१००२
तिर्जे	तिर्जि	१०२०
मल	म ल	१०२५
ज्ञा-	ज्ञा	१०२७
जैमि	जभ	१०२८
दु	द	१०३३
ष्टं	ष्टं-	१०४६
स्सुग	स्सु ग	१०४८
स्सएव	सएव	१०६२
योक्तो	क्तोयो	१०६४
सद्	सद	१०७२
ते	त्त	१०८६
सौ	सै	१९३
दुष्टः	दृष्टः	१९३
चर्मदृशां	चर्मशां	१९४
दो	दौ	१११८
नाचु	नाच	१११८
हे ते	हेतै	११५८
भावपि	भाववपि	११७०
चनैः	चैनः	११८८
र्या	या	११९९
रीत	रित	१२२६
नय	न	१२२६
गगन	गनन	१२३८
तानु	तोऽनु	१२३९
र्नी	नी	१२४४
ना-	ना	१२४७
तिरि	ति रि	१२४९
ला	ल	१२५०
न्यो	न्यो	१२५२
वा-	वा	१२५२
त्रै	त्र	१२६२
वि	ाव	१२६३

इतिश्री तपोगच्छाचार्यश्रीविजयदेवसूरि
विजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थ-
त्वादिगुणोपेतनिजचरणविद्याप्रतिभातिशया-
गुणसंस्मारितातीतयुगप्रधानगुरुवर्यवृद्धिचन्द्रा-
परनामश्रीवृद्धिविजयचरणकमलमिलिन्दाय-
मानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभ-
ट्टारकश्रीविजयनेमिसूरिविरचितं ॥

॥ न्यायसिन्धुप्रकरणम् ॥